चौखम्बा-संस्कृत-ग्रन्थमाला ।

(ग्रन्थसंख्या ७)

न्यायरत्नमाला ।

निखिलतन्त्राऽपरतन्त्रश्रीमत्पार्थसारथिमिश्रप्रणीत

वाराणसेयराजकीयप्रधानसंस्कृतपाठशालायां

साहित्यदर्शनाध्यापकेन मानवल्ल्युपाह्व-महामहोपाध्याय-

श्री गङ्गाधर शास्त्रिणा परिशोधिता ।

काश्याम्

तारा-यन्त्रा॰ श्री०-बाबू-हरिदासगुप्तेन फ्रीमैन कम्पनी लिमिटेड द्वारा मुद्रयित्वा प्रकाशिता।

सन् १९०० ईस्वी ।

वैक्रमसम्वत् १०५७ ।

शुभम् ।

न्यायरत्नमालायाः ।

भूमिका ।

अथायमारभ्यते न्यायरत्नमालाख्यो मीमांसानिबन्धो मुद्रयित्वा प्रकाशयितुम् । अस्य किल निर्माता मीमांसकशिरोमणिः पार्थसारथिमिश्रो नाम । अस्य विपश्चितामपाश्चात्त्यस्य स्थितिकालो मदनुजमुद्रितश्लोकवार्तिकभूमिकायामवधारित इति तत एवावगन्तव्यः । तत्कृता शास्त्रदीपिका सर्वैरेव समाद्रियते पूर्वमीमांसाऽभियुक्तैः । तस्यामेव प्रथमसूत्रे प्रपञ्चेनायं पक्षो न्यायमालायामेव निरस्त इत्याकलय्य न्यायरत्नमालामन्विष्यद्भिरस्माभिरासादितमेकं पुस्तकं नानाविधपुस्तकसंग्रहरसिकस्य श्रीयुतगोविन्ददासमहोदयस्य पुस्तकालये । अपरं च श्रीमन्नेपालराजगुरुपण्डितवरश्रीहेमराजपण्डितैः सानुग्रहं नेपालादानाय्य दत्तमिति द्वे पुस्तके समवलभ्य श्रीमद्रामानुजाचार्यप्रणीतामस्य टीकां श्रीगोविन्ददासमहोदयपुस्तकालये पूर्वार्धमात्रस्योपलभ्य कृत्स्नायामस्यामुपलब्धायां सा मुद्रणीयेति निश्चित्य मूलमात्रमिदानीं पूर्वमीमांसाऽऽलोचनरसिकजनचेतःप्रमोदार्थं प्रकाशयामः । तामिमामालोच्यावधारयन्तु प्राचीनविद्वद्वरविचारशैलीलेखसौष्ठवप्रभृतिगुणगणान् क्षाम्यन्तु च मानवापरिहार्यमतिदृष्टिदोषजनितानि स्खलितानीति मुहुःप्रार्थयमानो विरमामि विस्तरादिति । शुभम् ॥

आश्विन वदि ५ गुरौ
संं० १९५७

मानवल्लयुपाख्यो
गङ्गाधरशास्त्री ।

न्यायरत्नमालायाः प्रकरणानां सूची ।

न्यायरत्नमालायाः शुद्धिपत्रम् ।

पृष्ठ	पंक्ति	अशुद्धम्	शुद्धम्
४	१७	तमध्याययी	तमध्यापयी
५	१९	प्रसिद्धा प्रसि	प्रसिद्धाप्रसि
११	२	स्तेनं	स्तेन
१४	६	विथि	विधि
१८	११	स्यात	स्यात्
२०	२१	द्ध्वयत	द्ध्ययत
२२	६	वृषणम्	दूषणम्
६१	२२	पयि	अपि
६१	२३	कथमंग्रे:	कथमग्रे:
६१	२४	ऽवगम्यते	साऽवगम्यते
६१	२४	त्तकाल	तत्काल
६६	१४	भाव:	द्भाव:
६७	१४	गतिकागति	गतिकगति
६८	१४	वाऽद्दष्टे	चाद्दष्टे
७६	९	र्वणे	र्वर्णे
७७	१	अपेक्षतेइत्यादि	स्थूलाक्षरै:
८१	१७	अत्राभिधीयतइत्यादि	स्थूलाक्षरै:
८४	१९	मवे	मेव
८५	१२	ति । किञ्च न	ति किंचन
९१	४	रचनाकाङ्क्षा	रचना ऽऽकाङ्क्षा
९५	२	संवादर्शे	संवाददर्शे
९६	१४	पवासन्निधि:	एव सन्निधि:
१०५	१६	कश्च । विष	कश्च विष
११०	२२	स्तस्या	स्तस्या:
११४	५	मुमुक्षु	मुमुक्षु
११८	६	मुमानं	नुमानं

१३२	१०	मतीति	मन्तीति
१३४	११	संदेशेन	संदंशेन
१३५	३	र्थवोरेव	र्थयोरेव
१५६	१८	विशेष	गविशेष
१५७	२१	पर्वं	पूर्वं
१६५	२५	तत्र	तत्र
१६८	१५	यथा ऽङ्ग	यथाऽङ्ग-
१७३	१५	णाम् । इह	णाम् इह
३८२	२	कत्व	कत्वं
१८२	५	रनुष्ठानं	रननुष्ठानं
२०१	४	यागा	योगा
२०३	५	तद्रपा	तद्रूपा
२०८	७	त र्ह्य	तर्ह्य
२०८	१२	विघिना	विधिना
२०८	२४	स्तङ्ग	स्तदङ्ग

श्रीगणेशाय नमः ।

पार्थसारथिमिश्रकृता

न्यायरत्नमाला ।

आनन्दममृतं ज्ञानमजं साक्षिणमीश्वरम् ।
ब्रह्म सर्वमसर्वञ्च[1] वन्दे देवं हरिं प्रभुम् ॥ १ ॥
मीमांसाऽर्णवसंभूतैः कुमारस्वामिना कृतैः ।
न्यायरत्नैरहं मालां संग्रथ्नामि मनोरमाम् ॥ २ ॥
तत्र स्वाध्यायविध्यर्थः प्रथमं तावदुच्यते ।
आचार्यदृष्टिमाश्रित्य प्रतिपक्ष[2]निरासतः ॥ ३ ॥
तत्र तावदिमं केचित्पूर्वपक्षं प्रचक्षते ।
आचार्यकनियोगार्थः स्वाध्यायस्तत्प्रयुक्तितः ॥ ४ ॥
प्रथमावगतत्वेन तद्धि युक्तं प्रयोजनम् ।
तत्र[3] वाक्यार्थविज्ञानं तद्धि पश्चात्प्रतीयते ॥ ५ ॥
तेनाविवक्षितार्थत्वाद्वेदस्यार्थविचारणम् ।
न कर्तव्यमतः शास्त्रं मीमांसार्थं[4]मनर्थकम् ॥ ६ ॥

आचार्यकरणविधिप्रयुक्तस्य हि स्वाध्यायाध्ययनस्य प्रयोजनापेक्षायां पुरुषान्तरगामित्वेन बहिरङ्गमपि प्रथमावगतत्वेन

(१) सदसद्वन्दे हरिं विभुम् इति २ पु. पाठः । (२) परपक्षेति २ पु. पाठः ।
(३) न तु इति २ पु. पाठः । (४) मीमांसाख्यम् इति २ पु. पाठः ।

तत्सिद्धिरेवास्य प्रयोजनं युक्तं न त्वर्थज्ञानं पश्चाद्भावित्वात्तेनान्यार्थत्वाद्वेदाध्ययनस्या[1] विवक्षितो ऽर्थः। अविवक्षितश्च न निर्णेतव्यः प्रयोजनाभावात्। अकर्तव्ये च निर्णये न विचारः कर्तव्य इति तदात्मकं मीमांसाशास्त्रमनर्थकत्वादनारम्भणीयमिति। कथ[2]माचार्यकरणविधिप्रयुक्तमध्ययनं न स्वविधिप्रयुक्तम् उच्यते।

न स्वाध्यायविधावस्ति नियोज्यस्तत्र चासति[3]।
न प्रयोजकता युक्ता प्रयाजादिनियोगवत् ॥ ७ ॥

न ह्यनधिकारस्य विधेर्विषयानुष्ठापकत्वं सम्भवति प्रयाजादिनियोगवत्[4]। न च स्वाध्यायाध्ययनविधावधिकारी श्रूयते तस्मान्नास्य प्रयोजकत्वं सम्भवति ॥

न च कल्पयितुं शक्यो नियोज्यः पितृयज्ञवत्।
अकल्पिते ऽपि यच्चास्मिन्ननुष्ठानं हि सिद्ध्यति ॥ ८ ॥

[5]अश्रूयमाणो ऽपि नियोज्यः पितृयज्ञादिवत्कल्प्यतइति। तन्न। अकल्पिते ऽपि नियोज्ये यस्मादनुष्ठानं सिद्ध्यति। सिद्धे तस्मिन्नासौ कल्पयितुं शक्यते अनुपपत्त्यभावात्। अनुष्ठाना[6]धीनसिद्धिर्हि नियोगस्तत्सिद्ध्यर्थमनुष्ठातारमाक्षिप्यानाधिकारिणो ऽनुष्ठातृत्वासम्भवादनियोज्यस्य चाधिकारासम्भवान्नियोज्यं कल्पयति। यदा तु विध्यन्तरानुष्ठापितेनैव विषयेण स्वात्मलाभं पश्यति तदा ऽनुपपत्त्यभावान्न नियोज्यं कल्पयति प्रयाजादिनियोगवत्। सम्भवति चेहाचार्यकरणविध्यनुष्ठापितेनैवात्म-

---

(१) वेदस्येति २ पु. पाठः।
(२) कथं पुनरिति २ पु. पा.।
(३) चासत इति २ पु. पा.।
(४) विधिवदिति २ पु. पा.।
(५) स्यादेतदित्यधिकं २ पु.।
(६) विषयानुष्ठानेति २ पु. पा.।

विषयेणाध्ययननियोगसिद्धिरिति न नियोज्यकल्पनासम्भवः । कथं पुनराचार्यकरणविधिरध्ययनं प्रयुङ्क्ते तदुच्यते । उपनीयाध्यापनादाचार्यकं भवति न चाध्यापनमध्ययनमन्तरेण सम्भवतीति तदाक्षिपति । उपनयनमपि क्त्वाप्रत्ययेनाध्यापनसमानकर्तृकमवगम्यमानं तदङ्गमेव विज्ञायते ।[1] तस्य च द्वारापेक्षायामुपनेयासत्तिरेव द्वारं लिङ्गादवगम्यते । उपनेयो ऽपि नाकिञ्चित्करो ऽङ्गमिति तद्व्यापारापेक्षायामुपनयनं प्रक्रम्याधीतमध्ययनमध्यापनोपकारित्वेन तद्व्यापारत्वेनाध्यवसीयते । एवञ्च वेदाध्ययनं कुर्वन् माणवको ऽध्यापनस्योपकरोतीत्यवगमात्तद्विषयमेवाध्ययनमाचार्यकसाधनमिति तद्द्वारेण सर्वस्याध्ययनाङ्गस्य व्रतादेस्तत एवानुष्ठानसिद्धिः । तस्मादाचार्यकरणविधिसिद्धिप्रयोजनत्वादध्ययनस्याविवक्षितस्वार्थत्वाद्वेदस्य न तदर्थनिर्णयार्थं मीमांसाशास्त्रमारब्धव्यमिति ।

सिद्धान्तस्तु सत्यमाचार्यकरणविधिप्रयुक्तमध्ययनं न तु तत्सिद्धिरेवास्य प्रयोजनं बहिरङ्गत्वात् । कर्तृगामित्वेनान्तरङ्गत्वादर्थज्ञानं प्रयोजनत्वेन स्वीक्रियते । ननु प्रथमावगतत्वेन प्रयोजनापेक्षमध्ययनमाचार्यकमेव तावत्स्वीकरोति स्वीकृते च तस्मिन्नपेक्षाभावात्पश्चादवगतमर्थज्ञानमन्तरङ्गमपि न प्रयोजनं भवितुमर्हति । मैवम्, प्रथममाचार्यकस्य प्रयोजनत्वापरिकल्पनात् यद्यकल्पिते तस्मिन्नध्ययनस्यानुष्ठानं न सिद्ध्येत् तर्हि तत्कल्प्येत न त्वेतदस्ति अकल्पिते ऽपि तस्मिन्ननुष्ठानलाभात् । अनुष्ठिते त्वध्ययने प्रयोजनापेक्षायामन्तरङ्गत्वादर्थज्ञानमेवाङ्गीक्रियते । ननु नियोग एव शब्दावगतः प्रयोजनं स्यान्नार्थज्ञानम्[2] । न,

(१) कथं समानकर्तृकत्वमिति चेत् क्त्वाप्रत्ययेन । उपनीयेति क्त्वाप्रत्ययः श्रुत एव । तस्मात् तत्तदङ्गम् इत्यधिकम् २ पु. ।

(२) नार्थज्ञानमिति नास्ति २ पु० ।

अर्थज्ञानस्यापि प्रतीयमानस्य सागायोगात् । तेनोभयोरपि प्रयोजनत्वं युक्तमवगतत्वात् । अर्थज्ञानस्य नियोगस्य च । तत्रार्थज्ञानरूपं प्रयोजनं न विचारमन्तरेणाध्ययनेन सम्पादयितुं शक्यतइति अध्ययनविधिरेव तत्सिद्ध्यर्थं विचारमाक्षिपतीति तदात्मकं शास्त्रमारब्धव्यमिति ॥

अत्राभिधीयते नायं विचार उपपद्यते ।
अध्यापनप्रयुक्ते हि स्वाध्यायाध्ययने सति ॥ ९ ॥
विचारो युज्यते कर्तुं न तत्तेन प्रयुज्यते ।
स्वकीयेनैव विधिना प्रयोक्तुं शक्यते यतः ॥ १० ॥

यदि ह्यध्ययनमध्यापनविधिप्रयुक्तमभविष्यत् ततः किं तत्सिद्धिरेवास्य प्रयोजनमुतार्थज्ञानमिति विचार उपापत्स्यत न तु तत्प्रयुक्तं स्वकीयेनैव विधिना प्रयुक्तिसम्भवात् ॥

नियोज्याभावतो यत्तु प्रयोक्तृत्वनिवारणम् ।
अध्यापनेऽपि तत्तुल्यं न हि तत्राप्यसौ श्रुतः ॥ ११ ॥

नियोज्याभावान्नाध्ययनविधिरध्ययनस्य प्रयोजको भवितुं क्षमतइति यदुक्तं तदध्यापनविधावपि तुल्यं न ह्यष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेत्यत्र उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षतइत्यत्र कश्चिन्नियोज्यः श्रुतः तेनाध्यापनेऽपि न तावत्प्रयोजकत्वं स्यात् कुत एवाध्ययने ॥

अथाचार्यककामस्य नियोज्यत्वं प्रकल्प्यते ।
ज्ञानकामस्य किन्नैवमन्यत्रापि प्रकल्प्यते ॥ १२ ॥

यदि ह्यध्यापनविधावाचार्यककामो ऽश्रुतो नियोज्यः क-
ल्प्यते तर्ह्यध्ययनविधावप्यर्थज्ञानकामस्य कल्पना तुल्यैव । ननु
नार्थज्ञानकामस्सम्भवति यो नियुज्यते ज्ञातस्तावदर्थो ज्ञातत्वा-
देव न ज्ञातुमिष्यते नाप्यज्ञाते ऽर्थे ज्ञानेच्छा संभवति कथं हि बु-
द्ध्यनारूढमहमिमं जिज्ञासेयेति ज्ञातुमाशंसीत । तस्मान्नार्थज्ञा-
नकामस्य नियोज्यता सम्भवतीति । तदुच्यते । अहो बत भवान्
आत्मानं शिष्यान् सकलञ्च लोकमभिसंधातुमुद्युक्तः । कथं
हि दुर्गवर्त्मगामिनं दस्युसरीसृपकण्टकव्यालव्याघ्रकण्ठीरवादिस-
दसद्भावजिज्ञासया तत्र तत्र दृष्टिं चालयन्तमात्मानं वेदार्थबुभुत्स-
या वा ऽऽत्मानमुपधावतः शिष्यान् प्रियादिसदसद्भावजिज्ञासया
तं तमपवरकादिदेशमवलोकयमानं शास्त्रश्रवणपुस्तकनिरीक्षणा-
दिषु च तत्तदर्थज्ञानार्थं घटमानं सकलञ्च लोकमनभिसंधाय ज्ञा-
नेच्छापह्नवः शक्यते कर्तुम् । अथ वा ऽस्य नेदृशो निह्नवो विस्मय-
पदम् अयं ह्यागोपालं सर्वलोकप्रसिद्धं द्विचन्द्रादिज्ञानं धर्माधर्मा-
नुष्ठानस्य[1] चार्थानर्थहेतुत्वं निन्हुते । तानेव तु वयं शोचामः य-
एवं वेदार्थबुभुत्सयोपधावन्तो बुभुत्सा नाम नास्तीति सकललोक-
विपरीतमभिदधानं न विजहति । सूत्रकारश्च कथं हि विहाय सु-
मनस्सदृशीं जिज्ञासां कर्तव्यत्वेन प्रतिपादयति भाष्यकारेणापि
चैषाप्रसिद्धा प्रसिद्धत्वेनाक्षिप्य समाहिता । कथं पुनः समाधानम्,
उच्यते यद्यपि नात्यन्तापरिज्ञातो ऽर्थो ज्ञातुमिष्यते नापि सर्वा-
त्मना ज्ञातः तथा ऽपि केन चिदात्मना ज्ञातः केन चिदात्मना
जिज्ञास्यते तथा दर्शनात् । यथोद्भिदादिपदं गुणकर्मान्यतरा-
भिधायित्वेनावगतं विशेषरूपेण जिज्ञास्यते । यथा च लोके
कुड्यादिव्यवहिते देशे छायाचलनादिना वस्तुसत्तामात्रमव-

---

(१) अनुष्ठानस्येति २ पु० नास्ति ।

गम्य गवाश्वादिविशेषं जिज्ञास्यते । तथा धर्माधर्मावर्थानर्थहेतुत्वमात्रेण वृद्धेभ्यः पित्रादिभ्योऽवगम्य विशेषरूपेणापरिज्ञातयोस्तयोर्हानोपादानाशक्तेस्तत्परिज्ञानेच्छा सम्भवतीति युक्तमेवैतत् । ज्ञानकामस्य नियोज्यत्वं धर्माधर्मज्ञानकामः स्वाध्यायमधीयीतेति ।

यस्तु वदति न वयं ज्ञानेच्छामपह्नुमहे तस्याः सर्वलोकप्रसिद्धत्वेनाशक्यनिह्नवत्वात् । इष्टानिष्टप्राप्तिपरिहारोपायज्ञानं हि सर्वः प्रार्थयते कस्तत्र विप्रतिपद्यते । वेदार्थज्ञाने तु नास्ति कामनेत्युच्यते। यदि हि सकलस्य वेदार्थस्येष्टानिष्टप्राप्तिपरिहारहेतुता भवेत्ततस्तज्ज्ञानं पुरुषेणार्थ्येत । न त्वसावस्ति नैमित्तिकनिषेधाधिकारयोर्विध्यनुष्ठानमात्रपरिनिष्ठितत्वात् । तस्मान्नार्थज्ञानकामस्य नियोज्यत्वमिति । स वक्तव्यः किमिदानीं नैमित्तिकवाक्यार्थज्ञानमनपेक्षितमेव । यद्येवं तर्हि पिकदशनकाकदशनविमर्शसदृशं[1] किं सर्वत्र शक्तौ प्रवृत्तिःस्याद् अपि चाप्येकदेशे तथा च कालमपि किमनादृत्य यजस्वेत्येव यष्टव्यम् उत कालएव, मुख्याभावे द्रव्यान्तरं प्रतिनिधेयम् उत न तच्च सदृशमसदृशमित्यादि न कर्तव्यं स्यात् । निर्णयार्थत्वाद्विमर्शस्य तदर्थस्य चानिर्णिनीषितत्वात् । अतोऽवश्यमसत्यपि फले विध्यर्थानुष्ठानसिद्ध्यर्थमेव तद्वाक्यार्थज्ञानमपेक्षितव्यमित्यभ्युपगन्तव्यमिति युक्तमर्थज्ञानकामस्य नियोज्यत्वमिति । यद्येवं तर्हि प्रागेव वेदाध्ययनाद्धर्मजिज्ञासोत्पादादथातो धर्मजिज्ञासेत्यनुपपन्नं स्यात्, न जिज्ञासाभेदात् यथाह ।

जिज्ञासैकोपनीतस्य द्वितीया पठितश्रुतेः ।
ज्ञातवेदाङ्गकस्यान्या या मीमांसापुरःसरेति ॥१३॥

(१) सदृशस्तद्विमर्श इति पाठः २ पु० ।

प्रथमं तावद्धर्माधर्मौ ज्ञातव्याविति वृद्धेभ्यः श्रुत्वा तज्ज्ञातुमिच्छन् स्वाध्यायाध्ययनविधिना तादर्थ्येन विहितमध्ययनमपि तेभ्य एवावधार्याधीते वेदं ततो ऽव्युत्पन्नस्याधीतादपि वेदादर्थज्ञानानुदयात् किमनेनोच्यते इति पुनरन्यादृशी जिज्ञासा जायते तद्वशेन च व्युत्पत्त्युपाये निगमनिरुक्तव्याकरणादिश्रवणे यतते ततश्च पदार्थज्ञानाद्वाक्यार्थः प्रतीयमानो न्यायानवधारणात्संशयितो भवति ततः पुनर्वाक्यार्थविशेषजिज्ञासा भवति तदिदं पश्चात्तनं जिज्ञासाद्वयमभिप्रेत्याथातो धर्मजिज्ञासेत्युक्तम् । यथोक्तं भाष्यकारेण न जिज्ञासामात्राभिप्रायेणेदमुच्यते किञ्च तादृशीं धर्मजिज्ञासामधिकृत्यायमथशब्दं प्रयुक्तवानाचार्यः या वेदाध्ययनमन्तरेण न सम्भवतीति । प्रामाण्याप्रामाण्यजिज्ञासा तु यद्यपि वेदाध्ययनात्प्रागपि सम्भवति तथा ऽप्यध्ययनकालानियति[१]भयात्पश्चादेव करिष्यते। तदलमतिदूरं गत्वा। सिद्धं तावदर्थज्ञानकामस्याध्ययननियोज्यत्वमिति । प्रत्युताध्यापनएव नियोज्यो न सम्भवति आचार्यकस्य सामान्यतो ऽपि प्रागस्माद्वचनादनवगमादित्यनन्तरमेव वक्ष्यामः ।

अथानियोगजन्यत्वान्नियोज्यस्य विशेषणम् ।
न युक्तमर्थविज्ञानं तुल्यमाचार्यके ऽपि तत् ॥१४॥

यदेव हि नियोगफलं तदेव काम्यमानतया नियोज्यमवच्छेत्तुमलं तुषविमोकादिवत्। ज्ञानन्तु विषयभूताध्ययनफलं न नियोगजन्यमिति न तत्कामस्य नियोज्यत्वं सम्भवतीति चेत् तर्ह्यनेनैव हेतुना आचार्यकमपि न नियोज्यविशेषणं स्यात् तस्यापि विषयफलत्वात् । किञ्च ।

---

१ प्रतिपत्तिभयादिति २ पु. पाठः ।

प्रमाणान्तरविज्ञाते कामनोत्पद्यते प्रिये ।
आचार्यकं तु न ज्ञातं मानेनान्येन केन चित् ॥१५॥

आहवनीयादिवदलौकिकमाचार्यकं प्रमाणान्तरेणानवगतमध्यापनविधायकेनैव वचनेनावगम्यतइति भवतां दर्शनं नचानवगते कामना सम्भवतीति न तत्कामस्य नियोज्यत्वसम्भवः । अनेनैव तु वचनेन ज्ञात्वा काम्यतइत्याश्रीयमाणे परस्पराश्रयदोषापत्तिः ।

सिद्धं तत्काममुद्दिश्य विधिरेष प्रवर्तते ।
विधावस्मिन् प्रवृत्ते च तत्कामस्य निरूपणम् ॥१६॥

स्यादेतत् ।

अधिकारादनुष्ठानं विद्यते स त्विहापि च ।
असत्यपि नियोज्यत्व तद्धि साक्षान्न साधनम् ॥ १७ ॥

नियोगम्प्रति हि नियोज्यता नासौ साक्षाद्विषयानुष्ठानसाधनं किन्तु नियोज्यत्वेन सम्बद्धस्य पुरुषस्य नियोगः कर्तव्यो भवति । स एव हि नियोज्यो यो नियोगं ममेदं कार्यमिति बुध्येत । यस्य च नियोगः कर्तव्यस्तस्य च तत्साधने कर्मण्यधिकारो भवति स्वकार्यसाधनत्वात् अधिकाराच्चानुष्ठानम् । यत्र चान्तरेणापि नियोज्यत्वमधिकारो भवत्यवगतस्तत्र तत एवानुष्ठानसिद्धेः किं नियोज्यत्वेन । विद्यते चाध्यापने ऽधिकारः । आचार्यकसाधनत्वात् । आचार्यकसाधनत्वेनाध्यापने वचनेन प्रतिपादिते तदर्थिनस्तत्राग्न्यर्थिन इवाधाने ऽनुष्ठानसिद्धिः । तदाक्षिप्तानुष्ठानेनैवाध्ययनेन लब्धात्मको ऽध्ययननियोगो न नियोज्यं परिकल्पयतीति । एवं तर्हि ।

अधिकारादनुष्ठानसिद्धेरध्ययनस्य च ।
अध्यापनप्रयुक्तत्ववाचोयुक्तिरनर्थिका ॥ १८ ॥

विनापि विनियोज्यत्वमर्थज्ञानसाधने ऽध्ययने स्वाधिकारादेव तर्हि तदर्थिनो ऽनुष्ठानसिद्धेरध्यापनप्रयुक्तत्वानुपपत्तिः । भवद्भिरपि चेष्यते एवाध्ययने ऽधिकारः । नियोज्यत्वमात्रन्तु नेष्यते न तावता[1] परप्रयुक्तत्वमनुष्ठाने संभवति स्वकीयादेवाधिकारादनुष्ठानलाभात् । सत्यपि च नियोज्ये फलसाधने कर्मणि तत एवानुष्ठानं न नियोगात् कामाधिकारवत् । फलं चासत्यपि नियोज्ये साधनानुष्ठानं प्रयोक्तुं क्षममिति किं नियोज्यसदसद्भावविचारेण । यत्र तु नियोज्याधीनैव फलावगतिर्विश्वजिदादौ तत्र भवतु नियोज्यापेक्षा, अत्र त्वन्तरेणापि नियोज्यमर्थज्ञानसाधनत्वेनाध्ययनमवगम्यतइति तत एवानुष्ठानसिद्धेर्नाध्ययनस्याध्यापनप्रयुक्तत्वसम्भवः । ततश्च ।

अप्रयोजकता तुल्या नियोज्याभावतो द्वयोः ।
अधिकारात्प्रयोक्तृत्वं समान[2]मुभयोरपि ॥ १९ ॥

यदि नियोज्याभावादप्रयोजकत्वमध्ययनविधेस्ततो ऽध्यापनविधेरपि तदभावादप्रयोजकत्वं भवति । अथाधिकारसद्भावात्तस्य प्रयोजकत्वम्, अध्ययनविधेरपि तर्हि तत्सद्भावात् प्रयोजकत्वं युक्तमित्युभयोरपि तुल्यत्वान्नाध्यापनविधिप्रयुक्तत्वमध्ययनस्य संभवति ।

विचारस्य प्रयुक्तिश्च नाचार्यकविधानतः ।
स्वेनैव त्वधिकारेण तद्वदध्ययनस्य सा ॥ २० ॥

---

(१) न चैतावतेति २ पु. पा. ।
(२) संमं स्यादिति २ । ३ पु. पा. ।

आचार्यकमध्यापनसाध्यमध्ययनमात्रमाक्षिपेत् न विचारं विचारमन्तरेणाप्यात्मलाभात्। तेनावश्यमध्ययनजन्येनैवाधिकारेण विचारमन्तरेणानुपपद्यमानेन तत्प्रयुक्तिरास्थेया तद्वदेवाध्ययनस्यापि तेनैव प्रयुक्तिः संभवतीति न प्रयोजकान्तरं मृग्यम् । येन हि फलेनार्थज्ञानाख्येनेतिकर्तव्यताभूतो विचारः प्रयुज्यते प्रयुज्यतेतरामनेन करणभूतमध्ययनम् । अथोच्येत अध्यापनविधिरेव विचारस्यापि प्रयोजकः स हि विशिष्टप्रयोजनाध्ययनगोचरमध्यापनं विदधत् तत्सिद्ध्यर्थन्तादृशमध्ययनं प्रयुङ्क्ते तादृशत्वं चाध्ययनस्य विचारमन्तरेणानुपपन्नमिति तेनैवासावाक्षिप्यतइति ।

तदयुक्तं विशिष्टस्य यद्यप्यध्ययनस्य सः ।
अनुष्ठानं प्रयुङ्क्ते न ज्ञानस्यानङ्गभावतः ॥ २१ ॥

यद्यप्युपनयनद्वारेणाध्ययनं प्रयुञ्जानो ऽध्यापनविधिरुपनयनप्रक्रमाधीतस्वाध्यायो ऽध्येतव्य इत्येतद्वाक्यविहितं यदर्थज्ञानार्थमध्ययनं तस्यैवानुष्ठानं प्रयुङ्क्ते तथा ऽपि तत्स्वरूपमात्रमेवोपकारकत्वात्प्रयुङ्क्ते न त्वर्थज्ञानानुष्ठानम् अनुपकारकत्वात् । यदि त्वर्थज्ञानमध्ययनाङ्गं भवेत्ततो ऽध्ययनप्रयोजकेन विधिना तद्द्वारेण प्रयुज्यते ज्योतिष्टोमविधिनेव दीक्षणीयाद्वारेण वाङ्नियमः । न तज्ज्ञानमध्ययनाङ्गम् अध्ययनमेव तु तदङ्गं न चाङ्गद्वारेण प्रधानं प्रयोक्तुं शक्यम्। यश्च ज्ञानं न प्रयुङ्क्ते नासौ तत्सिद्ध्यर्थं विचारं प्रयोक्तुमर्हति । ननु यद्यपि न ज्ञानमङ्गं विचारस्त्वङ्गमेव, सत्यं न त्वध्ययनाङ्गस्यापि तद्द्वारेणाध्यापनेन प्रयुक्तिसम्भवः ।

यदि तेन विना न स्यात्प्रधानस्यात्मसम्भवः ।
प्रयोजकस्य चासिद्धिस्ततस्तेन प्रयुज्यते ॥ २२ ॥

अन्यथा ऽपि तु तल्लाभे स्वात्मलाभे च सिध्यति ।
नैव कार्यान्तराङ्गस्य प्रयुक्तिस्तेनं सिध्यति ॥ २३ ॥

अध्यापनं ह्यध्ययनमन्तरेणानुपपद्यमानं तत्स्वरूपमात्रमेव तावत् साक्षात्प्रयुङ्क्ते न तु तदङ्गं,यदि त्वङ्गेन विना प्रधानभूतमध्ययनमेव न सम्भवेत् ततस्तद्द्वारेणाङ्गमपि प्रयुञ्जीत पशुपूर्वमिव यूपद्वारेण छेदनादीन्। यदि चाङ्गशून्येनाध्ययनेनाध्यापनं न सिद्ध्येत् यत्किञ्चित्स्वाङ्गोपेतमेवाध्ययनमध्यापनोपकारि स्यात्ततो ऽध्यापनविधिनैवाध्ययनाङ्गं प्रयुज्येत ज्योतिष्टोमेनेव याङ्गनियमः। न त्वेतदुभयमप्यस्तीति[1] विनाप्यङ्गेनाध्ययनस्वरूपसिद्धेः अध्यापनस्य तत्स्वरूपमात्रेणा[2]त्मलाभात्। तेन यद्यप्यविघ्नपरिसमाप्त्युपयोगितया ऽध्ययनस्वरूपोपयोगिनां व्रतादीनां सकलवेदाध्यापनविषयेणाचार्यकविधिनाऽविघ्नपरिसमाप्त्याकाङ्क्षिणां प्रयुक्तिसम्भवः तथापि न विचारस्तेनाक्षिप्यते । कार्यान्तराङ्गत्वादर्थज्ञानाख्यं हि कार्यान्तरं साधयतो ऽध्ययनस्य विचारो ऽङ्गम् नाध्यापनोपकारिणः। तेन नासावध्यापनविधिना प्रयुज्यते किन्त्वध्ययनजन्येनैवाधिकारेण। ततश्च ।

तद्वदध्ययनस्यापि तत एव प्रयुक्तितः ।
नाध्यापनविधानेन प्रयुक्तिरुपपद्यते ॥ २४ ॥

अथ मन्यसे स्वयमध्ययने ऽस्त्वेवाधिकारः किन्तु ।
अधीयानेन बालत्वात्तदा त्वेष न गम्यते ।
न चाविज्ञायमानेन प्रयुक्तिरुपपद्यते ॥२५॥

---

(१) इतिशब्दो नास्ति २ । ३ पु. ।
(२) तत्स्वरूपणैवेति २ । ३ पु. पा. ।

समाप्ताध्ययनेनासौ व्युत्पन्नेनावगम्यते ।
ज्ञातेन च तदा तेन विचारोऽपि प्रयुज्यते ॥२६॥

ज्ञायमानो ह्यधिकारः प्रयोजको भवति न चाध्ययनावस्थायां बालेन माणवकेनासाववगन्तुं शक्यते । अतो नाध्ययनं स्वाधिकारप्रयुक्तं विद्वदधिकाराध्यापनवशेनैवानुष्ठिते ऽध्ययने साङ्गे व्युत्पन्नेन माणवकेन वेदार्थावगमात् । अध्ययने त्वात्मनो नासाववगन्तुं शक्यते वेदार्थावगमवशादध्ययने स्वाधिकारो ऽवगम्यते अवगतेन च तेन विचारः प्रयुज्यतइति तदयुक्तम् ।

हितकारिभिरेवासौ ज्ञायमानः प्रवर्तकः ।
कर्त्रा ऽविज्ञायमानो ऽपि नैव स्यादप्रयोजकः ॥२७॥

यथैवातुरार्थं भिषज्यद्भिर्हितकारिभिरौषधसेवाफलवेदिभिरातुरापेक्षितफलान्तरप्रतिपादनेन तत्फलप्रदर्शनेन वा साम्ना वोपायेनानुष्ठाप्यमानस्यौषधस्य स्वाधिकार एव प्रयोजकस्तदभिसन्धिप्रवृत्तत्वादौषधफलमेव ह्यारोग्यमभिसन्धाय भिषज्यन्तस्तमनुष्ठापयन्ति, तथा ऽत्राप्यध्ययनसाध्यमधिकारमवगच्छद्भिर्हितकारिभिः पित्रादिभिरनुष्ठाप्यमानस्याध्ययनस्य तत्प्रयुक्तितोपपद्यते । यदि चावश्यमनुष्ठात्रैव प्रयोजको ज्ञातव्यस्ततो ऽध्यापनविधिरपि बालेन तेनाज्ञायमानः प्रयोजको न स्यात् । अतो यथा तस्य ग्राहकावगतस्य प्रयोजकत्वम् एवमध्ययनसाध्यस्याप्यधिकारस्य भविष्यति इति नाध्यापनविधिप्रयुक्तमध्ययनम् । यदि च तत्प्रयुक्तं स्यात्ततो नार्थज्ञानार्थता सिद्ध्येत् । न हि प्रतिलब्धानुष्ठानस्य प्रयोजनापेक्षा समस्ति यदन्तरङ्गत्वादर्थज्ञानस्य प्रयोजनत्वं[1] स्यात् । नन्वधिकारपर्यवसायिनस्सर्वे वि-

(१) ज्ञानं प्रयोजनमिति २ । ३ पु. पा. ।

धय इति अध्ययनविधिना ऽपि तथा भवितव्यम् । न प्रयोजना[1]-नुष्ठानलाभात् अनुष्ठानार्थं ह्यधिकारो ऽपेक्ष्यते । लब्धे तु तस्मिन् न तदपेक्षायां निबन्धनमस्ति ।

स्यादेतत्, अध्ययनविधिरधिकारपर्यवसायी विधित्वादग्निहोत्रादिविधिवत् इति । तदयुक्तम् । अध्ययनविधिरधिकारविधुरः तदभावे ऽपि लब्धात्मकत्वात् यस्य विधेर्यदभावे[2] ऽपि आत्मलाभो भवति स तद्विधुरः नैमित्तिकविधिरिव फलविधुर इति प्रतिहेतुसद्भावात् । यदि चानुपपत्त्यभावे ऽपि अन्यत्र दृष्टमिति कृत्वा ऽधिकारः कल्प्यते ततः फलपर्यन्तत्वं काम्येषु दृष्टमिति नैमित्तिकनिषेधविध्योरपि तत्पर्यन्तत्वं स्यात् । न चैतदिष्टं भवता तस्मान्नाध्ययने ऽधिकारसिद्धिः । अथ विधेरतत्परत्वे ऽपि दृष्टत्वादर्थज्ञानं प्रयोजनमङ्गीक्रियते हन्त अतत्परत्वे ऽध्ययनस्याध्यापनपरत्वेन प्रतीयमानस्यार्थस्याविवक्षितत्वात् अविवक्षितस्य च विचारानर्हत्वात् अनारभ्यमेव शास्त्रं स्यात् । अथापि कथं चिद्विवक्ष्यते तथापि विधेरतत्परत्वान्न वैधत्वं विचारस्य सिद्ध्यति । अवैधश्च न वैधं स्नानमुत्क्रष्टुमर्हति यदि ह्यध्ययनविधिरेवाध्ययनमर्थज्ञानावसानं विदध्यात्ततस्तेन विचारमन्तरेणार्थस्य ज्ञातुमशक्यत्वाद्विचारो ऽप्यर्थाक्षिप्तः स्वविरुद्धं स्नानमुत्कर्षेत । यदा त्वध्ययनमात्रादेव विध्यर्थो ऽनुष्ठितः तदा न विधिस्तावद्विचारानुष्ठानमाक्षिपति । यदि परमुत्तरकर्मानुष्ठानार्थं पुरुषः स्वेच्छया लौकिकेन रूपेणार्थज्ञानोपायेषूपदेष्टृवचनादिषु प्रवर्तमानः कदा चिद्विचारमपि कुर्यात् तथा सति कर्मानुष्ठाने समुपस्थिते सत्युपदेष्टृलाभे चासावनुष्ठीयते ततो नावश्यमध्ययनानन्तरमेवानुष्ठानं सिद्ध्येत् । नन्वध्ययनाङ्गभूतो विचारः न चानङ्गेन क-

(१) प्रयोजनपदं नास्ति २ । ३ पु. ।
(२) यदलाभे इति २ । ३ पु. पा. ।

रणेन विधिः सिद्ध्यतीति विधिरेव स्वसिद्ध्यर्थं विचारमनुष्ठाप-
यतीति कथमवैधत्वं विचारस्य । सत्यमध्ययनाङ्गं विचारस्तथा
ऽपि न विधिसिद्धावुपयुज्यते अर्थज्ञानाख्यकार्योपयोगित्वात् । न
च कार्यान्तरोपयोग्यङ्गं कार्यान्तरेण तदेककरणकेनापि दृष्टि-
कामापूर्वेणेव सौभरकरणकेनान्नाद्यकामापूर्वोपयोगिसौभराङ्ग-
मूर्क्निधनं प्रयुज्यते । अथ विधिरेवार्थज्ञानार्थाध्ययनसाध्यत्वा-
त्तादृग्विषयसंपत्त्यै विचारमाक्षिपतीत्युच्यते तदध्यापनविधिप्र-
युक्तत्वं विचारस्य निराकुर्वद्भिरस्माभिर्निराकृतम् । यद्यप्यर्थ-
ज्ञानार्थमध्ययनं तथापि न तेन रूपेण विधिसाधनत्वं स्वरूपेणैव
तत्साधनत्वात् । यदन्तरेण विधिर्न सिद्ध्यति तस्यैवासावनुष्ठान-
माक्षिपति नान्यस्य । यद्यपि विचारमन्तरेण विधिर्न सिद्ध्येत्
तथापि नासौ विचारानुष्ठानमाक्षिपति नियोज्याभावात् । न ह्य-
सौ केन चित्पुरुषेण ममेदं कार्यमिति प्रतीयते, तेन न स स्वात्म-
न्यपि तावन्नरं प्रेरयेत् कुत एव स्वसिद्ध्युपाये अत एवाध्ययने
ऽप्यनुष्ठापकत्वं न सिद्ध्यति । यस्य हि करणे ऽपि नियोज्याभा-
वादनुष्ठापकत्वं न सम्भवति तस्य कथमङ्गेषु सम्भवेत् तस्मान्न
वैधत्वं विचारस्य सिद्ध्यति ।

स्यादेतत् अध्ययनविधिरेवाध्ययनस्यार्थाज्ज्ञातमर्थज्ञानं प्र-
योजनत्वेन स्वीकृत्य तत्सिद्ध्यर्थं विचारमाक्षिपतीति । तदयुक्तम्
अध्ययनविधिरर्थाज्ज्ञातमर्थज्ञानं प्रयोजकत्वेन स्वीकरोतीत्यस्य
को ऽर्थः। न तावत्तत्र विनियुङ्क्ते प्रमाणान्तरत एव तत्साधनतावग-
मात्, अवघातादिवन्नियमविध्यनवगमाच्च । अथ तादर्थ्यमनुमन्यत-
इत्युच्यते तन्न अननुमतस्यापि तादर्थ्यस्य लाभात् । यदनुमत्यभावे
ऽपि यल्लभ्यते तत्तदनुमन्यते इति हास्यमेतत् । लभ्यते चान्तरे-
णापि विध्यनुमतिमध्ययनस्यार्थज्ञानार्थतेति को ऽर्थो ऽनुमत्या ।

तस्मान्न कथञ्चिद्विचारस्य वैधत्वं सिद्ध्यतीति न तद्बलेन स्नानो-
त्कर्षः शक्यते कर्तुम् । अध्ययनमात्रेणैव समाप्ते विध्यर्थे सत्यन-
न्तरं वेदमधीत्य स्नायादितिस्मृतिबलेन स्नात्वा पश्चाज्ज्योति-
ष्टोमादिकर्मानुष्ठाने समुपस्थिते तन्निर्णयार्थमुपायान्तरालाभे च
विचारोऽपि कदा चिदनुष्ठीयेत वा न वेति नायातो धर्मजिज्ञासेति
सूत्रमानन्तर्यप्रतिपादनपरमुपपन्नं स्यात् । तस्मान्नाध्यापनविधि-
प्रयुक्तमध्ययनमिति । कश्चासावध्यापनविधिर्यत्प्रयुक्तमध्ययनम् ।
यदुच्येत उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः । सकल्पं
सरहस्यञ्च तमाचार्यम्प्रचक्षतइतिस्मृत्यनुमित उपनीयाध्यापने-
नाचार्यकं भावयेदिति एवंरूपं वचनमिति तदयुक्तम् ।

नाध्यापनमिदं वाक्यं विधातुं क्षमते यतः ।
द्रव्यार्जनार्थं प्राप्तत्वाद्यच्छब्देन च[1] संगतेः ॥२८॥

यथैवैतयाऽन्नाद्यकामं याजयेदिति याजयतेः परः श्रूयमाणोऽपि
विधिः यागविधिपर एव प्रयोजकव्यापारपरः शब्दो द्रव्यार्जनार्थ-
प्राप्तऋत्विग्व्यापारानुवाद इति स्थास्यति तथाऽध्यापयेदित्यध्य-
यनविधिपर एव नाध्यापनविधिपरः द्रव्यार्जनोपायत्वेन प्राप्त-
त्वात् । उपनयनमप्यध्ययनाङ्गमेवाध्येतृसंस्कारत्वात् । एतेनै-
वा[2]ष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेतिवचनं व्याख्यातम् ।
ननु तत्रोपनयनस्यात्मनेपदश्रवणात् आचार्यकार्थत्वमवगम्यते ।
न अकर्त्रभिप्रायत्वान्नयतेरात्मनेपदविधानस्य । अन्यथा स्वरित-
ञित इत्यनेनैवाचार्यकसाधनेऽप्यर्थे वर्तमानान्नयतेरात्मनेपदं सि-
द्ध्यतीति सम्माननेतिसूत्रमनर्थकं स्यात् । तथा चाहुरकर्त्रभिप्रा-
यार्थः पुनरारम्भ इति । तस्माद्ध्येतृसंस्कारद्वारेणाध्ययनाङ्गमेवो-

(१) यच्छब्देनार्थेति २ पु. पा. ।
(२) एवकारो नास्ति २ । ३ पु. ।

पनयनम् अनुषङ्गाद्वाजिनमिवामिक्षार्थं दध्यानयनमाचार्यकं साधयति न तु तदर्थम् । तस्मान्नाचार्यकार्थतया ऽध्यापनस्य विधायकं वचनमस्ति । किञ्च न चालौकिकमाचार्यकम् उपनीय वेदाध्यापयितुराचार्यशब्दो वाचकः पाठकादिवत् । उपनीय तु यः शिष्यमित्यपि शब्दार्थप्रतिपादनपरमेव तेनाविद्यमानत्वादध्यापनविधेर्न तत्प्रयुक्तमध्ययनम् । अथापि विद्यादानेन सुमतिर्ब्रह्मलोके महीयत इत्यादिभिर्विद्यादानात्मकत्वादध्यापनमपि फलान्तरशेषतया विहितं भवेत्तथा ऽपि तत्र सर्वत्र नियोज्याश्रवणादधिकारमात्रस्य चाध्ययने ऽपि सद्भावाद्विचारस्यावैधत्वप्रसङ्गान्नाध्यापनविधिप्रयुक्तमध्ययनम् । कश्चित् पुनराह यद्यप्यध्ययनस्य स्वाधिकारेण प्रयुक्तिः सम्भवति तथा ऽपि नासावाश्रयितुं युज्यते तथा हि ।

ज्ञानं नाध्ययनस्य स्यात् स्वमहिम्ना प्रयोजकम् ।
तत्साध्यमग्निहोत्रादि तद्द्वारेण प्रयोजकम् ॥२९॥

न ह्यर्थज्ञानं स्वयमपुरुषार्थत्वादध्ययनस्य प्रयोजकं भवितुमर्हति । ज्ञानसाध्यानि त्वग्निहोत्राद्यपूर्वाणि तद्द्वारेण प्रयोजकानि भवन्ति न तु तेषां ज्ञानमङ्गं किन्तूपकारकमात्रम्[1] । आचार्यकस्य त्वध्यापनमङ्गमेवातस्तत्स्वाङ्गद्वारेणापि प्रयोजकत्वं लभते । अग्निहोत्राद्यपूर्वाणि तूपकारकद्वारेण । न चामिक्षावदङ्गद्वारेणापि प्रयोजकत्वलाभे सत्युपकारकद्वारेण वाजिनवत्प्रयोजकत्वं युक्तमङ्गीकर्तुं तस्मादध्यापनविधिप्रयुक्तमध्ययनमिति तदयुक्तम् । यद्यपि हि ।

न ज्ञानं कर्मणामङ्गं ज्ञानस्याध्ययनं मतम् ।
अङ्गं नाध्यापनस्यैतन्न तेनातः[2] प्रयुज्यते ॥३०॥

---

(१) उपकारकमात्रत्वादिति ३ पु. पा. । (२) तेनाङ्गमिति २ । ३ पु. पा. ।

यद्यपि न कर्माङ्गं ज्ञानम् अध्ययनन्तु ज्ञानाङ्गमेव तेन प्रयुज्यमानमध्ययनं शेषिप्रयुक्तमेव भवति न त्वध्ययनमङ्गम् अतस्तेन प्रयुक्तमध्ययनमुपकार्यमात्रप्रयुक्तं स्यात् न शेषिप्रयुक्तम् । तेन शेषिप्रयुक्तत्वे सम्भवति उपकार्यमात्रप्रयुक्तत्वमयुक्तमिति सुतरां स्वाधिकारप्रयुक्तमध्ययनं नाध्यापनप्रयुक्तम् । यद्यपि ज्ञानं स्वरूपेणापुरुषार्थस्तथा ऽपि कर्मानुष्ठानौपयिकत्वात्पुरुषैरर्थ्यतएवेति पुरुषार्थत्वादध्ययनस्य प्रयोजकत्वं संभवत्याचार्यकवत् । तदपि हि स्वरूपेणानभिलषितं दक्षिणालाभसिद्ध्यर्थमेव पुरुषेणार्थ्यते । अतो यथा तस्य प्रयोजकत्वम् एवं ज्ञानस्यापि । न ह्यवश्यं स्वरूपेणैवार्थितं प्रयोजकमिति नियमः समस्ति । सुखसाधनपशुपुत्रादिवत् फलान्तरसाधनतया ऽर्थितस्य प्रयोजकत्वाविरोधात् । यद्यपि चाग्निहोत्राद्यपूर्वमेव ज्ञानद्वारेण प्रयोजकं तथापि तदेव युक्तं नाध्यापनं पुरुषान्तरगामित्वादध्येतृगाम्येव तु ज्ञानं वा तत्साध्यं वा ऽग्निहोत्रादि प्रयोजकमध्ययनस्य युक्तम् । यो ऽप्यङ्गद्वारेणाध्यापनविधेः प्रयोजकत्वमुपकारकद्वारेणाग्निहोत्रादीनामिति विशेषो ऽभिहितः सो ऽपि नास्ति । द्वयोरप्यङ्गत्वमुपकारकत्वञ्च द्वारमेव । तथा हि । अग्निहोत्राद्युपकारकत्वात्तज्ज्ञानं तदङ्गत्वाच्चाध्ययनं प्रयुङ्क्ते । आचार्यकन्त्वङ्गत्वादध्यापनं तदुपकारकत्वाच्चाध्ययनं प्रयुङ्क्ते इति क्रमभेदमात्रम् । नैतावता कश्चिद्विशेषः समानपुरुषगामित्वादग्निहोत्रादीनामेव प्रयोजकत्वं नाध्यापनविधेरिति । न चाग्निहोत्रादि प्रयोजकं ज्ञानमेव तु प्रयोजकमित्युक्तं तदेतद्विस्पष्टं प्रपञ्चयिष्यते । कथं चाचार्यकविधिः पुरुषान्तरगामी पुरुषान्तरकर्तृकमध्ययनं प्रयुञ्जीत । समानपुरुषगामिनो हि दर्शपूर्णमासादिविधयः कार्यतया प्रतीयमाना युक्तं यत्तस्यैव पुरुषस्य स्वसाधनेषु प्रयाजादिषु स्वसिद्ध्यर्थमनुष्ठानं प्रयुञ्जते । अन्य-

साध्यं तु कार्यमन्यस्य कथमिवानुष्ठापकं भवेत् न हि स्वकार्यसाधनादन्यत्र चेतनः प्रवर्तते ।

यद्यध्यापयितैवास्य स्वाधिकारप्रदर्शनात् ।
अनुष्ठापयिता तत्र स्वाधिकारप्रयुक्त[1]ता ॥ ३१ ॥

यद्युच्यते आचार्य एव स्वकार्यसिद्ध्यर्थमध्ययने माणवकं स्वाधिकारप्रदर्शनेन प्रवर्तयतीति । सत्यमेवं किन्तु तथा सति स्वाधिकार एव तत्र प्रयोजकः स्यान्नाध्यापनविधिः स्थपतीष्टेरिव स्वाधिकारः । सा ह्यनभिज्ञनिषादाधिकाराऽपि द्रव्यार्जनप्रवृत्तैर्ऋत्विग्भिरधिकारप्रदर्शनेन निषादेनानुष्ठाप्यमाना स्वाधिकारप्रयुक्तैव न द्रव्यार्जनप्रयुक्ता तथा ऽध्ययनमपि ।

पूर्वपक्षे न शक्यं स्यात् स्वाधिकारप्रदर्शनम् ।
नाध्यापनप्रयुक्तत्वमतस्तत्र प्रसिद्ध्यति ॥ ३२ ॥

भवतु वा ऽध्यापयित्रा स्वाधिकारप्रदर्शनेनाऽपि माणवकस्यानुष्ठाप्यमानस्याध्यापनप्रयुक्तत्वम् । न चैतदपि पूर्वपक्षे सम्भवति । न हि तत्र माणवकस्य कश्चिदधिकारो ऽस्ति । यत्प्रदर्शनेनासावध्याप्येत आचार्यकसिद्धिमात्रप्रयोजनत्वादध्ययनस्य पूर्वपक्षे। ननु नियोगसिद्ध्या पूर्वपक्षे ऽप्यधिकारः संभवति न अकार्यत्वात् । न हि माणवकस्य नियोगः कार्यः,येन तत्सिद्ध्या ऽधिकारः स्यात् अनियोज्यत्वात् । न ह्यनियोज्यस्य नियोगः कार्यः अतस्तत्सिद्ध्या नाधिकारसम्भवः। अथासत्यपि स्वाधिकारे सामादिनोपायान्तरेण कथञ्चिदध्याप्येत तथा सति विश्वजिदादीनामपि कथञ्चिदार्त्विज्ये प्रवृत्तैरेव ऋत्विग्भिः प्रवर्त्यमानेन यजमानेनानुष्ठानसम्भवाद् नानुष्ठानसिद्धये अधिकारसिद्ध्यर्थं नियोज्यपरिकल्पनं शक्यते। अथानर्थक्यान्नर्त्विजो यजमानमाह्व[2]यन्ति न ह्य-

१ प्रयुक्तैव इति २ पुं. पा. २ याजयन्तीति १ पु. पाठः ।

सावनधिकारी तेभ्यो दक्षिणां ददातीति तदत्रापि समानम्। न ह्य-ध्ययने ऽधिक्रियमाणो माणवको दक्षिणादानाद्याचार्यस्याचरति तल्लिप्सया ऽऽचार्यस्याचार्यकमिष्टम् । न ह्याचार्यकं पुरुषस्य स्वरूपेणाभिलषितम् । न च पूर्वपक्षे ऽध्ययनं माणवकमधिकरोतीति नाध्यापनेन प्रयुक्तिः सम्भवति। पक्षद्वयसाधारणी तत्प्रयुक्तिर्भवद्भिरिष्यते। विद्यादानेन सुमतिरित्याद्यपि पुरुषार्थज्ञानदानाभिप्रायम्। अन्यथा लौकायतिकशास्त्रार्थज्ञानदानमपि ब्रह्मलोकाय कल्पेत । न चाध्ययनस्य पूर्वपक्षे पुरुषार्थता ऽस्तीति न ब्रह्मलोकप्राप्तिफलविद्यादानविधिवशादपि तस्य प्रयुक्तिः सम्भवति । तत्सिद्धं नाध्यापनविधिप्रयुक्तमध्ययनमिति नैवं पूर्वपक्षोत्तरपक्षावुपपन्नाविति । "या ऽपि किमध्ययनस्याचार्यकमर्थज्ञानं वा प्रयोजनमिति चिन्ता साप्ययुक्ता । किमियं विधिगम्यस्य प्रयोजनस्य चिन्ता किं वा प्रमाणान्तरगम्यस्य। न तावत्प्रमाणान्तरगम्यमात्रं शास्त्रे चिन्तनीयम् उभयोश्च प्रमाणान्तरेणावगम्यमानत्वान्न चिन्तावसरः । न च विधिगम्यचिन्ता ऽपि सम्भवति न हि विधिर्नियोगार्थः" ।

तस्माद्वार्तिककारोक्ता गम्भीरा भाष्यसम्मता ।

स्वाध्यायविधिवाक्यार्थगोचरा नीतिरुच्यते ॥ ३२ ॥

स्वाध्यायो ऽध्येतव्य इत्यध्ययनावच्छिन्नभावना विधिप्रयुक्ता तव्यप्रत्ययेनाभिहिता तस्या भाव्यापेक्षायां समानपदोपात्तमप्यध्ययनमपुरुषार्थत्वादुल्लङ्घ्य पुरुषार्थरूपं किमपि भाव्यमपेक्षमाणा ऽवतिष्ठते। तत्र संदेहः । किं विश्वजिदादिन्यायेन स्वर्गो ऽस्या भाव्यः कल्प्यतामुताक्षरग्रहणादिपरम्परया साध्यमानं वाक्यार्थज्ञानमेव भाव्यमङ्गीकर्तव्यमिति ।तत्र पूर्वः पक्षः ।

" " एतच्चिन्हगतो ग्रन्थो २ पु. नास्ति ।

नार्थज्ञानार्थता युक्ता प्रमाणान्तरसिद्धितः ।
स स्वर्गः स्यादिति न्यायादतः स्वर्गार्थता भवेत् ॥३४॥

यद्यपि चाध्ययनानन्तरमक्षरग्रहणादिपदावधारणपदार्थसंवित्प्रणाडिकया वाक्यार्थज्ञानमुपजायमानं दृश्यते तच्च फलवत्कर्मानुष्ठानोपयोगितया पुरुषस्याभिलषितं शक्नोत्येव भाव्यभावमनुभवितुम् । न च दृष्टे सम्भवत्यदृष्टं कल्पयितुं शक्यमित्यर्थज्ञानार्थतैव युक्तेति बुद्धिर्भवतीति तथा ऽप्यप्राप्ते शास्त्रस्यार्थवत्त्वात्प्रमाणन्तरादेवार्थज्ञानस्याध्ययनभावनाभाव्यतासिद्धेः तादर्थ्ये विध्यानर्थक्यप्रसङ्गाद् विश्वजिन्न्यायेन स्वर्गार्थतैव युक्ता । यद्युच्येत ।

प्रमाणान्तरसिद्धे ऽपि नियमार्थो ऽवहन्तिवत् ।
उपपन्नो विधिर्नैवं क्रत्वर्थत्वाद्विना न तत् ॥ ३५ ॥

प्रमाणान्तरादेवार्थज्ञानार्थतासिद्धावप्यवघातादिवन्नियमार्थत्वाद्विधेर्नानर्थक्यमिति चेद् नैवं युक्तमक्रत्वर्थत्वादध्ययनस्य । अवघातादयो हि क्रतावेव नियम्यन्ते । अवघातेनैव निर्वर्त्यमानास्तण्डुलाः क्रत्वपूर्वं साधयन्तीति न तण्डुलस्वरूपे प्रमाणान्तरविरोधात् प्रस्थपृष्ठपेषणनखनिर्ल्लुञ्चनादिना तन्निर्वृत्तिदर्शनात् । एवमिहापि ज्ञानोत्पत्तेरन्तरेणाप्यध्ययनं पुस्तकनिरीक्षणादेरपि सम्भवाद् न तत्स्वरूपे तावन्नियमः सम्भवति । यदि परमध्ययनापादितज्ञानपूर्वकमेव क्रत्वनुष्ठानमभ्युदयाय घटतइति नियम्येत तच्च क्रत्वर्थत्वादध्ययनस्यायुक्तम् । तन्नियमार्थत्वानुपपत्तेः स्वर्गार्थतैव वरमिति । अथ निर्देशादार्थवादिकमेव फलं युक्तम् अश्रुतौ हि फलस्यानुमानं स्यात् । इह तु यं यं क्रतुमधीते तेन तेनास्येष्टं भवतीति क्रतुफलावाप्तिः । यदृचो ऽधीते पयसः कुल्याः

अस्य पितॄन् स्वधा अभिवहन्ति पयआहुतिभिरेव तद्देवांस्तर्पयति ते पितरो देवाश्चैनमध्येतारं तृप्ता आयुरादिभिस्तर्पयन्तीति आयुरादिप्राप्तिः । "यस्तु सम्यग्द्विजो ऽधीते स्वाध्यायं शक्तितो ऽन्वहम् । आहैव स नखाग्रेभ्यः परमं तप्यते तप" इति तपःफलप्राप्तिरपि श्रूयेत एव । तस्मान्न स्वर्गार्थता युक्तेति । अत्र ब्रूमः ।

आद्ये त्वध्ययने नैव का चिदस्ति फलश्रुतिः ।
धारणे जपयज्ञे च फलश्रुतिरियं यतः ॥ ३६ ॥

क्रतुफलायुरादिप्राप्तिस्तावज्जपयज्ञाध्ययनगोचरा धारणाध्ययनगोचरा तु तपःफलप्राप्तिः । आद्ये तु स्वीकरणाध्ययने न किञ्चित्फलश्रवणमस्ति यतो निर्देशादश्रुतानुमानं न क्रियेत । चोदकादपि शब्दभावनेतिकर्तव्यताभूतं प्राशस्त्यमात्रं लभ्यते न त्वायुरादिस्वरूपम् । तस्मात् स्वर्गार्थत्वादध्ययनस्यानुवचनमात्रेणैव विचारमन्तरेणैव स्वाध्यायाध्ययनलक्षणशास्त्रार्थसमाप्तेर्न तद्वशेन स्नानोत्कर्षः शक्यते वक्तुम् इत्यध्ययनानन्तरं वेदमधीत्य स्नायादिति स्मृत्यनुमितश्रुतिवचनबलेन स्नात्वा पश्चात्प्रयोजनवशेन विचारयतु मा वा न त्वन्यार्थादध्ययनात्प्रतीयमानो ऽर्थो न विवक्षित इति कथं विचाराभ्यनुज्ञा । नैष दोषः । अर्थप्रतिपादकस्याप्यदृष्टार्थाध्ययनसम्भवात् । यथा तावत् सिद्धान्त एव याजयित्वा प्रतिगृह्य चानशनास्त्रिः स्वाध्यायं वेदमधीयीतेति प्रायश्चित्तार्थे ऽप्यध्ययने विहिते न वेदस्याविवक्षितार्थता ऽऽपद्येत तथा स्वर्गार्थे ऽप्यध्ययने द्रष्टव्यम् । न ह्यर्थप्रतिपादनसमर्थस्य वाक्यस्य कदा चिददृष्टार्थमुच्चारणं कृतमित्येतावता स्वाभाविकमर्थपरत्वं हीयते । तत्सिद्धं नाध्ययनानन्तरं धर्मजिज्ञासा कर्तव्येति अत्रोच्यते ।

दृष्टप्रयोजनाभावे ह्यदृष्टं परिकल्प्यते ।
दृष्टमेव त्विह ज्ञानं विधेश्च नियमार्थता ॥ ३७ ॥

यद्यप्यध्ययनस्यार्थज्ञानार्थता प्रमाणान्तरसिद्धा तथाऽपि न विधेरानर्थक्यं नियमार्थत्वात् ।

अक्रत्वर्थतया यत्तु नियमार्थत्ववार[1]णम् ।
तत्प्रयोजनमात्रत्वान्नियमस्य न दूषणम् ॥ ३८ ॥

यदि हि वाक्यार्थ एव नियमः स्यात्ततो ऽर्थज्ञानस्वरूपे नियमायोगात् क्रतौ चातदर्थस्यानियमान्न नियमार्थता ऽवकल्पते न त्वेतदस्ति । अप्राप्तविधिरेवायम् । यावद्धि फलवत्कर्मानुष्ठानोपयोगिज्ञानोपायतया ऽध्ययनाद्यनुष्ठानं नोत्प्रेक्षितं तावद्द्विजातीनामुपनीतानां तत्प्रक्रमाधीतया स्वध्यायो ऽध्येतव्य इति प्रत्यक्षश्रुत्या ऽध्ययनं विधीयते श्रुतेर्लिङ्गाच्छीघ्रं प्रवृत्तेः । विहिते तु तस्मिंस्तदापादितज्ञानैरेव लब्धानुष्ठानान्युत्तरकर्माण्यवैधत्वादभावः कर्मणि स्यादित्यनेन न्यायेन विद्वांसमधिकृत्य प्रवृत्तानि न तस्य ज्ञानसिद्ध्यर्थमुपायान्तरमाक्षिपन्तीति फलतो नियमभाषा । तद्यथा रशनादानमन्त्रस्य लिङ्गादेवाश्वरशनाङ्गत्वे सिद्धे ऽपि प्रत्यक्षश्रुतिविनियोगः परिसंख्याफलम् । न हि तत्र परिसंख्या वाक्यार्थ एव स्वार्थहानादिप्रसङ्गात् । श्रुतेश्च पूर्वं लिङ्गेन गर्दभरशनायामप्राप्तेः । अतो ऽप्राप्तविधिरेव फलतः परिसंख्यावाचोयुक्तिः । एवमध्ययनविधावपि नियमवाचोयुक्तिर्द्रष्टव्या । न चैतावता ऽध्ययनस्य क्रत्वर्थत्वप्रसङ्गः तदापादितमर्थज्ञानं क्रत्वङ्गम् । अध्ययनन्तु ज्ञानाङ्गमेव । यथाऽऽधानसाध्यानामग्नीनां क्रत्वर्थत्वे ऽपि नाधानस्य द्रव्यस्याकर्मकालनिष्पत्तेः प्रयोगस्यातदर्थत्वमिति न्यायेन क्रत्वर्थत्वमेवमिहापि द्रष्ट-

[1] कारणमिति १ पु. पा. ।

व्यम् । एकदेशिभिरपि चाध्ययनविधिगोचराध्यापनविधिप्रयुक्ताध्ययनसम्पादितमेव ज्ञानमुत्तरकर्माङ्गमित्यभ्युपगन्तव्यम् । अन्यथा यः कश्चिच्छूद्रो ऽपि वैयात्यादध्ययनेनोपायान्तरेण वा क्रत्वर्थं ज्ञानं सम्पादयेत् तस्यानिवार्यो ऽधिकारः स्यात् । तेनाध्ययनविधिविहितोपनीतकर्तृकव्रतनियमादीतिकर्तव्यतोपेताध्ययनसम्पादितज्ञानवतामेवोत्तरकर्मस्वधिकारः । तथा सत्यपि नाध्ययनस्य क्रत्वर्थत्वमिति । इदं तावदेकदेशिनामस्माकं च तुल्यमेव । अध्ययनन्तु स्वविधिप्रयुक्तमाचार्यककरणविधिप्रयुक्तं वेत्यत्र विवादः । तेनाप्रकरणाधीतत्वान्नापूर्वीयज्ञानार्थतया ऽध्ययनविधानं येन क्रत्वर्थं स्यात् किं त्वध्ययनापादितं ज्ञानं क्रत्वर्थम् इति ।

तत्सिद्धं नियमार्थत्वान्नानर्थक्यं विधेर्भवेत् ।

तेन दृष्टार्थतालाभादर्थज्ञानार्थता स्थिता ॥ २९ ॥

कथमिदानीमनर्थकानां हुंफडादीनामध्ययनमर्थज्ञानार्थं, कथं च क्षत्रियाद्यधिकाराश्वमेधादिप्रतिपादकस्य वेदभागस्य ब्राह्मणादिभिरर्थज्ञानार्थमध्ययनम् । यद्यपि कथञ्चिद् ब्राह्मणस्य याजनोपयोगिज्ञानार्थमध्ययनं सम्भाव्येत तथाऽपि क्षत्रियवैश्ययोर्वैश्यस्तोमाश्वमेधाध्ययनमनर्थकमेवादृष्टार्थं वा । कथञ्च निषेधवाक्येषु नावगुरेन्न हन्यादित्यादिषु नियमवर्णनम् । यदि तावदध्ययनापादितज्ञानवत एवावगोरणाद्यनुष्ठानं प्रत्यवायकरं नान्यस्येति कल्प्यते तथा सत्यनिष्टफलत्वमेवाध्ययनस्य स्यात् । को हि नाम प्रत्यवायफलकं निषेधवाक्यार्थज्ञानमिच्छेद् यस्तदर्थमध्ययनमनुतिष्ठेत् । अथ निषेधे ऽननुष्ठानस्य शास्त्रार्थत्वात्तद्विषय एवायं नियम इति अध्ययनपूर्वकज्ञानवत एवाननुष्ठानं प्रत्यवायपरिहाराय भवति इतरेषान्त्वननुष्ठाने ऽपि नैवासौ परिह्रियतइति

तथा सत्यनधीतवेदानामननुष्ठाने प्रत्यवायस्यावश्यकत्वाद् अनुष्ठाने ऽपि तस्य तावत्त्वाद्यथाकामं निषिद्धानुष्ठानं स्यात् । न चैतदिष्टम् । अहिंसादीनां सर्ववर्णसाधारणत्वात् । तस्मान्न तत्र नियमोपपत्तिः । कथञ्च स्वाध्यायाध्ययनवाक्ये नियमः । न हि तदर्थानुष्ठानं तदध्ययनपूर्वकं सम्भवति अध्ययनमेव हि वाक्यार्थः । कथञ्चाध्ययनपूर्वकमध्ययनं सम्भवति आत्माश्रयदोषप्रसङ्गात् । अथैवमादिष्वदृष्टार्थमध्ययनं तथा सत्यवैरूप्यात्सर्वत्रैव तथा प्रसज्येत । तस्मान्नार्थज्ञानार्थमध्ययनमिति । अत्राभिधीयते ।

न केवलार्थविज्ञानसिद्धिरस्य प्रयोजनम् ।
अपेक्षितं दृश्यते यत्सर्वं तत्फलमिष्यते ॥ ४० ॥

यदि ह्यध्ययनस्य केवलमर्थज्ञानं प्रयोजनमस्माभिरिष्यते ततो यथोदाहृतेष्वेषु तदसम्भवादुपालम्भः स्यात् न तु केवलं तत्प्रयोजनम् । यदेव हि विध्यन्तरोपयोग्यपेक्षितमध्ययनेन साध्यमानं दृश्यते तत्सर्वमस्य प्रयोजनम् । तेन यथा क्रतुविधिभिस्तज्ज्ञानमपेक्षितमिति तत्प्रयोजनम् एवं नित्यनैमित्तिकजपयज्ञपारायणादिविधिभिरहरहः स्वाध्यायो ऽध्येतव्यो याजयित्वा प्रतिगृह्य चानश्नंस्त्रिः स्वाध्यायं वेदमधीयीतेत्यादिभिर्वेदस्वरूपावधारणमपेक्षितव्यमिति तदपि प्रयोजनम् । तेनाध्ययनोपात्तस्य वेदस्य यथायोगं प्रयोजनकल्पनात्तदनुरोधेन च नियमवर्णनाज्ज्योतिष्टोमादिष्वध्ययनार्जितेनैव वेदेन विज्ञातः क्रतुः फलं साधयतीति नियमः । मन्त्रेष्वध्ययनोपात्तमन्त्रकृतमेव स्मरणमनुष्ठानाङ्गमिति । द्रुमादिष्वध्ययनोपात्तैरेव गीतिकालोपलक्षणं भवतीति । स्तोत्रशस्त्रजपमात्रोपयोगिषु च तदुपात्तैरेव स्तोत्रादि कार्यमिति । निषेधवाक्येषु च ब्राह्मणादीनां चाश्वमेधादिषु जपयज्ञादिमात्रोपयोगिष्वध्ययनोपात्तैरेव जपयज्ञादि कर्तव्यमिति । आह

च यत्र तावद् गुरुसकाशादध्ययने विचारस्तत्र साधारणजपयज्ञ-क्रतुज्ञानसिद्धिनिराकाङ्क्षत्वान्न कश्चित्फलान्तरकल्पनावसर इति। अध्ययनविधौ तु तद्विधेयस्याध्ययनस्य करणांशाध्ययनपूर्वकत्वमात्माश्रयदोषप्रसङ्गान्न सम्भवतीति तद्विधेयस्यैव विचारस्येतिकर्तव्यताभूतस्य भवति तत्पूर्वकत्वानियमः । अध्ययनोपात्तेनैवाध्ययनविधिना विचारस्य कर्तव्यतामवगम्य विचारोऽनुष्ठातव्य इति। अत एवाध्ययनविधिनैव विचारस्य कर्तव्यतां विचारानुष्ठानात्प्रागेवावगन्तुं शास्त्रादावध्ययनविधिवाक्यार्थविचारः कृतः। अर्थवादेष्वध्ययनोपात्तैरेवार्थवादैः प्रचारोचितं कर्मानुष्ठातव्यमिति। उपनिषत्सु यानि क्रतूपयोगिकर्तृभोक्तृरूपात्मप्रतिपादकानि वचनानि तैरध्ययनोपात्तैरेव भूतभौतिकसंघातातिरिक्तं सांपरायिकफलोपभोगयोग्यमात्मानं ज्ञात्वा क्रतुरनुष्ठेय इति । यानि त्वकर्तृभोक्तृरूपात्मप्रतिपादकान्ययमात्माऽपहतपाप्मा विरजो विमृत्युरित्येवमादीनि तेषु ज्ञानस्य स्वयमेव सर्वांश्च कामानाप्नोति न स पुनरावर्तते इत्यादिप्रदर्शिताभ्युदयनिःश्रेयसफलत्वादध्ययनोपात्ताभिरेवोपनिषद्भिः सम्पादितमात्मज्ञानमभ्युदयनिःश्रेयसफलकं भवतीति नियमः । सर्वश्चायं नियमः फलत एव सम्पन्नः न तु वाक्यार्थ एवेति द्रष्टव्यम् । न चैवं नानाप्रयोजनाङ्गीकरणाद्वैरूप्यमध्ययनविधेर्मन्तव्यम् । स्वाध्यायसंस्कारभूतेनाध्ययनेन यच्छक्यतेऽपेक्षितं संपादयितुं तत्कुर्यादित्येकयैव वचनभङ्ग्या सर्वार्थलाभेन वैरूप्याभावात् । यदि ह्यध्ययनं स्वाध्यायद्रव्यकं कदा चित् स्यात् प्रधानं कर्म कदा चिच्च स्वाध्यायसंस्कारस्तदा स्वाध्यायोऽध्येतव्य इति पदद्वयार्थयो(१)र्गुणप्रधानभावाद्वैरूप्यं स्यात्।न त्वेतदस्ति सर्वथैवाध्ययनस्य स्वाध्यायप्रधानत्वात् । कश्चित्त्वाह न संस्कारत्वमध्ययनस्योपपद्यते. स्वा-

(१) पदार्थयोरिति १ पु॰ पा॰

ध्यायस्य भूतभाव्युपयोगाभावात् । न हि तस्यार्थज्ञाने विनियोजकं किञ्चिदस्ति । न चाध्ययनविधिरेवास्य विनियोजक इति युक्तं संस्कारविधित्वात् । सक्तुसंस्कारहोमविधिवत् "सक्तून् संस्कार्यं विनियुङ्क्ते तेन नाध्ययनसंस्कारार्थत्वं संभवति" ।

तदेतद्भाष्यवार्तिकपरिश्रमविधुरस्यापन्यायशिक्षातमिस्रातिरस्कृतविवेकस्य मीमांसान्यायसौक्ष्म्यानभिज्ञस्यानुपासितगुरोर्मातुः प्रियस्य यत्किञ्चित्प्रलपितम् । तथा हि ।

स्वाध्यायमात्रपर्यन्ते विनियोगे भवेदयम् ।
दोषो ऽर्थज्ञानपर्यन्ते सति सामादिवद्भवेत् ॥ ४१ ॥

यदि हि अध्ययनस्य स्वाध्यायसंस्कारमात्रपर्यन्तो विनियोगः स्यात्तदा ऽयं दोषः स्यात् । यदा त्वध्ययनस्याक्षरग्रहणादिपरंपरया ऽर्थज्ञानसाधनस्य दृष्टसामर्थ्यानुसारेण तत्पर्यन्त एव विनियोगस्तदा ऽनेनैव विधिना स्वाध्यायस्याप्यर्थज्ञाने विनियोगो लभ्यते । तत्संस्कारद्वारेणैव तस्यार्थज्ञानजननसामर्थ्यात् किमिति पुनस्तन्मात्रे पर्यवस्यति । तत्तदपि द्वारीकृत्य क्रत्वनुष्ठानं फलं वा यावन्न गच्छति न अन्यत एव सिद्धत्वाज् ज्ञानस्य फलवत्क्रत्वनुष्ठानाङ्गत्वं सामर्थ्यादेव नियमेन सिद्धमिति न तत्र स्वाध्यायविधेर्नियमेन व्यापारः । अध्ययनादि तु ज्ञानपर्यन्तं न नियमतः सिद्धमिति भवति तत्र विधेरर्थवत्ता । तेन ज्ञानप्रयुक्तमध्ययनं न तु क्रतुप्रयुक्तमिति तेनाध्ययनेन यथादृष्टसामर्थ्येनार्थज्ञानं कुर्यादित्युक्ते अयमर्थः संपद्यते अधीतेन स्वाध्यायेनार्थं जानीयादिति । अत एवार्थज्ञानं प्रत्युपादेयतया स्वाध्यायस्य संस्कार्यत्वाविवक्षा शाखान्तराऽधिकरणे दर्शिता । तद्यथा साम्नः

" " एतच्चिन्हगो ग्रन्थः १ पुस्तके न संस्कार्यं विनियोक्तुमर्हतीति तेन नाध्ययनसंस्कारार्थत्वं संभवतीत्यस्ति । २ पुस्तके तु सक्तून् न संस्कार्यमित्यादि ।

स्तुतौ विनियुक्तस्यापि स्वाभाविक्यक्षरसंस्कारता न हीयते तद्द्वारेणैव स्तुतिसाधनत्वात् । न हि तत्र ऋचां वाक्यान्तरेण स्तुतौ विनियोगो ऽस्ति अथ च तत्संस्कारकत्वमेव साम्नो भवति। तथा स्थलनिष्पत्तावविनियुक्ते ऽपि चरौ चरुमुपदधातीत्यनेनैव चरूपधाने स्थलाङ्गतया विनियुक्ते तस्य स्वयं स्थलनिर्वर्तकत्वाभावादुपहितेन चरुणा तन्निर्वृत्तिदर्शनात्तद्द्वारेण चरूपधानस्यापि दृष्टार्थत्वे सम्भवत्यारादुपकारकत्वकल्पनायोगाच्चरोः स्थलाङ्गत्वमुपधानस्य च तत्संस्कारकत्वं भवति। अत एवञ्जातीयकं स्वभावतः संस्काररूपमपि पूर्वविनियुक्तसंस्कार्योद्देशेनाविधानात्कदा चिदर्थकर्माभिधानमपि लभते। अनेनैवाभिप्रायेणोक्तमर्थकर्मण्यपि चोपधानं प्रति प्राधान्यमस्त्येवेति न तु परमार्थतो ऽर्थकर्म सामवदेव अतः संस्कारकर्म संस्कार्यं त्वनेनैव विनियुक्तं कार्यस्याङ्गमिति।एतेन ऋचां स्तुतावविनियोगादनङ्गत्वमभिदधाना उपेक्षणीयाः । तत्सिद्धं नाध्ययनविधेर्वैरूप्यमिति । नन्वसत्यपि वैरूप्ये[1] नानाप्रयोजनकल्पनमयुक्तम्।एकं वा चोदनैकत्वादिति न्यायात्[2] । स्यादेतत् यदि कल्पनीयं स्यात् क्लृप्तमेव तु तत्।यथोक्तं बहुप्रयोजनसाधनत्वमध्ययनस्य स्वभावतः ततश्चाध्ययनेन स्वाध्यायद्वारं यदपेक्षितं शक्यते संपादयितुं तत्सम्पादयेदित्येकप्रयत्नेनैव सर्वार्थत्वलाभान्न किं चिद्गौरवं वैरूप्यं वा।अत एव विधायकानामपि समिदादिवाक्यानां स्मारकत्वमभ्युपगम्यते यत्र मन्त्रः स्मारको न विद्यते शक्यते हि विधायकैरपि सम्बन्धिदर्शननिमित्तं स्मरणं संपादयितुम् । अस्मिंश्चांशे स्वाध्यायविधिविहितस्य वाक्यक्रमस्यैवंक्रमकैरेव वाक्यैः पदार्थाः स्मर्तव्या इति । न हि विधौ तेषां क्रमेण कार्यमस्ति स्म-

(१) अत्र मानाभावादिति १ पु. अधिकमस्ति ।
(२) चोदनैकवाक्यत्वादिति २ पु. पाठः ।

रणन्तु कुर्वतामेषां क्रमः स्मरणे क्रममाधाय स्मार्यपदार्थानुष्ठानक्रमं फलतीति भवसङ्गम्।

तदेतत् सूत्रकारेण पञ्चमे स्पष्टमीरितम्।
क्रत्वेकत्वे परार्थत्वात्तद्व्याख्याभाष्यकृत्स्वयम् ॥४२॥

क्रत्वेकत्वे परार्थत्वादित्येतत्सूत्रं व्याचक्षाणो भाष्यकारो वक्ष्यति परार्थो हि वेदः यदनेन शक्यते कर्तुं तस्मा एष समाख्यायते शक्यते चानेन पदार्थोऽभिधातुं शक्यते च क्रियाकाले प्रतिपत्तुं तस्माद्वेदः पदार्थाश्च ज्ञातुमुपादेयाः क्रियाकाले च प्रतिपत्तुं न च गम्यते विशेषे विधातुमयं समाम्नायते न प्रतिपत्तुमिति अनवगम्यमाने विशेषे उभयार्थमुपादेय इति गम्यते तत्र प्रतिपत्तुं चानेन क्रमेण शक्यते नान्येनेति। यत्र तु मन्त्रो विद्यते तत्र तस्यानन्यार्थत्वाद्विधायकस्य तु विधानेनापि कृतार्थत्वान्मन्त्रस्यैव स्मारकत्वम्। अत एव तत्र मन्त्रक्रमेणैव पदार्थानुष्ठानं न विधिक्रमेण तत्र ब्राह्मणक्रमो जपयज्ञादावुपयुज्यते तथा क्रत्वन्तरप्रतिपादकानामपीत्यलमतिविस्तरेण। तत्सिद्धं दृष्टार्थत्वेऽप्यध्ययनविधेर्नियमार्थत्वादानर्थक्याभावादर्थज्ञानार्थमध्ययनम्। न चायं नियमो यत्क्रत्वर्थेष्वेव नियमविधिरिति पुरुषार्थेष्वपि द्रव्यार्जनादिषु नियमविध्यभ्युपगमात्। तेन तद्वन्नियमविधिरर्थवानेव। फलत एव तु पूर्वोक्तनीत्या नियमं न्यायविदो वदन्ति। तस्माज्जपयज्ञपारायणक्रतुज्ञानसिद्धिप्रयोजनमध्ययनम्। अत एव नित्यम्। तत्फलस्य कर्माधिकारस्यावश्यकत्वात्। असति तस्मिन्नित्यनैमित्तिकाननुष्ठानेन प्रत्यवायात्। सर्वस्यापि वेदस्याध्ययनमावश्यकपारायणाद्युपयोगित्वादावश्यकमेव। तथा चानधीतवेदस्यानधिकाराच्छूद्रवद्भावं स्मरन्ति यो ऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्। स जीवन्नेव शूद्रत्वमाशु गच्छति

सान्वयः। स शूद्रेण समस्तावद्यावद्वेदे न जायते इत्यादिभिः। तस्मादर्थज्ञानार्थत्वादध्ययनस्य तस्य च विचारमन्तरेणासम्भवात्तदनन्तरं धर्मजिज्ञासा कर्तव्येति सिद्धम् ॥

आचार्यमतमाश्रित्य श्रीमद्यज्ञात्मसूनुना ।
पार्थसारथिमिश्रेण प्रयुक्तितिलकः कृतः ॥ ४३ ॥

इति महामहोपाध्यायपार्थसारथिमिश्रेण विरचितायां न्यायरत्नमलायामध्ययनविधिचर्चा समाप्ता ॥

विज्ञानस्य प्रमाणत्वं स्वतो निर्णीयते यथा ।
परतश्चाप्रमाणत्वं तथा न्यायो ऽभिधीयते ॥१॥

स्वतः सर्वप्रमाणानामित्यारभ्य स्वतःप्रामाण्यं परतश्चाप्रामाण्यमाचार्यैर्निबद्धम् । तत्र व्याख्यातारो विवदन्ते स्वशब्दः किमात्मवचन आत्मीयवचनो वा । तथा प्रामाण्यं किं स्वतो भवति किं वा भाति[1] । तथा प्रामाण्यं नाम किम् अर्थतथात्वं किं वा तथाभूतार्थनिश्चायकत्वमिति । तत्र च ।

आत्मवाची स्वशब्दो ऽयं स्वतो भाति प्रमाणता ।
अर्थस्य च तथाभावः प्रामाण्यमभिधीयते ॥ २ ॥

तत्र केचित्तावदाहुः प्रामाण्यं नामार्थाव्यभिचारित्वं तथाभूतार्थविषयत्वमिति यावत् । तच्च ज्ञानानां स्वत एव जायते[2] । स्वशब्दो ऽयमात्मीयवचनः स्वीयादेव कारणात्तथाभूतार्थविषयत्वं ज्ञानस्य जायते न गुणात् । अप्रामाण्यन्त्वयथार्थविषयत्वलक्षणं न स्वीयादेव कारणाज्जायते अपि तर्हि तद्गताद्दोषादिति परत इत्युच्यते। यदि हि सत्यार्थविषयता गुणनिमित्ता स्यात् स्वकारणदोषात् त्वसत्यविषयतैव। तथा सति दोषयुक्ताद्गुणहीनादिन्द्रियादेः पीतशङ्खादिज्ञानेषु न किंचित्सत्यं गम्येत गम्यते तु तत्रापि शङ्खस्वरूपादिकं सत्यम्। दोषाधीने त्वस्यायथार्थत्वे स्वकारणाधीने सत्यविषयत्वे सत्युभाभ्यां मिलिताभ्यां जायमानं सत्यासत्यार्थविषयकं भवतीत्युपपन्नम्। तस्मात्स्वीयात्कारणाद्यथार्थत्वलक्षणं प्रामाण्यं जायते न तु भाति। न हि ज्ञानमात्मानमात्मीयं वा प्रामाण्यमवगमयति अर्थप्रकाशमात्रोपक्षीणत्वात् । परतस्तु कारणदोषादयथार्थत्वलक्षणमप्रामाण्यमिति दोषाभावाद्भेदस्य

---

(१) किं वा स्वतो भातीति १ पु. पा.

(२) एतदग्रे आत्मीयात्कारणादित्यधिकः पा. १ पु. वर्तते ।

यथार्थत्वमिति। अस्मिंस्तु पक्षे जाते ऽपि यदि विज्ञानइत्यादिना ऽनवस्थाप्रसङ्गेन परतःप्रामाण्यदूषणं न घटते। गुणज्ञानाधीने हि प्रामाण्ये स्यादनवस्था। गुणस्वरूपायत्ते त्वनवगता एव गुणा इन्द्रियवज्ज्ञानप्रामाण्यं जनयन्तीति नानवस्थापत्तिः। तथा "दोषाभावो गुणेभ्यश्चेन्ननु सैवास्थितिर्भवे"दिति चोदयित्वा "तदा न व्याप्रियन्ते तु ज्ञायमानतया गुणा"इति परिहरन् परपक्षे गुणज्ञानादेव प्रामाण्यं न गुणस्वरूपादिति दर्शयति। तथा

"तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता।
अर्थान्यथात्वहेतूत्थदोषज्ञानैरपोद्यते"

इति वदन् सिद्धान्ते दोषज्ञानादेवाप्रामाण्यं न दोषस्वरूपादिति व्यक्तमेवाह। तथा "ऽपरे कारणोत्पन्नगुणदोषावधारणा"दित्यादयो बहवः श्लोका अस्मिन् पक्षे न संगच्छन्ते अतो न वार्तिककाराभिमतो ऽयं पक्षः। अन्ये त्वाहुः अनधिगततथाभूतार्थनिश्चायकत्वं प्रामाण्यम् तच्च ज्ञानानां स्वत एव जायते स्वशब्दश्चायमात्मवचनः ज्ञानस्वरूपादेव तथाभूतार्थनिश्चयो जायते न गुणज्ञानात्संवादज्ञानादर्थक्रियाज्ञानाद्वा अनवस्थाप्रसङ्गात्। अर्थान्यथात्वनिश्चयस्तु परतो दोषज्ञानादर्थान्यथात्वज्ञानाद्वेति परत इत्युच्यतइति। अस्मिन्नपि पक्षे स्वतः प्रामाण्यं जायते न तु ज्ञायते। अत्रेदं वक्तव्यम् यदि प्रामाण्यस्य जन्मनि स्वयमेव कारणं ज्ञानं तथा सत्यप्रामाण्यस्यापि जन्मन्येव दोषज्ञानबाधकज्ञानयोः कारणत्वं वक्तव्यं तत्र कस्याप्रामाण्यं कारणदोषज्ञानाद्बाधकज्ञानाद्वा जायते न हि शुक्तौ रजतज्ञानस्य बाधकादिजन्यमप्रामाण्यम् उत्पत्तावेव तस्याप्रमाणत्वात्। अतथाभूतार्थनिश्चयो ह्यप्रामाण्यं तच्चाप्रमाणज्ञानं स्वत एव भवतीति न तद्बाधकज्ञानादिकमपेक्षते। न ह्युत्पत्तौ प्रमाणं सत् पश्चाद्बाधकेनाप्रमाणीक्रियते अपि तूत्पत्तावेवंभूतमप्रामाण्यं बाधकेन

व्याप्यते न त्वर्थस्यान्यथाभावाभावनिश्चयो बाधकेनैव जन्यते सत्यं न तु तदेवाप्रामाण्यं न ह्यर्थान्यथाभावनिश्चयः पूर्वज्ञानस्याप्रामाण्यं किन्तु वस्तुतो ऽर्थस्यान्यथाभावः अन्यथाभूते वा तथाभावनिश्चायकत्वं नैतदुभयमपि बाधकजन्यम्। स्वत एवार्थस्यान्यथाभावात् स्वत एव चाप्रमाणज्ञानादन्यथाभूते ऽर्थे तथात्वनिश्चयात्। तथा चाप्रामाण्यमपि स्वत एवोत्पद्येत।

"तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता।
अर्थान्यथात्वहेतूत्थदोषज्ञानैरपोद्यते" ॥

इति श्लोको ऽपि भवता इत्थं व्याख्येयः। बुद्धेः स्वतो जातं प्रामाण्यं पश्चादपोद्यतइति तच्चायुक्तम्। उत्पत्तावेवाप्रमाणत्वात्। अथ निश्चायकत्वं प्रामाण्यं तदभावो ऽप्रामाण्यं तच्च बाधकेन निराक्रियतइति मतं तदयुक्तम्। न हि बाधकेन निश्चयस्य विनाशः क्रियते तस्य स्वत एव विनश्वरत्वात् तस्मादेवं वक्तव्यम्।

बुद्धेः स्वीयं प्रमाणत्वं स्वत एवावगम्यते।
परतश्चाप्रमाणत्वं दोषबाधकबोधतः ॥ ३ ॥

नन्वत्रापि ग्रन्थविरोधो न्यायविरोधश्च स्यात् तथा हि। न हि विज्ञानमात्मानं गृह्णाति नतरामात्मीयं प्रामाण्यम् अर्थग्रहणोपक्षीणत्वात्। तथा च "ननु प्रमाणमित्येवं प्रत्यक्षादि न गृह्यते। न चेत्थमगृहीतेन व्यवहारो ऽवकल्पत"इति प्रामाण्याग्रहणदोषं चोदयित्वा "प्रमाणं ग्रहणात्पूर्वं स्वरूपेणैव संस्थितम्। निरपेक्षं स्वकार्येषु गृह्यते प्रत्ययान्तरै"रिति प्रमाणत्वाग्रहणमङ्गीकृत्यैव दोषप्रसङ्गं समाधत्ते तद्विरुद्ध्यते प्रामाण्यस्यात्मना ग्रहणे। तथा निश्चायकवस्तुत्वात्प्रामाण्यं जन्यते गुणैरिति निश्चयात्मकप्रामाण्योत्पादनं तु वस्तुस्वरूपत्वात्संवादकारण-

गुणज्ञानकार्यत्वेन अध्यवसानमिति पूर्वपक्षे प्रामाण्यस्य जन्मन्येव गुणानां कारणत्वमिति वदन् सिद्धान्ते ऽपि जन्मैव स्वत इति दर्शयति तस्मात्स्वतो भातीत्ययमपि पक्षो ऽनुपपन्न इति ।

अत्राभिधीयते । यत्तावदुक्तं न ज्ञानमात्मानं गृह्णाति विषयप्रकाशकत्वात् न चात्मन्यगृह्यमाणे तत्संबन्धितया प्रामाण्यं शक्यते ग्रहीतुमिति[1] । यदि वयं ज्ञानम् अहं प्रमाणमित्येवं मदीयं वा प्रामाण्यमित्येवं गृह्णातीति वदेम तदैवमुपालभ्येमहि न त्वेवमस्माभिरुच्यते यद्वस्तुतो ज्ञानस्य प्रामाण्यं यद्वशाज् ज्ञानं प्रमाणं भवति तत्प्रमाणबुद्धिशब्दयोर्भावकतया लब्धप्रामाण्यपदाभिधानीयकमात्मनैव ज्ञानेन गृह्यत इत्युच्यते । किं पुनस्तत् अर्थतथात्वमिदमेव हि ज्ञानस्य प्रामाण्यं यदर्थस्य तथाभूतत्वम् अतथाभूतविषयस्य ज्ञानस्याप्रामाण्यात् । इदमेव चाप्रामाण्यं यदर्थस्यान्यथात्वम् । तेन स्वत एव ज्ञानादर्थतथात्वरूपमात्मीयं प्रामाण्यं निश्चीयते न तु गुणज्ञानात् संवादज्ञानादर्थक्रियाज्ञानाद्वा तदवगन्तव्यम् । अप्रामाण्यं त्वात्मीयमर्थान्यथात्वरूपं स्वतो नावगम्यते न तु कारणदोषज्ञानात्साक्षादेव वा नैतदेवमिति ज्ञानादवगम्यते इत्येतदत्र प्रतिपाद्यते । आह च ।

मिथ्यैतत्सर्वविज्ञानमिति नाज्ञायि तेन हि ।
प्रमाणवद्धि तेनार्थस्तथैवेत्यवधारितः ॥
अन्यथात्वं कुतस्तस्य सिद्धे ज्ञानान्तराद्दते ।
इति । तथा
अप्रमाणं पुनः स्वार्थे प्रमाणमिव हि स्वतः ।
मिथ्यात्वं तस्य गृह्येत न प्रमाणान्तराद्दते ॥
न ह्यर्थस्यातथाभावः पूर्वेणोक्तस्तथात्ववत् ।

---

(१) ग्रहीतुमिन्द्रियादिवदिति पा. अधिको २ पु. वर्तते ।

तथात्वे ह्युपलब्धत्वान्निष्फला स्यात्पुनः प्रमा ॥
अन्यथात्वे त्वसिद्धत्वात्सावकाशं प्रमान्तरम् ।

इति। तथा विचारोपक्रमे

प्रमाणत्वाप्रमाणत्वे ज्ञानस्य स्वत एव किम् ।
अथ वैकमपि स्पष्टं स्वभावेनानिरूपितम् ॥
पराश्रयादसन्दिग्धमेकं पक्षं प्रपद्यते ।

इति वदन् प्रमाणत्वाप्रमाणत्वनिरूपणमेव हि स्वतः परतो वेति चिन्त्यतइति स्पष्टमेवाह । यत्तु

ननु प्रमाणमित्येवं प्रत्यक्षादि न गृह्यते ।
प्रमाणं ग्रहणात्पूर्वं स्वरूपेणैव संस्थितम् ॥

इति वार्त्तिकं तत्प्रमाणमस्मीत्यनेनाकारेणाग्रहणात् तथा च प्रमाणमित्येवं प्रत्यक्षादि न गृह्यतइत्याह । ननु यदि प्रामाण्यं ज्ञानोत्पत्तिसमये ऽवगम्यते यदुत्पत्तौ प्रमाणतया न चकास्ति तदप्रमाणमित्युत्पत्तावेव परिशेषान्निश्चेतुं शक्यम् विनापि कारणदोषबाधकप्रत्ययाभ्याम् इत्यप्रामाण्यमपि स्वत एवापद्येत । मैवं वोचः न हि स्वशब्दो ऽयं प्रामाण्यपरतया प्रयुक्तः प्रामाण्यादेव प्रामाण्यं भातीति नापि प्रमाणपरतया यदि हि तथा स्यात्ततो ऽप्रमाणेषु प्रामाण्यानवभासात् परिशेषसिद्धमप्रामाण्यं स्यात् । विज्ञानपरस्तु स्वशब्दः विज्ञानादेव प्रामाण्यं भातीति। ततश्चाप्रमाणज्ञानादपि प्रामाण्यमेवात्मनो ऽसदपि बोध्यतइति नाप्रामाण्यस्य परिशेषसिद्धिः अप्रामाण्यन्तु प्रतीतप्रामाण्यापवादरूपेण पश्चाद्बोध्यतइति यथा ऽऽह ।

यस्मात् स्वतः प्रमाणत्वं सर्वत्रौत्सर्गिकं स्थितम् ।
बाधकारणदुष्टत्वबोधाभ्यां तदपोद्यतइति ॥

स्थितं प्राप्तं प्रतिपन्नमित्यर्थः सर्वत्रेति न केवलं प्रमाणेषु ज्ञानमात्रे इति यावत् । तथा

अप्रमाणमपि स्वार्थे प्रमाणमिव हि स्वत इति ।

न च प्रमाणज्ञानान्यधिकृत्य चिन्तेयं प्रमाणानां प्रामाण्यं स्वतः परतो वेति किन्तर्हि यानि तावत् स्थाणुर्वा पुरुषो वेति परस्परोपमर्दकानेककोटिसंस्पर्शिज्ञानेभ्यः स्मृतिज्ञानेभ्यश्चातिरिक्तानि घटो ऽयं पटो ऽयमित्येवंरूपाणि ज्ञानानि तानि सर्वाण्यधिकृत्य चिन्तेयम् ।

सर्वविज्ञानविषयमिदं तावत्परीक्ष्यताम् ।

इत्युपक्रम्यते । यदि प्रमाणान्येव विषयीकृत्य चिन्त्येत ततो विषयस्योभयवादिसिद्धत्वाद् यान्युभयोः प्रमाणतया प्रसिद्धानि तेषां प्रामाण्यं स्वत इत्येतावत् सिद्ध्येत । ततश्च वेदस्योभयवादिसिद्धप्रामाण्याभावेन विचाराविषयत्वान्नास्य स्वतः प्रामाण्यं साधितं स्यात् । तत्र वेदप्रामाण्यानुपयोगिनी चिन्ता काकदन्तपरीक्षावदकर्तव्या स्यात् । ज्ञानमात्रं त्वधिकृत्य स्वतः प्रामाण्ये परतश्चाप्रामाण्ये साध्यमाने वेदस्यापि स्वतस्तावद्विषयतथात्वरूपं प्रामाण्यमवगतं स्यात् कारणदोषज्ञानादेरभावान्निरपवादं स्थितं भवतीति प्रयोजनवती चिन्ता । ननु नार्थतथात्वमात्रं प्रामाण्यं स्मृतेरपि तथात्वप्रसङ्गात् । सत्यम् न तावन्मात्रम् अस्मिंस्तु प्रकरणे तावन्मात्रमेव स्वतः परतो वेति चिन्त्यते । प्रमाणशब्दो ह्यधिगततया ऽननुसन्धीयमानतथाभूतार्थनिश्चायकत्ववाची तस्य भावः प्रामाण्यम् कश्च तस्य भावः प्रमाणान्तराधिगततया ऽननुसन्धीयमानत्वं तथाभावश्चार्थस्य ज्ञानस्य तन्निश्चयजनकतेति त्रितयं मिलितं प्रमाणबुद्धिशब्दयोर्वाचकं प्रामाण्यम् । तत्र यदेतदर्थस्यावगततया ऽननुसन्धीयमानत्वं तद्योग्यानुपलब्धिगम्यत्वेन न ज्ञानस्वरूपाद् गम्यते । न हि घटज्ञानं घटस्यान्यतो ऽनवगततां प्रतिपादयति । नापि गुणज्ञानादिभिस्तदवगतिः । तेन न तत्र स्वतः परतो वेति

चिन्ता यदेव तु नन्वतथाभूतमित्यनेनायथार्थत्वलक्षणमप्रामाण्य-माशङ्कितं तत्परिहारायार्थतथात्वलक्षणमेव प्रामाण्यं स्वत इति साध्यते यस्तु निश्चयात्मकप्रामाण्योत्पादनमिति ग्रन्थः सोऽप्य-विरुद्धः । तथा हि यदर्थतथात्वनिश्चायकं तदेव तद्विषयस्य निश्चयस्योत्पादकं भवति यदेव हि ज्ञेयापेक्षया ज्ञापकं तदेव ज्ञानापेक्षया जनकं भवति। निश्चयो ऽपि च प्रमाणशब्दप्रवृत्ति-निमित्तत्वात्प्रामाण्यमेव तेनार्थतथात्वलक्षणं प्रामाण्यं गुणज्ञाना-न्निश्चीयतइति प्रतिपादयतः पूर्वपक्षिणो नासंगतो निश्चयात्म-कप्रामाण्योत्पादनं तु वस्तुस्वरूपत्वात्संवादगुणज्ञानकार्यत्वेन स्व-व्यवसानमिति ग्रन्थः । यदि पुनरिदमेव साक्षादुच्यते निश्चया-त्मकं प्रामाण्यं स्वतो जायतइति तथा सत्यप्रामाण्यमपि परतो जायत इति वक्तव्यम् अन्यथा ऽस्य प्रतिपक्षत्वमेव न स्यात् । प्रामाण्यं स्वतो जायते ऽप्रामाण्यं परतो ऽवगम्यतइति । तस्मात् स्वतः परतश्च प्रामाण्यमप्रामाण्यं चावगम्यतइत्येव प्रकरणार्थः । एवं हि न्यायो ग्रन्थश्च समञ्जसो भवति ।

तदयमत्र पूर्वोत्तरपक्षसंक्षेपः। घटादघटाच्च घटज्ञानदर्शनान्न तन्मात्रेण घटो निश्चेतुं शक्यते तेनार्थक्रियादर्शनादेव तद्धेतुभू-तघटनिश्चयपुरःसरं पूर्वस्य घटज्ञानस्य घटादुत्पत्तिर्निश्चेतव्या अर्थक्रियाज्ञानन्त्वव्यभिचारात्स्वतःप्रामाण्यमर्थक्रियायां निश्चा-ययच्छक्नोति पूर्वज्ञानस्य प्रामाण्यं निश्चाययितुम् । तथा ज्ञा-नान्तरसंवादो ऽपि नार्थतथात्वाभावे घटत इति ततो ऽप्यर्थतथा-त्वनिश्चयः। तथा गुणवत्कारणजन्यं विज्ञानं यथार्थमेव भवतीति कारणगुणावधारणादपि शक्यते ऽर्थस्य तथाभावो निश्चतुम् । तस्मात्परत एव ज्ञानस्य प्रामाण्यनिश्चयो न स्वतस्तस्यार्थतथा-त्वलक्षणं प्रामाण्यं निश्चेतुं शक्यम् अनैकान्तिकत्वात्, अनि-श्चिते चार्थे नास्ति प्रामाण्यमित्यप्रामाण्यमेव ज्ञानस्य स्वतः ।

किञ्च निश्चयप्रागभावो न दोषज्ञानेन शक्यते जनयितुं निश्चयस्तु वस्तुत्वाच्छक्यते गुणज्ञानादिना जनयितुम् । तस्मात्परत एवार्थतथात्वरूपप्रामाण्यं निश्चीयतइति पूर्वः पक्षः ।

सिद्धान्तस्तु न ज्ञानमव्यभिचारमुखेनैवार्थं निश्चाययति किन्तु स्वत एव। यदि हि स्वतो निश्चेतुं न शक्नुयात्तथा सति निश्चयात्यन्ताभाव एव स्यादित्यान्ध्यमेवाशेषस्य जगतो भवेत् । न हि स्वतो ऽनिश्चितो ऽर्थः परतो निश्चेतुं शक्यते। परस्यापि तद्वदेवासामर्थ्यात्। यथा हि घटज्ञानमसत्यपि घटे दृष्टमित्यनिश्चायकं तथा ऽर्थक्रियाज्ञानमप्यसत्यामेवार्थक्रियायां स्वप्नावस्थायां दृष्टमिति न तेनापि सा निश्चेतुं शक्या नतरां तया घटनिश्चय इत्यायातमान्ध्यमशेषस्य जगतः । अथार्थक्रियाशब्देन नोदकाहरणादिकमुच्यते किन्तु ज्ञानमेव सुखात्मकं सर्वश्च सुखज्ञानं स्वात्मनि स्वत एव प्रमाणमव्यभिचारादित्युच्यते तथा सति भवतु नामार्थक्रियानिश्चयः तथापि तु न तया पूर्वज्ञानस्य शक्यं याथार्थ्यं विज्ञातुम्। अयथार्थादपि स्वप्ने चन्दनलेपादिना सुखोत्पत्तेः । अपि च गृहीताविनाभावया ऽर्थक्रियया पूर्वज्ञानविषयस्य निश्चयः अनुमानं ह्येतत्कार्यात्कारणगोचरम्, न चागृहीते सम्बन्धिनि सम्बन्धग्रहणसम्भवः। तेन सम्बन्धग्रहणसमये ऽवश्यं घटज्ञानादेव घटनिश्चयो ऽङ्गीकर्तव्यः। एवं गुणज्ञानसंवादज्ञानयोरपि वाच्यम् । न हि गुणज्ञानाद्गुणो ऽपि निश्चेतुं शक्यते किं पुनः पूर्वज्ञानप्रामाण्यम् तथा संवादो ऽपि । संवादो नाम तद्विषयं ज्ञानान्तरम् । तस्य पूर्वज्ञानात् को विशेषः येन पूर्वज्ञानानिश्चितमनेन निश्चीयते। यद्यपि वस्तुत्वाज्जन्यो निश्चयः तथापि ज्ञानेनैव जन्यते नान्येन । तस्मात्स्वत एव प्रामाण्यं परतश्चाप्रामाण्यं दोषज्ञानाद्बाधकज्ञानाद्वा निश्चेयम् । नन्ववस्तुत्वान्न दोषजन्यमप्रामाण्यं भवति अतज्जन्यं च न ततो ऽवधारयितुं शक्यम्।

उच्यते न तावन्निश्चयप्रागभावरूपमप्रामाण्यं दोषैर्गम्यतइति ब्रूमः किन्त्वर्थान्यथात्वरूपम् । तद्धि शक्यं दोषज्ञानेन निश्चेतुं दोषनिमित्तकत्वादयथार्थत्वस्य दुष्टेषु कारणेष्वयथार्थत्वदर्शनात् । वेदे ऽपि स्वतस्तावत्प्रामाण्यं दोषाभावादनपोदितं स्थितम् । कथं पुनरवगम्यते दोषनिमित्तमयथार्थत्वं न गुणाभावनिमित्तमिति सर्वत्र हि गुणविधुरेषु दुष्टेषु च कारणेषु अयथार्थत्वं ज्ञायते तत्र कुतो ऽयं विवेकः दोष एव निमित्तं न गुणवैधुर्यमिति[1]। तस्माद्यद्यपि परत एवाप्रामाण्योपलक्षणं तथापि गुणाभावादेवोपलक्षणसंभवाद्वेदे चाप्तप्रणीतत्वगुणायोगात्स्वरसप्राप्तप्रामाण्यस्यापि वेदस्य परत एव गुणाभावादप्रामाण्यमापद्यतइति । तदभिधीयते दृष्टानुसारिणी हि कल्पना भवति न दृष्टवैपरीत्येन । तेन वेदस्य स्वत एव प्राप्तं प्रामाण्यं यथा न विरुद्ध्यते तथा चैतत्कल्पयितुं शक्यते ततो विरुद्धं न कल्पयितुं युक्तम् । तेन यद्यपि प्रसिद्धेष्वयथार्थज्ञानेषु गुणाभावो दोषाश्च दृष्टाः[2] तथापि वेदे गुणाभावे ऽपि प्रामाण्यदर्शनात्तन्मा बाधीति दोषनिमित्तमेवायथार्थत्वं शुक्तिरजतादिज्ञानानां कल्प्यते । अन्यथा हि ज्ञानत्वनिबन्धनमप्ययथार्थत्वं कल्प्येत सर्वेष्वप्रमाणेषु ज्ञानत्वदर्शनात् तत्र यथार्थेष्वपि प्रत्यक्षादिषु ज्ञानत्वदर्शनान्न तन्निमित्तमयथार्थत्वम् एवं गुणाभावो ऽपि यथार्थो वेदे दृष्टत्वान्नायथार्थत्वस्य निबन्धनम् । असिद्धं तस्य यथार्थत्वमिति चेत् प्रत्यक्षादीनां वा कुतः सिद्धम् । स्वत इति चेत्तद्वेदे ऽपि समानमन्यत्र नास्तिक्याभिनिवेशात् । तस्मान्न तन्निबन्धनं प्रामाण्यम् । अपि च शुक्तिकारजतादिज्ञाने गुणाभावे ऽपि शुक्लभास्वरत्वादिरूपाणां तथाभूतानामेव दर्शनान्न गुणायत्तं यथार्थत्वं ज्ञानस्य । यदि तु

---

१ गुणवैधुर्यनिमित्तमिति १-२ पु. पाठः ।

२ दोषाश्च द्वयं दृष्टमिति १-२ पु. पाठः ।

स्वकारणादेव यथार्थत्वं दोषाच्चायथार्थत्वमिति तथा सति शुक्तिकारजतादिज्ञानानि स्वकारणवशाद्दोषाच्च तथाभूतं शुक्लत्वादि अतथाभूतं च रजतत्वादिकं गोचरयन्तीत्युपपन्नं भवति तस्मात्स्वतः सिद्धं प्रामाण्यं सर्वज्ञानानां तच्च वेदस्यानपोदितमिति सिद्धम् ।

पार्थसारथिमिश्रेण स्वतःप्रामाण्यनिर्णयः ।
व्याख्याविवादसंजातमोहव्यावृत्तये कृतः ॥ ४ ॥

विधितत्त्वे विमन्यन्ते बहुधा वादिनो यतः ।
अतो वार्तिककारीयैः क्रियते तत्र निर्णयः ॥ १ ॥

कः पुनरयं विधिः । के चिदाहुः प्रमाणान्तरागोचरो लिङादिशब्दमात्रालम्बनः कार्यात्मा यागादिभावार्थगोचरः स्वर्गकामादिनियोज्यमात्मानं प्रेरयन्नियोगो विधिरिति । कथं पुनरेवंविधे विधौ लिङादीनां व्युत्पत्तिः । अत्राहुः । लोके तावल्लिङादिशब्दश्रवणानन्तरं प्रयोज्यवृद्धं प्रवर्त्तमानमुपलभमानो व्युत्पित्सुः पार्श्वस्थो नूनमस्य कार्यावगतिः संजाता कथमन्यथा स्वतन्त्रः प्रवर्तते ईदृशी हि मे प्रवृत्तिः कार्यावगतिपूर्विकैव सर्वदा दृष्टा अस्यापि मदविशेषात् तत्पूर्विकयैवानया प्रवृत्त्या भवितव्यम् । सा च कार्यावगतिर्लिङादिशब्दानन्तर्यात् तत्कारणिकैवेति लिङादिशब्दानां कार्याभिधायित्वं निश्चिनोति । तत्र यद्यपि प्रवृत्त्यवगमयोरेकगोचरत्वात्प्रवृत्तेश्च क्रियागोचरत्वात्कार्यावगतिरपि तद्गोचरैव लिङादिभिर्जनितेति क्रियैव कार्यात्मिका लिङादिशब्दानामर्थः न तु तदतिरेक्यपूर्वमिति बुद्धिर्भवति तथापि वेदे षष्ठाद्यसिद्धान्तरीत्या कार्यं प्रति नियोज्यत्वेन स्वर्गकामादीनामन्वय इति स्थितम् । नियोज्यश्च स उच्यते यः कार्यं ममेदं कार्यमिति बुध्यते । न चाकामसाधनं कामी कार्यतया बोद्धुमलम् । विनश्वरी च क्रिया तेन नेयं कालान्तरीयफलदानेन कामिनं रमयतीति नानया फलोपभोगार्थिनः कामिनो युक्तः संसर्गस्तेन तदन्वययोग्यं स्थास्नु कार्यं क्रियातिरिक्तं लिङादिशब्दाभिधेयं[1] निश्चीयते तच्च प्रमाणान्तरापूर्वतया ऽपूर्वमिति च स्वात्मनि पुरुषं नियुञ्जानं नियोग इति च रव्यायते। तस्मिंश्च क्रियातिरिक्ते कार्ये

१ लिङादिशब्दाभिधेयमिति १-२ पु. नास्ति ।

वाच्ये यो लोके लिङ्गादीनां क्रियायां प्रयोगः स लाक्षणिको भवति अनेकार्थत्वस्यान्याय्यत्वात् । एवञ्च नैमित्तिकनिषेधाधिकारयोरसत्यपि फलवत्त्वे ऽपूर्वमेव वाक्यार्थो भविष्यति तस्यैवाभिधेयत्वादिति। तदिदं बालसंमोहनं महेन्द्रजालोपमं वा सम्यक् न्यायौषधसंस्कृतस्वान्तानां न संमोहाय कल्पते । तथा हि ।

न कार्यावगतिः क्वापि प्रवृत्तेः कारणं मता ।
कर्तुरिष्टाभ्युपायत्वबोधात्सा सर्वदा यतः ॥ २ ॥

यत्तावत्कार्यावगतिः प्रवृत्तिकारणमिति तत्र किं तत्कार्यं किञ्च तत्र प्रमाणमिति वक्तव्यं कृतिसाध्यं प्रधानं च कार्यमित्युच्यते तत्र कृतिसाध्यत्वं तावत्कृतौ सत्यां भावादसत्यां चाभावादन्वयव्यतिरेकाभ्यामवगम्यते । प्राधान्यं तु तदुद्देशेन कृतेः प्रवृत्तिर्मानसप्रत्यक्षेणावगम्यते । कृतिर्हि पुरुषप्रयत्नः स च मानसप्रत्यक्षवेद्यो यदुद्देशेन प्रवर्तते तद्विशिष्ट एव प्रत्यक्षेणावगम्यते । सर्वो हीदमुद्दिश्याहं प्रवर्तइति प्रवृत्तिवेलायामेव विशिष्टोद्देश्यसम्बन्धिनं प्रयत्नं प्रत्यक्षेण जानातीति । प्रत्यक्षानुमानप्रमाणकं कार्यमिति चेत् किमिदानीं कृत्युद्देश्यत्वमात्रं कार्यत्वम् । यद्येवं ततो यदेव किञ्चिद्रागद्वेषलोभादिभिरनर्थरूपमर्थतयोद्दिश्य पुरुषः प्रवर्तते तत्सर्वं कार्यं प्राप्तम् । तत्र को दोषः नैवंविधकार्यावगतिः प्रवृत्तिकारणं भवितुमर्हति सत्यामपि तस्यां प्रवृत्त्यदर्शनात् । यो हि मोहात्सर्पायाङ्गुलिदानमुद्दिश्य प्रवर्तमानो मध्ये तस्यानर्थत्वं जानाति स तावत्ततो निवर्तते तत्र कार्यता तावदुद्दिश्य प्रवृत्त्यैवाङ्गुलिदानस्य संजाता तन्मात्रलक्षणत्वात्कार्यतायाः । सा च पश्चादनर्थत्वावगमे ऽपि न बाध्यते । न खलु जानन्नप्यनर्थमुद्दिश्य न मे प्रवृत्तिः संजातेत्यध्यवस्यति किन्त्वनर्थमेवोद्दिश्य मोहात्प्रवृत्तो ऽस्मीत्यवगच्छति । तस्मात्प्र-

सक्षप्रमाणिका येयं कृत्युद्देश्यत्वमात्ररूपा कार्यता न तदवगतिः प्रवृत्तिकारणमिति सिद्धम् ।

अथ कृत्युद्देशार्हता कार्यता सा केन प्रमाणेन प्रतीयते? न तावत्प्रत्यक्षेण । प्रवृत्त्यवस्थायामपि कर्मणः कार्यत्वसन्देहात् । भवति हि सन्देहादापि क चित्प्रवृत्तिः । तत्र यः कार्यत्वं संदिहान एव क चिद्व्यापारे प्रवृत्तः स प्रवृत्तिवेलायामपि न कार्यतां प्राक्फललाभान्निश्चिनोति । वदन्ति हि न विद्मः कार्यमकार्यं वेति सन्देहादेव प्रवर्तामहइति । मा भूत्प्रवृत्तिवेलायां प्रत्यक्षं कार्यत्वं फलवेलायां भविष्यतीति चेत् कस्य पुनस्तदानीं कार्यत्वं प्रत्यक्षगम्यम् । न तावत्क्रियायाः नष्टत्वात् नापि फलस्य तस्य सुखरूपमात्रोपलम्भात् । न हि कार्यत्वं नाम किञ्चिदत्रावगम्यते । यो हि दैवनिर्मितमेघच्छायाजन्यं सुखमनुभवति यश्च प्रयत्नजनितमातपत्रच्छायाजन्यं तयोरुभयोरपि प्रत्यक्षा सुखोपलब्धिस्तुल्यैव न कृतिजन्ये सुखे कार्यत्वं नाम कश्चिदतिरेकः प्रत्यक्षमीक्ष्यते । भवतु वा सुखस्य प्रत्यक्षगम्या कार्यता तत्साधनस्य तु व्यापारस्य न कदा चित् प्रत्यक्षेण कार्यता ऽवगम्यते नाऽनुमानेन न हि सुखस्य दृष्टं कार्यत्वं तत्साधने ऽनुमातुं शक्यम् ।

स्यादेतत् । कृत्यर्हता नाम कार्यता सा च यदाकारं वस्तु प्रतिपद्य तदुद्देशेन पुरुषस्य प्रवृत्त्यौत्सुक्यं जायते तदाकारभागितैव । कः पुनरसावाकारः समीहितरूपत्वं तत्साधनत्वं वा । तादृशे ह्यर्थे स्वरसादेव पुरुषाणां प्रवृत्त्यौत्सुक्यं जायते । द्विविधं च समीहितं सुखं दुःखाभावश्च । तत्र सुखं प्रत्यक्षगम्यं दुःखाभावस्त्वनुपलब्धिगम्यः तत्साधनता चान्वयव्यतिरेकगम्येति न प्रामाणिकी कार्यतेति युक्तमेतत् किन्त्वेवं सति सुखदुःखपरिहारातिरिक्तेषु तत्साधनतैव प्रवृत्तिकारणमङ्गीकृतं स्यात् ततश्च गामानयेत्यत्र गवानयनस्य सुखदुःखप्राप्तिपरिहार-

त्वाभावात् प्रवृत्तिहेतुभूतां कार्यतामभिदधानो विधिशब्दः समीहितसाधनताभिधायी स्यात् तेन कार्यं गवानयनं कुर्याद् यथाविधे पुरुषाणां कृतिः प्रवर्तते तथाविधमित्यर्थः । तथाविधता तावन्न स्वयं समीहिततया सम्भवतीति तत्साधनतैव पारिशेष्यात्कार्यवाचिना शब्देनाभिहिता भवति तथा च वेदे ऽपि अपूर्वस्य स्वयं सुखदुःखपरिहाररूपत्वाभावात्तत्साधनतैव कृत्यर्हतेति कार्यरूपमपूर्वमभिदधानो लिङ् समीहितसाधनतामेवाभिदध्यादिति नैमित्तिकनिषेधाधिकारयोरपि [1]साधनरूपापूर्वाभिधानात्तद्बलेनैवाश्रुतमपि फलं कल्पनीयं स्यात् । ननु न सुखत्वं कार्यत्वं तत्साधने ऽपि भावात् न साधनत्वं सुखे ऽपि भावात् । तदुभयानुगतं कार्यबुद्ध्यालम्बनं कार्यत्वं नाम प्रवृत्तिकारणमिति । मैवम् न हि साधने कार्यत्वं नाम किञ्चित्प्रवृत्तिवेलायामुत्तरकाले वा प्रत्यक्षेणावगम्यतइत्युक्तम् । अतो नास्त्युभयानुगतः कार्यत्वं नाम कश्चिदर्थविशेषः । कर्तव्यशब्दस्त्वयमेकोपाधिवशादुभयत्र प्रवर्तते तद् द्वयमपि साध्यमानं स्वोद्देशेन पुरुषं प्रवर्तयतीति अनेनैवोपाधिना कार्यशब्दप्रवृत्तिः । तस्मान्न कार्यतावगतिः क्रियायां प्रवृत्तिकारणम् अपि तु समीहितसाधनत्वज्ञानम् । भवतु वा समीहितसाधनत्वोपपन्नमेव कार्यत्वं तच्च क्रियाया एवाभिधातव्यम् । तत्रैव प्रवृत्तिदर्शनात् । सत्यं लोके क्रियैव कार्यतया शब्देन प्रतिपाद्यते वेदे तु फलकामिनियोज्यान्वयानुगुण्यात्स्थिरमेव कार्यं लिङादिभिरभिधीयतइति चेन्मैवम् । क्रियायामपि कामिनः कार्यतावगमाविरोधात् । नासौ फलसाधनीभवितुं समर्था भङ्गुरत्वादिति चेन्न अपूर्वद्वारेणोपपत्तेः । नान्यद्वारेणान्यस्य साधनत्वं सम्भवत्यतिप्रसङ्गात् । अवान्तरव्यापारो वा शक्तिर्वा साधनत्वमुपपादयति

---

(१) फलसाधनेति प. पु. पाठः ।

नापूर्वम्। तथा शक्तिमति व्यापारवति वा ऽतीते शक्तिव्यापारयोः स्थित्यनुपपत्तेरिति चेत् किमिदानीं काष्ठानां पाकसाधनत्वं नास्ति तत्रापि हि काष्ठेभ्यस्तैजसाः परमाणवः समुद्गताः स्थाल्युदरमनुप्रविशन्तस्तण्डुलान् विक्लेदयन्ति। न च तेषां द्रव्यरूपाणां काष्ठावान्तरव्यापारत्वं तच्छक्तित्वं वा समस्तीति न तद्द्वारेण काष्ठादीनां साधनभावः स्यात्। मा भूदिति चेन्न सर्वलोकप्रसिद्धिविरोधात्। काष्ठैः पचतीति निर्विवादप्रयोगात्। तस्माद्यदेव येन समीहितफलोद्देशप्रवृत्तेन तदुपायभूतमन्तरा साध्यते तदेव तस्याऽवान्तरव्यापारत्वेनाभिधीयते। तेन सम्भवत्येवापूर्वस्य कर्मावान्तरव्यापारत्वम्। यदि चैवं नेष्यते ततोऽपूर्वं प्रत्यपि साधनत्वं कर्मणो न स्यात् तदपि न कर्मानन्तरं जायते स्विष्टकृदाद्युत्तरतन्त्रानुष्ठानप्रतीक्षणात्। तत्रावश्यमुत्पत्त्यपूर्वाण्यवान्तरव्यापारत्वेनैषितव्यानि। उत्पत्त्यपूर्वाण्येव परमापूर्वस्य कारणानि न यागादीनीति चेत् न असिद्धत्वादशब्दार्थत्वाच्च। अधिकारवाक्ये फलकामिनियोज्यान्वयानुगुणापूर्वाभिधायित्वे स्थिते पश्चादाग्नेयादिवाक्येष्वपूर्वाभिधानसिद्धिः प्राक्च लोकावगतक्रियाभिधायित्वमेव तेषु सम्भवतीत्यसिद्धत्वादुत्पत्त्यपूर्वाणां न परमापूर्वसाधनत्वेनान्वयसम्भवः। न च यजतेरपूर्वाभिधायित्वं येनावान्तरापूर्वाणां प्रत्ययार्थपरमापूर्वं प्रति कारणत्वं स्यात्। तस्माद्यजिरेव करणम्। किञ्च कार्यत्वमेवापूर्वस्य नोपपद्यते कृतिसाध्यं हि कार्यमुच्यते कृतिश्च पुरुषप्रयत्नः न च प्रयत्नसाध्यता ऽपूर्वस्य सम्भवति चिरविनष्टे प्रयत्ने तदुत्पादात्। प्रयत्नेन हि यागः ततो ऽवान्तरापूर्वं ततः पश्चादधिकारापूर्वं तस्मात्कार्यत्वानुपपत्तेर्न कार्याभिधायिलिङ्वाच्यता ऽपूर्वस्य संभवति तत्रावश्यं प्रयत्नसाध्यत्वमपूर्वस्य यागावान्तरापूर्वद्वारमाश्रयितव्यम्। तद्वद्यागस्यापि फलसाध-

नत्वमपूर्वद्वारं किमिति नेष्यते मा वा भूत् फलसाधनं क्रियमपूर्व-
साधनं तावद्भवत्येव तावतापि कार्यतया तामवगन्तुमर्हत्येव पुरुषः
यस्मिन् अकृते समीहितं न प्राप्यते कृते च प्राप्यते साक्षात्प्र-
णाड्या वा तदेव कार्यतया बुद्ध्यते न तु साक्षाद्भावविशेषस्त-
त्रोपयोगी। अवश्यं च कामिनः क्रियायामपि कार्यावगतिरे-
षितव्या। कथमन्यथा स्वतन्त्रः प्रवर्त्तते। सत्यमस्त्येव तत्रापि
कार्यावगतिः न तु शाब्दी किन्तवार्थी कामानुगुणापूर्वसाधन-
त्वात्। तामपि कार्यतया कामी प्रतिपद्यतइति चेन्न विकल्पा-
सहत्वात्। किं फलप्रसूता कार्यावगतिः क्रियायामुतापूर्व-
प्रसूता। न तावदपूर्वप्रसूता काम्येषु विधेरनुष्ठापकत्वानभ्यु-
पगमात्। यदि हि विधिनिबन्धना कार्यावगतिः क्रियायाः स्यात्
ततो विध्याक्षिप्तानुष्ठानतया करणांशस्यापि विधेयत्वप्रसङ्गः।
फलप्रसूतत्वमपि भवदुक्त्या नीत्या न सिध्यति न हि फलकामः
पुरुषः क्षणिकं कर्म कार्यतया ऽवगन्तुमलम्। तस्याः साक्षात्सा-
धानत्वायोगात् अपूर्वस्य चावान्तरव्यापारत्वाभावात्तद्द्वारेणा-
प्यसाधनत्वात्। साधनसाधने च साध्यार्थिनः कार्यावगमानु-
पपत्तेः। तस्मात् क्रियायाः कार्यत्वावगतिः न फलायत्ता नापि
विध्यायत्ता संभवतीत्यननुष्ठानमेव तस्याः प्रसज्ज्येत। तस्मादवि-
धिप्रसूतं काम्यानुष्ठानं फलायत्तमिच्छता ऽवश्यं क्रियायाः
फलसाधनता वा साधनसाधने ऽपि वा साध्यार्थिनः कार्याव-
गतिरेषितव्या। ततश्च शब्देनापि शक्यतएव फलकामस्य का-
र्यतया क्रिया प्रतिपादयितुमिति नापूर्वाभिधानसिद्धिः। यच्चा-
न्यद्वक्तव्यं तत्सर्वमङ्गनिर्णयएव वक्ष्यामः। अन्यन्मतं समीहितसा-
धनत्वमेव भावनाया लिङा ऽभिधीयते। तदवगतेरेव प्रवृत्ति-
कारणत्वेनात्मनि दृष्टत्वात्। नन्विच्छैव प्रवृत्तिकारणम्। सत्यं
सा तूत्पन्ना प्रवृत्तिकारणं नावगता। शब्दस्य च प्रमाणत्वाद-

वगतिजननद्वारेण प्रवृत्तिकारणत्वमिति नेच्छाभिधायित्वसम्भवः । इच्छा हि सुखदुःखप्राप्तिपरिहारयोरन्यतरत्तदुपायं चाधिकृत्य समुत्पद्यते तेन लिङ्शब्दानन्तरं प्रवर्तमानस्य प्रयोज्यवृद्धस्य प्रवृत्तिहेतुभूतेच्छासंपादकत्वेन समीहितसाधनत्वावगतिरेव क्रियायां व्युत्पित्सुना कल्प्यते । तस्याश्च शब्दानन्तर्याच्छब्दस्य तदभिधायित्वं निर्णीयते । ननु मदिरास्वादस्य समीहितसाधनत्वादनुष्ठानं स्यात् । न प्रबलेन द्वेषेण निरुद्धत्वात् यथैव हीच्छा प्रवृत्तेः कारणं तथैव द्वेषो ऽपि निवृत्तेः । द्वेषश्च दुःखसुखपरिहारतदुपायानधिकृत्य प्रवर्तते सुरापानं च महानर्थसाधनत्वेन निषेधेन प्रतिपादितं द्वेषगोचरतया नानुष्ठातुमर्हति । यस्तु सन्निहितेनाल्पीयसापि सुखेनाक्रान्तस्वान्तो महान्तमनर्थं नालोचयति न वा ऽऽद्रियते स प्रबलेन रागेण प्रतिक्षिप्यमाणचित्तः प्रवर्ततएव सुरापाने । तस्मात्समीहितसाधनत्वेन भावनाविधिना सामान्येन बोधिता पदान्तरसमर्पितेन स्वर्गादिना निराकाङ्क्षीभवतीत्येतत्स्वर्गकामाधिकरणे व्युत्पाद्यते । यत्र फलविशेषसमर्पकं पदान्तरं समानवाक्ये नास्ति तत्र प्रकरणादिना फलं कल्प्यं भवतीति प्रकरणाधिकरणे व्युत्पाद्यते । प्रकरणादीनामप्यभावे अर्थवादोत्थेन फलेन समन्वय इति रात्रिसत्राधिकरणे स्थितम् । तस्याप्यभावे ऽध्याहृतेन फलेनान्वय इति विश्वजिदधिकरणे सिद्धम् । धात्वर्थस्तु सर्वत्र समानपदोपात्तो ऽपि बलीयस्या विधिश्रुत्या साध्यांशात्प्रच्यावितः प्रत्यासत्त्या करणांशेन निविशतइति भावार्थाधिकरणार्थः । तथा चोक्तम् ।

> तथा धात्वर्थकार्यत्वे[1] पदश्रुत्योपदर्शिते ।
> भावनाया विधिश्रुत्या पुरुषार्थांशसाध्यतेति ॥
> श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयतइति च ।

(१) कर्मत्वइत्युभयपुस्तकपाठः ।

तस्मादिष्टसाधनतैव विधिर्लिङाद्यभिधेयेति तद्युक्ताया भावनायाः फलमेव भाव्यं धात्वर्थस्तु करणमिति। आचार्यस्य तु "अभिधाभावनामाहुरन्यामेव लिङादय" इति वदतो ऽन्यादृशं विधितत्त्वम् अभिमतं लक्ष्यते । किं पुनस्तदुच्यते । इदं तावद् सिद्धं यथा समीहितसाधनत्वावगतिमन्तरेण चेतनस्य स्वतन्त्रा प्रवृत्तिर्न घटते इति लिङ्शब्दश्रवणानन्तरं प्रवर्तमानस्य पुरुषस्य समीहितसाधनत्वावगतिः शब्दात्संजातेति कल्पनीयम् तत्तु समीहितसाधनत्वं किमभिधानत एवोपात्तं किं वा ऽर्थान्तराभिधायिना विधिशब्देन तदनुपपत्त्या बोधनीयमिति चिन्तनीयम् । तत्र नाभिधायकता युक्ता संविद्विरोधात् । न हि यागानुरक्तो व्यापार इष्टार्थहेतुरित्यस्माद्यजेतेत्यस्माच्च शब्दात्तुल्या ऽवगतिः सहप्रयोगाच्च । लोके हि समीहितसाधनतावचनो विधिशब्दश्च युगपत्प्रयुज्यमानौ दृष्टौ माणवक सन्ध्यामुपासीनस्य ते ऽभ्युदयो भविता तस्मात्संध्यामुपास्वेति न च पर्याययोः सह प्रयोगो भवति । लोकप्रमाणकश्च शब्दार्थावगम इति नेष्टसाधनताभिधायित्वं लिङादीनाम्। तस्माद्वरं कार्याभिधायित्वमेवाश्रयितुम्। नन्वेतदयुक्तं कार्यमिति यदि कृतिं प्रति उद्देश्यमभिधीयते ततस्तादृशी कार्यता सर्ववस्तूनामविशिष्टेति न तदवगतिः प्रवृत्तिहेतुः । पारिशेष्यात् कृत्यर्हता कार्यता वक्तव्या तदवगतिर्हि प्रवृत्तिहेतुः कृत्यर्हता च न सुखदुःखपरिहारतदुपायव्यतिरेकिणी का चिदस्ति तेनानयनादिक्रियाणां स्वरूपेण सुखदुःखपरिहाररूपत्वाभावात् तदुपायत्वमेव कृत्यर्हतेति क्रियादिविषयायाः कार्यावगतेः प्रवृत्तिहेतुभूतायाः समीहितसाधनत्वमेवावलम्बनम् । तदुक्तम् ।

कर्तुरिष्टाभ्युपाये हि कर्तव्यमिति लोकधीरिति ।
पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्तक इति च ॥

तेन लिङ्शब्दो ऽपि कृत्यर्हतारूपकार्यमभिदधत् समीहितसाधनत्वमेवाभिदध्यादिति न तन्मतादस्य विशेषः स्यात् । उच्यते अयमस्ति विशेषः यत्समीहितसाधनता न तत्स्वरूपेणाभिधीयते किन्तु लिङ्शब्दः कृत्यर्हतारूपं सुखदुःखपरिहारतदुपायसाधारणमभिदधाति । तस्मिंस्त्वभिहिते क्रियायाः स्वयं सुखत्वाद्यभावात्पारिशेष्यात्तदुपायत्वं निश्चीयते । तथा च कर्तव्यतावचनो भावनायां पुरुषं प्रवर्तयतीति भूयान्भाष्यवार्तिकयोर्व्यवहार इति । इदमपि मतम्[1] अभिधाभावनामाहुरित्याद्यननुगतम् । किञ्च कार्यशब्देनापि सह विधिशब्दः प्रयुज्यते कार्यं ते सन्ध्योपासनमतः तत्कुरुष्वेति । यद्यपि चायं प्रयोगः कर्तृकर्मगतसंख्याभिधानभेदेनात्यन्तापर्यायत्वादुपपद्यते तथा ऽपि न कार्यस्य लिङर्थता युक्ता । तथा हि अकार्ये ऽप्यर्थे कार्यतामङ्गीकृत्य लिङादिप्रयोगो याच्ञायां दृश्यते कश्चिद्धि कञ्चिदेवं याचते यद्यप्येतत्तव निषिद्धत्वादकार्यमेव तथा ऽपि मत्कृते कुरुष्वेति । कार्यार्थत्वे तु व्याघातः स्यान्न ह्येवं प्रयुज्यते यद्यप्येतदकार्यं तथापि कार्यमिति एवं ब्रुवन् हास्यो भवति । तस्मात्कृत्यर्हता विधिश्च भिन्नावर्थौ । किं पुनरिदमभिधाभावनेत्युक्तं सर्वशब्दानामेवार्थप्रतीत्युन्नेयो ऽभिधाभिधानो व्यापारः समस्ति लिङादीनां त्वसौ व्यापारः पुरुषप्रवृत्तिभवनफलत्वाद् भावनेति[2] प्रवर्तनेति च गीयते । कश्चिदाह न शब्दव्यापारः सम्भवति गुणत्वात् द्रव्यत्वे ऽपि विभुत्वादिति । तदयुक्तम् गुणस्याप्यरुणादेर्द्रव्यावच्छेदव्यापारदर्शनात् । विभूनां चात्मादीनां ज्ञानादिव्यापारसंभवात् । स्पन्दसमवायस्तु न संभवति न चासावस्माभिः शब्दस्येष्यते । कस्तस्य व्यापारः स्वज्ञानमेव

१ अभिमतम् इति द्वि. पुं. पा.

२ प्रवृत्तिसाधनत्वात् इति प्र. पु. अधिकम् ।

तज्जनितो वा संस्कारस्तद्योगी हि शब्दोऽर्थप्रतीतिं जनयति। तथा चोक्तम्। "शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानमि" ति। "पूर्ववर्णसंस्कारसचिवोऽन्त्यवर्णो वाचक" इति च। यदाऽयमागन्तुकं धर्मं प्राप्य कार्याय पर्याप्तो भवति स एवागन्तुकधर्मस्तस्य व्यापार इत्युच्यते तेन ज्ञानसंस्कारयोः शब्दव्यापारत्वमुपपन्नम्। ननु ज्ञानस्याभिधात्वमयुक्तं ज्ञानं प्रति हि कर्मीभूतः शब्दः कर्तृत्वं करणत्वं वा तस्याभिधानं प्रत्यभ्युपगम्यते स कथमेकस्मिन्नेव व्यापारे कर्मत्वं कर्तृत्वकरणत्वयोरन्यतरच्च प्रतिपद्येत। परशुवदिति ब्रूमः परशुरुद्यमननिपातनयोः कर्माऽपि सन् तरुद्वैधीभावलक्षणफलावच्छेदेन छिनत्तिपदाभिधानयोस्तयोरेव करणं भवति सर्वमेव हि करणं कर्तृव्यापारगोचरः। तथा ज्ञानस्य शब्दविषयस्याप्यर्थप्रतिपत्तिलक्षणफलावच्छेदलब्धाभिधाभिधानस्यार्थ एव कर्म। शब्दस्तु फलान्तरप्रवृत्तव्यापारव्याप्यतया तस्यामवस्थायां करणम्। स्वातन्त्र्यविवक्षायां च कर्तृत्वमनवद्यम्। अनेनैव न्यायेनार्थकर्मकस्याप्यभिधाव्यापारस्य पुरुषप्रवृत्तिभवनफलावच्छेदलब्धशब्दभावनाभिधानस्य पुरुषप्रवृत्तिफलावच्छेदलब्धप्रवर्तनाभिधानस्य च प्रवृत्तिकर्मत्वं पुरुषकर्मत्वं च व्याख्यातम्। तेनैक एव व्यापारो यदा जानातिना विषयप्रकाशनफलावच्छिन्नोऽभिधीयते तदा विषयीभूतः तत्फलताकशब्द एव कर्म भवति शब्दं जानातीति यदा तु स एवार्थप्रतिपत्तिफलावच्छिन्नोऽभिदधातिनाऽभिधीयते तदा प्रतिपत्तिरूपफलभागर्थः कर्म भवति अर्थमभिदधाति शब्द इति यदा तु स एव पुरुषप्रवृत्तिफलावच्छिन्नो भावयतिनाऽभिधीयते तदा भवनफलभाक् प्रवृत्तिः कर्म भवति प्रवृत्तिं भावयति शब्देनेति यदा तु पुरुषप्रवृत्तिफलावच्छिन्नव्यापाराभिधायिना प्रवर्तयतिनाऽभिधीयते तदा प्रवृत्तिफलभाक् पुरुषः कर्म भवति

पुरुषं प्रवर्तयतीति एवं संस्कारे ऽप्यभिधाव्यापारे यथासम्भवं योज्यम् । न हि व्यापारस्वरूपापेक्षः कर्मभावः तथा सति चलत्यभिहिता ऽपि क्रिया गच्छत्यभिहितेव सकर्मिका स्यात् । तथा प्रयत्नो ऽपि करोतिभावयतिभ्यामिव प्रयतिना ऽप्यभिहितः सकर्मकः स्यात् । तथा छेतृव्यापारो ऽप्युद्यच्छतिनियच्छतिभ्यामिव छिनत्तिना ऽप्यभिहितः परशुकर्मकः स्यात् । ताभ्यामेव वाभिहितः छिनत्त्यभिहित इव वृक्षकर्मकः स्यात् । तस्मादेक एव व्यापारः फलभेदेन निरूप्यमाणस्तं तं कर्मभेदं भजते यदा फलानपेक्षेण स्वरूपेण निरूप्यते प्रयततेचलतीत्यादिभिस्तदा ऽकर्मको भवति । यदा तु फलाधीननिरूपणीयेन रूपेण निरूप्यते तदा सकर्मकः तत्र येन धातुना यत्फलाधीननिरूपणं येन रूपेण क्रिया ऽभिधीयते तद्धातूक्तायां क्रियायां तत्फलभाग् वस्तु कर्म भवति । यत्तु केन चिदात्मनो ज्ञानकर्मतां निराकुर्वता परसमवेतक्रियाफलभागित्वं कर्मलक्षणमुक्तं तदतिव्यापकं पूर्वोक्तेष्वपि परश्वादिषु छिदादिकर्मत्वप्रसङ्गात् । अव्यापकं च देवदत्तः पावमानीभिरात्मानं पुनातीत्यादिषु स्वसमवायिक्रियाफलभागित्वेनापि देवदत्तस्य पुनातिकर्मत्वात् । तथा च वेदे "पुनात्येवाग्निं पुनीत आत्मान"मिति प्रयोगो दृष्टः । तस्मात्पूर्वोक्तमेव कर्मलक्षणम् । न चैवं गतौ गन्तुः कर्मत्वप्रसङ्गः गच्छतिर्हि गन्तव्यप्राप्त्यधीननिरूपणीयेनैव रूपेण क्रियामभिदधातीति ग्रामादेरेव तत्कर्मत्वं न गन्तुः । एवञ्च ज्ञेयावभासफलाधीननिरूपणीयेनैव रूपेण जानाति संविदित्यादिभिरभिहितायां ज्ञानक्रियायामात्मनो ऽप्यहंवित्तौ भासमानत्वात्कर्मत्वं समर्थितम् । आह अस्त्वभिधा व्यापारः न त्वस्य पुरुषप्रवर्तकत्वं लिङभिधेयत्वं च संभवति न हि प्रेक्षाकारी कश्चिदभिधामात्रावगमात्प्रवर्तते समीहितसाधनत्वावगमाधीनत्वात्प्रवृत्तेः । न चा-

सावर्थप्रतिपत्तिलक्षणफलोन्नेया शब्दान्तराभिधावदभिधेया ऽपि भवितुमर्हति। उच्यते सत्यं फलसाधनत्वं प्रवर्तकत्वं तत्तु न शब्द-स्याभिधेयमित्युक्तम्। अतो व्युत्पित्सुर्बालकः प्रयोज्यवृद्धं प्रवर्त-मानमुपलभ्य प्रवृत्तिहेतुभूतामिष्टसाधनतावगतिं शब्दजनिता-मध्यवसाय पूर्वोक्तेन न्यायेन साक्षाच्छब्दस्य जनकत्वासंभवा-द्येनाभिहितेन फलसाधनत्वं कल्पयितुं शक्यते तदभिधायी लि-ङ्गशब्द इति निश्चिनोति। ततः स्वव्यापारस्यार्थप्रतिपत्त्यैव कल्पितस्य प्रवर्तनारूपेणाभिधानं लिङादिभिः कल्प्यते। प्रवृत्तिफलता च प्रवर्तनारूपता। न चैवंरूपता ऽर्थप्रतिपत्त्यैव कल्पयितुं शक्येत्यनन्यलभ्यत्वादभिधान्तरदि [illegible] लिङ्गशक्तिं कल्पयति। एवंविधविध्यवरुद्धा च भावना पुरुषार्थसाधन-तया[1] निश्चीयते। न ह्यपुरुषार्थफलस्य व्यापारस्य प्रवर्तनारूप-विध्यन्वयसंभवः। प्रेक्षापूर्वकारिणां निष्फले प्रवर्तयितुमश-क्यत्वात्। तदेवमभिधाव्यापारमेव प्रवर्तनारूपेणाभिदधाना लि-ङादयस्तद्बलादेव फलसाधनत्वं बोधयन्ति। नन्वस्मिन् पक्षे प्रवर्त-नारूपस्य विधेः प्रवर्त्यापेक्षत्वात्प्रवर्त्यसमर्पकत्वेनैव स्वर्गकामादि-शब्दाः संबध्येरन्न फलसमर्पकतया। तथा नामेति केचित्। न चैवमफलताप्रसक्तिः प्रवर्त्यत्वानुपपत्त्यैव काम्यमानस्य फलत्व-कल्पनात्। भाष्यवार्तिकयोस्तु फलपरत्वमेव स्वर्गकामादिशब्दानां लक्ष्यते, युक्तं चैतत् तथा हि यद्यस्मिन् पक्षे कार्यात्मकविधिपक्षवत् कर्तृनियोज्ययोरभेदापत्तिः विधेयक्रियाविषयं कर्तृत्वं विधिविष-यं तु नियोज्यत्वमिति विषयभेदात् तथा ऽपि न तत्परत्वं कामशब्दानां युक्तम् अप्राप्तार्थपरं हि शास्त्रम् इह च विधिव-शा[2]देवैतावदवगतम् अस्ति कश्चिन्नियोज्यः स चासौ यो ऽस्य

---

१ फलतयेति उभयपु. पाठः

२ विधिशब्दवशादिति प्र. पु. पाठः

विध्यन्वितस्य व्यापारस्य शेषी समर्थश्चानुष्ठातुं न ह्यस्वार्थव्यापारे कश्चित्प्रवर्तयितुं शक्यते। नाप्यसमर्थः स एव वा शेषी यदभिलषितफलसाधनोऽयं व्यापार इत्येतावति कामशब्दमन्तरेणैवावगते फलविशेषमात्रे चाऽनवगते तत्परत्वमेव कामशब्दानां युक्तम्। तदेवं विधिशब्देनैव प्रवर्तनारूपविधिमभिदधता ऽर्थाद्विधेयस्य कर्तव्यता फलसाधनता चावबोध्यतइत्यभिप्रायेण कर्तव्यतावचनः प्रत्ययः "श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयत" इति च व्यवहारः। ननु स्वव्यापारे ऽभिधीयमाने स्वरूपाभिधानप्रसङ्गः न ह्यनभिधाय विशेषणं विशिष्टमभिधातुं शक्यम्। मैवं वोचः। उक्तं हि।

"विशिष्टग्रहणं नेष्टमगृहीतविशेषणम्।

अभिधानाभिधाने तु न केन चिदिहाश्रिते" इति॥

तुल्यं चैतदिष्टसाधनताविधिपक्षे ऽपि तत्रापि तु नेष्टसाधनतामात्रं विधिःअपि तु [कर्तुमसम्भवात्पारिशेष्यात्] कर्तुरिष्टसाधनता न चाख्यातं कर्त्रभिधायि तत्रावश्यं भावनाक्षेपावगतकर्तृविशेषितेष्टसाधनता ऽभिधीयतइत्याश्रयणीयम्। तथा ऽस्मिन् पक्षे प्रत्यक्षावगतलिङ्शब्दादिभ्यः प्रवर्तनावगतेः न शब्दस्वरूपविशिष्टाभिधाव्यापाराभिधानादिदोष इति। न्यायविदां त्विष्टसाधनत्वमेवाभिमतं न च संविद्विरोधः तेन रूपेणाभिधानाभावात् प्रवर्तनारूपेण तु शब्दो ऽभिधत्ते प्रवृत्तिहेतुश्च धर्मः प्रवर्तना सा चापौरुषेये वेदे प्रैषादीनामसंभवात्पारिशेष्यादिष्टाभ्युपायतैव निश्चीयते। तेनाभिधाव्यापारप्रवर्तनाभिधानवत्प्रवर्तनारूपेणेष्टसाधनतां शब्दो ऽभिधत्ते न स्वरूपेणेति न प्रतीतिविरोधः। इदमेव भगवतो मण्डनमिश्रस्यापि।

[ ] एतच्चिन्हस्थः पाठो नास्त्युभयत्र।

"पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्तकः ।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् ॥

एवङ्कारश्च प्रवर्तनाप्रत्यय" इत्यादि वदतोऽभिमतम्। एवञ्चानेकार्थत्वं कल्पितं न भवति इतरथा हि प्रेषणमध्येषणमभ्यनुज्ञानमिष्टसाधनत्वञ्चेति बहवोऽर्थाः शब्दस्य कल्प्येरन् । प्रवर्तनासामान्यवाचित्वे तु लाघवं स्यात् तत्रापि तु रागद्वेषमोहादीनां प्रवृत्तिहेतूनामवाच्यत्वादेवं वक्तव्यं योऽवगम्यमानतया प्रवृत्तिहेतुस्तदभिधायी लिङ्शब्द इति। न च कार्यमेव ज्यायः समकनीयोभिः प्रतिपाद्यमानं प्रैषादिव्यपदेशभाक् सर्वानुगतं शब्दार्थ इति सांप्रतम्। अकार्यत्वाभ्युपगमेनैव याच्ञायां लिङ्प्रयोगादित्युक्तम्। तस्मात्प्रवर्तनासामान्यं शब्दार्थः । एवञ्च ।

विशेष एव शब्दार्थो दृष्टरूपान्वयोऽपि हि ।
न च प्रवर्तनाबाध इष्टशक्तेर्विनार्थवान् ॥

इत्यत्र श्लोके पूर्वार्धेन परमतमुपन्यस्योत्तरार्धेन स्वमतमुपन्यस्तवानिति व्याख्यातव्यम् । प्रवर्तनासामान्यमभिदधता लिङ्शब्देन निर्विशेषसामान्यबोधस्यानर्थक्यापत्तेरपौरुषेये च वेदे पुरुषधर्माणां प्रैषादीनां विशेषाणामसम्भवात्पारिशेष्यादिष्टसाधनतैव बोध्यतइति। "अभिधाभावनामाहु"रित्यस्यापि वार्तिकस्यायमेवार्थः । अभिधीयत इत्यभिधा प्रवर्तना कर्तव्यता वा सैव च पुरुषप्रवृत्तिं भावयतीति भावना तामाहुरिति। अथ वा अभिधायाः शब्दस्य भावना अभिधाभावना सैव प्रवर्तना परसमवेताऽपि शब्देन पुरुषं प्रवर्तयता तत्सिद्धयेऽभिधीयमाना शब्दव्यापारत्वेनोच्यते तामाहुरिति। अथ वा इष्टसाधनताऽभिधानमभिधा सैव विधानं विधिरिति व्युत्पत्त्या विधिरित्युच्यते सैव च भूतिकर्तृत्वं प्रतिपद्यमानायाः पुरुषप्रवृत्तेः प्रयोजकस्य शब्दस्य व्यापारो भावना तामाहुः कुर्वन्तीति ओदनपाकं पचतीतिवद्व्याख्येयम् । तदेवं

शब्दकर्तृकं प्रवर्तनारूपेष्टसाधनत्वाभिधानमेव शब्दभावनेति गीयते। तस्याः पुरुषप्रवृत्त्यर्थं प्रवृत्तेः पुरुषप्रवृत्तिर्हि स्वर्गादिस्थानीया भाव्या समीहितसाधनताविज्ञानन्तु परार्थप्रवृत्तशब्दव्यापारजन्यत्या यागादिवत्करणं प्राशस्त्यज्ञानन्त्वितिकर्तव्यतेति विवेक्तव्यम्। प्रवर्तनेति समीहितसाधनतैवोच्यते तदुद्देशेन हि कृतिः प्रवर्ततइति दर्शितम्। एवं च प्रवर्तनावचनः कर्तव्यतावचनः प्रत्यय इत्यादिग्रन्थस्याविरोधः। न च सहप्रयोगविरोधः प्रवृत्तिनिमित्तभेदात् पर्यायत्वाभावात्। इष्टसाधनशब्दो हि तत्साधनतामेव साक्षादभिधत्ते लिङादयस्तु प्रवर्तनारूपेण कृत्यर्हतारूपेण वेति नास्ति पर्यायता। तदिदं कर्तव्यतारूपं प्रवर्तनारूपं वा समीहितसाधनत्वमेव लिङादिभिरभिधीयतइत्येतावदेव रमणीयम्। स्वव्यापाराभिधानं दुरुपपादं ग्रन्थानुगुण्यमपि नातीव दृश्यते। तथा हि निषेधशास्त्रेषु प्रतिषेधस्य वर्जनस्य नञाभिधेयस्य लिङादिभिर्विधेर्वा प्रतिषेध इति वचनव्यक्तिद्वयमङ्गीकृत्य ब्राह्मणं न हन्यादित्यत्र पुंस्त्वाविवक्षां प्रतिपादयता प्रतिषेधविधावविवक्षामुपपाद्य विधिप्रतिषेधे ऽप्यविवक्षामुपपादयतोक्तं विध्यर्थमपि द्वेषाद्यर्थप्राप्तमनूदितं हननं प्रतिषिध्य चरितार्थो नञ् न लिङ्गमपरं शक्नोति प्रतिषेद्धुमिति। यदि हि स्वव्यापारो विध्यर्थः स्यान्न तस्यानुवादो ऽवकल्पते न हि द्वेषादिनिमित्तायां हननादिप्रवृत्तौ लिङ्व्यापारः प्रवर्तकः प्राप्तः यो न हन्यादित्यादिषु लिङा ऽनूद्य नञा प्रतिषिध्येत। ननु कर्तव्यता ऽप्यनभिधेया कथमनूद्यते अननूदिता वा कथं निषिध्यते। ननु भवन्मते समीहितसाधनता हननस्य विद्यतएवेति कथं निषिध्यते। उच्यते प्रवर्तना हि विध्यर्थः कर्तव्यता च महान्तमनर्थं जनयत्सु हननादिषु यदपि स्वल्पसुखसाधनत्वं तेन प्रवर्तना कर्तव्यता वा न हि तादृशे प्रेक्षापूर्वकारिणां कृतिः प्रवर्तते। ये तु महान्तमनर्थं न जानन्ति ते स्वल्पसुखसाधनत्वादेव

भ्रान्त्या कर्तव्यतां मन्यन्ते सा शक्यते प्रतिषेद्धुम् । या भ्रान्त्या हननस्य कर्तव्यता ऽवगता सा नास्तीति तस्मादनवद्यम् ॥

न्यायागमानुसारेण श्रीमद्यज्ञात्मसूनुना ।
पार्थसारथिमिश्रेण कृतो ऽयं विधिनिर्णयः ॥ ३ ॥

यत्र विप्रातिपद्यन्ते सम्बन्धे लिङ्गलिङ्गिनोः ।
स्वरूपतः प्रमाणाच्च तत्र निर्णय उच्यते ॥ १ ॥

स्वरूपतस्तावत्कार्यकारणभावसंयोगसमवायैकार्थसमवायविरोधाल्लैङ्गिकशब्दनिर्दिष्टानुमानकारणत्वेन काणादाः सङ्गिरन्ते। अस्येदं कारणं कार्यसंबन्ध्येकार्थसमवायि विरोधि चेति लैङ्गिकमिति।अविनाभावं साधनस्य साध्यतदभावाभ्यामन्वयव्यतिरेकस्वरूपं तत्स्वभावतदुत्पत्तिनिबन्धनं शाक्या मन्यन्ते। साध्येन साधनस्य व्याप्तिमन्ये। नियमरूपं मीमांसकाः। प्रमाणतो विप्रतिपत्तिः।तत्स्वभावतदुत्पत्ती शाक्याः प्रमाणमाहुः। मानसप्रत्यक्षमन्ये। ऐन्द्रियकमेवान्ये। तदपि प्राथमिकमेवेति केचित्। अपरे भूयोदर्शनसहायं चरमं प्रत्यक्षं नियमप्रमाणं मन्यन्ते। अर्थापत्तिमन्ये। भूयांस्येव तद्दर्शनानि व्यभिचारादर्शनसहायान्याचार्याः। तत्र वैशेषिकपरिगृहीतकार्यकारणभावादिमात्राभ्युपगमे कृत्तिकारोहिण्युदयादीनां गम्यगमकभावो न स्यात्। कार्यकारणभावाद्यभावात्। न च संबन्धिग्रहणेन सर्वसंग्रहः। तस्य संयोगसमवायमात्रपरत्वात्। सर्वपरत्वे च कार्यकारणभावादीनामपि तत एव सिद्धेः पृथगभिधानानर्थक्यम्। अपि चैवं वह्नेरपि धूमानुमानं स्यात्कार्यकारणत्वात्। वृक्षत्वेन शिंशपात्वस्यैकार्थसमवायात्। अथानियतत्वान्नायं प्रसङ्गः तर्हि नियम एवानुमानाङ्गं न कार्यकारणभावादि। शाक्यपक्षेऽपि स्वभावकार्ययोरेवान्वयलाभेन हेतुत्वान्न कृत्तिकोदयादचिरोदितरोहिणीप्रतिपत्तिः सिद्ध्येत्। रसाच्च रूपानुमानं प्रवृत्तिसामर्थ्यरूपोपादानसहकारिरसोपादानं रसादनुमीयते प्रवृत्तिसामर्थ्याच्च रूपोपादानादुपादेयरूपानुमानमिति चेन्न। अकार्यत्वात्। यद्यपि कार्यात्कारणं सहकारिसहितमनुमीमते कारणात्तु प्रवृ-

त्तिसामर्थ्यादपि न कार्यं शक्यमनुमातुम् अकार्यत्वादतत्स्वभावत्वाच्च। अथ कारणमप्यनुमापकं वह्नेरपि धूमानुमानप्रसङ्गः इत्युक्तम् । अपि चान्वयो नामानुगतिः न च धूममूर्ध्वं गच्छन्तं भूमिष्ठो वह्निरनुगच्छति। शङ्कुच्छायां वा रविर्दिविष्ठो भूमिष्ठाम्। एतेन व्याप्तिः प्रत्युक्ता । न हि

भूमिप्रतिष्ठितो वह्निर्धूमाग्रं व्योम्न्यवस्थितम् ।
व्याप्नोति नियमस्तस्मात् संबन्धो लिङ्गलिङ्गिनोः ॥२॥

यथोक्तम् ॥

"नियमो नाम सम्बन्धः स्वमतेनोच्यते ऽधुने"ति ।
यो यथा नियतो येन यादृशेन यथाविधः ।
स तथा तादृशस्यैव तादृशो ऽन्यत्र बोधकः ॥३॥

यो भावो येन यादृशेन यावद्देशकालवर्तिना यथा येन प्रकारेण संयोगसमवायैकार्थसमवायकार्यकारणभावादिना केनापि संबन्धेन साक्षात्परम्परया वा नियतत्वेन दृष्टान्तधर्मिष्ववधारितः स तादृशो धर्म्यन्तरेषूपलभ्यमानस्तादृशं तद्देशकालवर्तिनं तथाविधसम्बन्धसम्बन्धिनमनुमापयति । तद्यथा । धूमो नभोवृत्तिरूर्ध्वं गच्छन्नातिदूरवर्तिना वह्निना नियतस्तथैव तं गमयति । नदीपूरस्त्वधुनातनो ऽधोदेशगतश्चातिदूरवर्तिनीं वृत्तां वृष्टिम् । उदयस्तु चन्द्रगतः समुद्रगतां तत्कालां वृद्धिम् । तस्यैव नभोमध्यस्थितिस्तामेवार्धपञ्चदशनाडिकातिक्रान्ताम् । तादृश्यैव तया तस्या नियतत्वात् । एवमन्यत्राप्यूहनीयम् । नियम एव वार्तिके व्याप्तिशब्देनोच्यते ॥

संबन्धो व्याप्तिरिष्टा ऽत्र लिङ्गधर्मस्य लिङ्गिना ।
व्याप्यस्य गमकत्वञ्च व्यापकं गम्यमिष्यते ॥

इत्यादिषु। केन पुनः प्रमाणेनायं नियमोऽवगम्यते कार्यकारणभावाद्वा स्वभावाद्वेति के चित् । तदयुक्तम् । अकार्यकारणातदाकारात्मनां कृत्तिकारोहिण्युदयादीनां नियमाभावप्रसङ्गात् । अपि च । पौर्वापर्यनियम एव कार्यकारणभावः कथं च नियम एव नियमे प्रमाणम् आत्माश्रयदोषापत्तेः । अपि च कार्यस्वभावयोरेव किं प्रमाणं प्रत्यक्षेण तावत्साहित्यमात्रं गम्यते न तत्कार्यता तत्स्वभावता वा। शतशोऽग्नौ धूमदर्शनादनग्नौ चादर्शनात् तत्कार्यता धूमस्यावसीयतइति चेन्न । स खलु यत्र दृश्यते तत्र तस्यास्तितता यत्र न दृश्यते तत्र नास्तितत्वं गम्यते । कार्यता तु कुतः । तस्मात्कार्यकारणभावस्यैवाप्रमाणकत्वान्न तन्निबन्धनं नियमावधारणमवकल्पते । तत्स्वभावता चाप्रामाणिक्येव । शिंशपा हि वृक्षात्मिका क चिदृष्टाऽपि न तत्स्वाभाव्येन नियन्तुं शक्यते तन्मात्रानुबन्धित्वात्तत्स्वभावतायाः । न च शिंशपामात्रानुबन्धि वृक्षत्वमिति किञ्चित्प्रमाणमस्ति । सत्यपि सहोपलम्भे वृक्षत्वस्य व्यभिचारसंभवात् । न शिंशपात्वस्य क चिद् व्यभिचारो दृष्ट इति चेत्तथाऽपि देशान्तरे कालान्तरे वा व्यभिचारसंभवात्सन्देहानिवृत्तिः। तन्न स्वभावतो नियमसिद्धिः। के चित्तु मानसप्रत्यक्षं नियममाचक्षते। तदयुक्तं मनसो बहिरस्वातन्त्र्यात् । भूयोदर्शनसहायं बहिः प्रवर्त्स्यतीति चेन्न । देहाबहिर्भावात् । न खल्वक्षजत्वमात्रं प्रत्यक्षलक्षणम् अनुमानादेरपि लिङ्गादिसहितमनोजन्यतया प्रत्यक्षता मा भूद् इन्द्रियार्थसंप्रयोगजं प्रत्यक्षं चतुर्विधश्च संप्रयोगः संयोगाद्द्रव्यग्रहणं संयुक्तसमवायाद् गुणकर्मसामान्यानाम् । संयुक्तसमवेतसमवायाद् गुणत्वादीनाम् । तत्समवायाद् गुणत्वादिगतसत्ताग्रहणम् । न चायं चतुर्विधोऽपि बाह्येन सह मनसः संभवति संप्रयोगः तस्य देहाबहिर्भावात् ।

ये ऽपि विभु मनः संगिरन्ते तेषां यद्यपि मनो द्रव्यमाकाशवद् व्यापकं तथा ऽपि कर्णच्छिद्रपरिच्छिन्नस्येव गगनस्य देहावच्छिन्नस्यैवेन्द्रियभावमातिष्ठन्ते मनसः अतो ऽसंभवी बाह्येन संप्रयोगः । अन्यथा ऽनुमानादीनामपि मनःसंयुक्तार्थविषयत्वात्प्रत्यक्षत्वप्रसङ्गः । यदि चतुर्विध एव संप्रयोगः कथं तर्हि शब्दग्रहणं न हि श्रोत्रस्याकाशदिगहंकाराणामन्यतमात्मकस्य शब्दस्य च निष्क्रियतया तयोः संभवति संयोगः तस्य कर्मजत्वात् । उच्यते । संयोग एवानयोः सन्निकर्षः । न चायं कर्मजन्यः संयोगजसंयोगे व्यभिचारात् । नापि संयोगजन्यः कर्मजे व्यभिचारात् । तदुभयानुगतं नैरन्तर्यमेव द्रव्यगतमस्य कारणम् । तच्च विभुनोरपि संभवति । भवतु वा संयोगजसंयोगस्याप्रमाणकत्वाज्जनिमतः संयोगस्य कर्मजत्वमव्यभिचारात् । तन्तुगत एव हि तुरीसंयोगस्तन्तौ पटभावमापन्ने पटगतो ऽपि भवति न तु संयोगान्तरबुद्धिस्तत्रास्ति तदजः संयोगो विभुनोर्भविष्यत्यनुमानात् । विभुनी मिथः संयुक्ते द्रव्यत्वे सति निरन्तरत्वात् घटाकाशवदिति । यदि तु नैरन्तर्यमेव संयोगस्तथा ऽपि विभुनो ऽपि युक्तः[1] संयोगः । ननु द्रव्यधर्मः संयोगः स कथं गुणभूतस्य शब्दस्य स्यात् नायं गुणो द्रव्याश्रयत्वे प्रमाणाभावात् । ननु न कार्यमनाश्रितं संभवति सत्यं न तु शब्दस्य कार्यत्वं नित्यत्वात् । कश्चित्त्वेकेन्द्रियग्राह्यतया रूपादिवच्छब्दं गुणमिच्छति । तस्यापि वायावनैकान्तिकत्वम् । स्पर्शविरहे सतीति विशेषणे ऽपि गोत्वरूपत्वादिसामान्यैर्व्यभिचारः । तेषां नेत्रैकगोचराणामपि गुणत्वाभावात् । अपि च यच्छब्दाश्रयत्वेनाभिमतं व्योम तत्प्रत्यक्षमप्रत्यक्षं वा स्यात् । प्रत्यक्षत्वे तेनैव लोचनैकगोचरेण द्रव्यभूतेन हेतोर्व्यभिचारः । अप्रत्यक्षत्वे सति

१ आविहतः इत्युभय पु०पाठः ।

तस्य सप्रतिसाधनत्वम्। न ह्यप्रत्यक्षगुणत्वं प्रत्यक्षस्य शब्दस्य संभवति शक्यतएव हि प्रयोक्तुं शब्दो न गुणः प्रत्यक्षद्रव्य-गुणत्वरहितत्वे सति प्रत्यक्षत्वात् घटवदिति। तस्माद्युक्तमस्य द्रव्यत्वे संयोगाद् ग्रहणमिति चतुर्विध एव सन्निकर्ष इति बाह्येन मनसः सन्निकर्षाभावात् न मानसप्रत्यक्षविषयत्वं नियमस्य धूमादिवर्तिनः संभवति। तत्र प्रमाणान्तरमिदं भूयोदर्शनसहायमनो-जन्यं लिङ्गादिसहितमनोजन्यज्ञानादिवत्प्रसज्येत। तच्चानिष्टं प्रमाणषट्काभिधायिनाम्। कश्चित्तु बहिरिन्द्रियविषयमेव नियम-मिच्छति। स हि मन्यते वन्हिधूमयोः सम्बन्धो देशकालानव-च्छिन्न एष प्रत्यक्षेणावगम्यतइति। ननु सन्निहितदेशकालविष-यत्वात्प्रत्यक्षस्य तदवच्छिन्न एव संयोगः। नैवम्। इदन्तां हि सन्निहितदेशकालावच्छेदः स च द्रव्ययोरेवावगम्यते न संयो-गस्य संयुक्ताविति हि प्रतीतिः न पुनरयमनयोः संयोग इति तस्माद्देशकालाभ्यां संयोगो न च द्रव्यमेवावच्छिद्यते न तु संयोगस्य देशकालाववच्छेदकौ। तेनानवच्छिन्नः संबन्धो धूममात्रानुयायीति निश्चीयते ततश्च धूमस्यैव देशकालान्तरादौ प्रमाणमपेक्षते। न त्वग्निसंयोगस्तस्य पूर्वमेवावगतत्वात्। अग्नेस्तु धूमसंयुक्तस्यापि दृष्टस्य क्वचिद्व्यभिचारदर्शनादार्द्रेन्धनाद्युपा-धिकृतोऽस्य धूमसंयोगो न स्वाभाविकः धूमस्य तु तादृशो-पाध्यदर्शनात् स्वाभाविकमग्निसंबन्धित्वं नियतं भवति। न हि स्वाभाविकं व्यभिचरतीति। अत्र वदामः संविदेवात्र तावत्परिप-न्थिनी। सा हि देशकालाभ्यां संयोगमेवावच्छिन्दती जायते संयुक्तावेतौ वह्निधूमौ संयुज्येते संयोक्ष्येते इति संयोगस्यैव भावार्थस्य कालत्रयावच्छेदात्। सोऽयं स्वप्रयुक्त एव बाणो भवन्तं प्रहरति कारकव्यापारो हि कालत्रयावच्छेद्यो न कार-कमिति। न चावश्यमिदंशब्देनैव कालो निर्देष्टव्यः। लडा-

दिभिः सुतरां निर्देशसिद्धेः। यदि च स्वतन्त्रस्यैव द्रव्यस्य कालसंयोगो न परतन्त्राणां गुणकर्मणाम् ततो लडादीनां कालविशेषे स्मृतानां निर्विषयत्वं स्यात् । ते हि क्रियाया एव कालावच्छेदमुपदर्शयन्ति न द्रव्यस्य । सा चेदनवच्छेद्या कस्यैते कालसम्बन्धमभिदधीरन् । मा भूद् देशकालाभ्यामवच्छेदावगमः संयोगस्य तथा ऽपि स्वाभाविकत्वमप्रमाणमेव । न ह्यवच्छेदानवगम[1]मात्रेण तदभावावधारणं सिद्ध्यति सतो ऽप्यनवगतिसंभवात् । अनिश्चिते चावच्छेदाभावे न स्वाभाविकत्वं सिद्ध्यति । सिद्धौ वा वर्तमानकालता ऽपि स्वाभाविकी धूमस्य स्यात् । यथा ह्यग्निसंयोगो द्रव्यविशेषणमेवं कालो ऽपि ततश्चाग्निसंयोगवत्स्वाभाविकमेतत्कालसम्बन्धित्वमित्यापद्येत । तत्र यथा ऽग्निसंयोगरहितस्य नावस्थानमेवमेतत्कालसम्बन्धितामपहाय धूमस्य स्थित्यभावात् प्रत्यक्षेणैव कालान्तरसम्बन्धव्युदासात्क्षणिकता भावस्यापादितेति जितं सौगतैः । अथानवच्छिन्नो ऽपि कालसम्बन्धो न स्वाभाविकस्तथा ऽग्निसंयोगो ऽपि स्यात् । अथ स्वाभाविकमपि कालसम्बन्धमपहाय धूमस्तिष्ठेत् अग्निसंयोगमप्यपहाय सम्भवत्यवस्थानमिति न नियमावधारणम् । ननु प्रत्यभिज्ञया कालान्तरसम्बन्धावगमात् पूर्वकालप्रहाणेनापि सिद्ध्यति धूमस्यावस्थानम् । अग्निसंयोगन्त्वपहाय न कदा चिद्धूमो दृश्यतइति कथमसौ तमन्तरेण स्यात् । किमिदानीं प्रत्यक्षगृहीतैव क्षणिकता पश्चात्प्रत्यभिज्ञया बाध्यते । न ह्येवमभ्युपगमो भवताम् । पपि चैवमस्तु नाम प्रत्यक्षावगतकालान्तरसम्बन्धस्य पूर्वावगतक्षणिकत्वबाधः अनुमानेन तु कथमग्नेः प्रत्यक्षावगतक्षणिकभावस्य तद्बाधेन कालान्तरसम्बन्धी ऽवगम्यते । अपि चैवं प्रत्यक्षावगततत्तत्कालसम्बन्धनियमविरुद्धस्यात्यन्तानवगतस्य कालान्तरसम्बन्धस्य अनुमानेन ग्रहणे गृ-

[1] वगतीति- १ पु. पा

हीतग्राहित्वमनुमानस्य दूरापास्तं स्यात् । अपि चानवच्छिन्न-
स्यापि कालसम्बन्धस्य व्यभिचारदर्शनादग्निसंयोगो ऽपि व्य-
भिचरेन्न वेति सन्दिहाना न सहस्रेणापि पुरुषायुषैस्तदन्तं प्रति-
लभेरन् । यद्यपि दृश्यमानेषु देशकालादिषु प्रयत्नेनान्विष्टो व्य-
भिचारो न दृष्टस्तथा ऽपि क्वचित्कदाचित्संभवति व्यभिचार
इति शङ्कां को नाम निवारयेत् । न च प्रत्यक्षं तन्निवारणे श-
क्तम् । तस्य सन्निहितदेशकालमात्रव्यापारात् । नानुमानं तस्य
नियमावधारणाधीनत्वात् । तदधीने तु नियमे परस्पराश्रयदो-
षापत्तेः । स्वाभाविकत्वादव्यभिचार इति चेन्न । स्वाभाविकत्वे
एव प्रमाणाभावात् । अनौपाधिकत्वमेव स्वाभाविकत्वं न चो-
पाध्यनवगतिमात्रेण तदभावसिद्धिरित्युक्तम् । अपि च स्वाभा-
विकं न व्यभिचरतीत्यत्र किं प्रमाणम् । न तावत्प्रत्यक्षं नानुमानं
नान्यत्किञ्चित् । दृष्टश्चानौपाधिकस्यापि कालसंबन्धस्य व्यभिचा-
रस्तथा ऽग्निसम्बन्धस्यापि स्यात् । अपि चान्ययोरेवाग्निधूम-
योर्दृष्टान्तधर्मिणि सम्बन्धो ऽवगतः अन्यश्चायं पर्वतवर्ती धूमः
तस्याग्निसम्बन्धो ऽनवगत इति कथं लिङ्गं स्यात् । अथ सा-
मान्यं लिङ्गं न तस्य संबन्धानवगमात् । देशकालाभ्यां सम्ब-
न्धेन जात्या च सर्वैर्द्रव्यमेव विशेष्यते न तु सम्बन्धस्य जातेश्च
परस्परान्वयः जातेरपि संयोगवद्द्रव्यविशेषणत्वात् । अथ द्र-
व्यद्वारेणास्ति जात्योरपि सम्बन्धः तथा ऽप्यार्द्रेन्धनाद्युपाधिरि-
वाग्नेर्धूमसम्बन्धस्तदभावे कालान्तरे तद्द्रव्याभावे तद्द्वारकः स-
म्बन्धो ऽपि न स्यात् । द्रव्यान्तरद्वारस्तु कालान्तरसम्बन्धः प्राग-
नवगत इति कथमनुमानाङ्गम् । न च विशेषपरिहारेण सामा-
न्ययोः सकृद्दर्शनेन शक्यावगमः सम्बन्धः । किञ्च देशकाला-
भ्यामपि द्रव्यद्वारेण संयोगस्याप्यवच्छेद इति नानवच्छिन्नत्वम् ।
यथा च जात्योर्द्रव्यद्वारकः सम्बन्धः स्वाभाविको भवत्येवमग्नि-

सम्बन्धस्य तत्कालावच्छेदो द्रव्यद्वारको ऽपि स्वाभाविकः स्यादिति तत्कालप्रहाणेन न कालान्तरे सम्बन्धस्तिष्ठेदित्यसम्बन्ध एव कालान्तरे ऽग्निधूमयोर्भवदुक्तया नीत्या निश्चेतव्यः स्यात् न तु कालान्तरे ऽग्निसम्बन्धशङ्का ऽपि धूमस्य स्यादित्यलमतिनिर्बन्धेन। अपरं मतम् शतशो ऽग्नौ धूमदर्शनादनग्नौ चादर्शनान्नियतो ऽयमग्निनेति प्रतीतिस्तावदुपजायते तिरश्चामपि। न चेयमप्रमाणं सर्वदा सर्वेषां संवादित्वेन जायमानत्वात्। अतः प्रमाणमेवेदम्। तच्च षड्विधान्तर्भूतम्। तत्र नेदमनुमानं सम्भवति तस्य नियमावधारणाधीनत्वात्। न च शाब्दमशब्दजन्यत्वात्। नोपमानमसादृश्यविषयत्वात्। नार्थापत्तिर्नियममन्तरेणानवकल्पमानस्य कस्य चिददर्शनात्। अभावस्तु भावरूपे नियमे दूरापास्त एव। नन्वयं विपक्षव्यावृत्तिरूपो ऽभाव एव न व्यावृत्तिमात्रं नियमः शशविषाणादेः सर्वविपक्षव्यावृत्तस्य सर्वार्थनियमप्रसङ्गात्। व्यावृत्तिरपि सर्वविपक्षेभ्यो दुर्लभैव दृश्यादर्शनाभावात्। पारिशेष्यात्प्रत्यक्षमेवेदम्। न च प्रथमदर्शने ऽनवगमादप्रत्यक्षम्। रत्नतत्त्वस्येव भूयःपरिचयसचिवप्रत्यक्षविषयत्वोपपत्तेः। ननु वर्तमानविषयं प्रत्यक्षं तत्कथमनेन देशकालान्तरसंबन्धात्मा नियमः शक्यावगमः। उच्यते न कालान्तरादिसम्बन्धो नियमः किन्तु स्वरूपं धूमादीनाम्। तच्च वर्तमानमिति युक्तं प्रत्यक्षग्राह्यत्वम्। न हि नियमं ग्रहीतुं देशान्तरादिसम्बन्धो ग्रहीतव्यः कुड्यादीनामिव स्थिरं रूपम्। न हि तेषां कालान्तरसंबन्धो ऽप्रत्यक्ष इति तद्रूपमप्रत्यक्षं भवति। तथा सति नेदं रजतमिति पूर्वज्ञानबाधकत्वमुत्तरकाले न स्यात् विषयभेदात्। पूर्वकाले हि रजतज्ञानेन रजतं प्रत्यक्षितम्। उत्तरकाले च तदभाव इति विषयभेदात् कथं बाधकत्वम्। अतः स्थिरमेव रजतरूपं गृहीतमिति वक्तव्यम् आह च

"रजतं गृह्यमाणं हि चिरस्थायीति गम्यते" इति।

तद्वन्नियमरूपं गृह्यतइति युक्तं प्रत्यक्षत्वम्। कीदृशं पुनरिदं रूपं धूमादीनां नियतो ऽयमग्निनेति नियमः यदा यत्र धूमस्तदा तत्राग्निरित्यर्थः। तस्मादुपपन्नं प्रत्यक्षविषयो नियम इति। तत्रेदं वक्तव्यम्। किं प्रत्यक्षं सर्वं विद्यमानोपलम्भनम् आहो स्विद-विद्यमानोपलम्भनमपीति। न तावदविद्यमानोपलम्भनं प्रत्यक्षं नाम संभवति। तत्संप्रयोगजनितत्वेन विद्यमानोपलम्भनत्वस्य स्थितत्वात्। तथा च नियमविषयत्वासम्भवः। तस्य सर्व-देशकालव्यापिरूपत्वात्। अयमेव हि धूमस्याग्निना नियमः यदखिलधूमदेशकालव्यापित्वमग्नेः। यथोक्तम्॥

"यो यस्य देशकालाभ्यां समो न्यूनो ऽपि वा भवेत्।
स व्याप्यो व्यापकस्तस्य समो वा ऽप्यधिको ऽपिवे"ति॥

यत्तु धूमस्वरूपनियम इत्युक्तम् अस्त्वेतत् स्वरूपमपि तद-ग्निसम्बन्धाव्यभिचारात्मकमेव। कश्चासावव्यभिचारः अ-न्यदतो यावद्धूमदेशकालमग्निसम्बन्धसंभवात्। तथा च त-स्मिन् प्रत्यक्षीक्रियमाणे देशान्तरादिसंबन्धः प्रत्यक्ष आपद्येत। तत्सम्बन्धातिरिक्तन्तु पाण्डुरत्वादिवद्धूमगतं नियमाभिधानम-परोक्षं रूपमीक्ष्यतइति संविद्विरुद्धम्। यदि चेदं रूपान्तरं पाण्डु-रत्वादिवत्संबन्धातिरिक्तं स्यात् तस्मिन् प्रत्यक्षगृहीते ऽपि सर्व-धूमदेशकालव्यापित्वमग्नेर्गृहीतं न स्यात्। न ह्यन्यस्मिन् गृ-हीते ऽन्यद्गृहीतं भवति अतिप्रसङ्गात्। अगृहीते च देशका-लाव्यभिचारे कथमनुमानोदयः। किञ्चेदं रूपान्तरमपि प्रत्य-क्षेण गृह्यमाणं सन्निहितदेशकालावच्छिन्नमेव गृह्यतइति न कालान्तरेण नियमः सिध्येत्। यदपि दर्शितम् कुड्यादीनामिव स्थितं रूपमिति तदपि निरूपणीयम्। किन्तत्र स्थायित्वमेव

गृह्यतइत्यभिप्रायः किं वा यद्वस्तुतः स्थास्नुरूपं तद्गृह्यतइति किं वा स्थितियोग्यता । न तावत्पूर्वः कल्पः स्थायिता ह्यनेककालावस्थानं सा कथं प्रत्यक्षेणैव गृह्यते तस्य वर्तमानविषयत्वात् । यदि चेदं प्रत्यक्षेणैव गृह्यते ततः स्थायिताप्रसिद्धये प्रत्यभिज्ञादरो निरर्थकः स्यात् । द्वितीये तु कल्पे कुड्यरूपमेव तत् नान्यत् एवमिहापि यद्वस्तुतो नियतं धूमस्वरूपमेव तत्प्रत्यक्षमित्येव सिद्ध्येत् । न च तावता किंचित्प्रयोजनमस्ति योग्यता तु सर्वभावानामर्थापत्तिगम्येति प्रत्यक्षगम्यताऽनुपपत्तिः। यस्तु घटकुड्यादिषु दृष्टमात्रेषु स्थायित्वावगमो लौकिकानां स तादृशां स्थायित्वस्य पूर्वमेवानुगमादानुमानिकः । स्पष्टं चास्यानुमानिकत्वमुक्तरूपत्वात् । तथा हि ईदृशीयमवगतिः यदि शस्त्रादिना नैतद्भिद्यते ततः कियन्तं चित् कालं स्थास्यतीति । एवं रजतादिष्वप्यानुमानिकमेव तद्रूपस्य स्थायित्वम् । अनेनैवाभिप्रायेणोक्तम् ।

रजतं गृह्यमाणं हि चिरस्थायीति गृह्यते ।

एतदेव बाधकस्यापि तत्त्वम् । अनुमानेन ह्येतदवगतं रजतस्य सतो नाकस्मादतद्भावः संभवतीति अतद्रूपस्य वा तद्रूपतेति उभयोरपि कालयोरेकरूपमेवेदमिति स्थिते पूर्वमेवावगतं रजतरूपमुत्तरकालं व्याप्नोति उत्तरकालावगतश्चातद्भावः तत्पूर्वकालम् । तेन समानविषयतया पूर्वावगतस्य रजतरूपस्य भवत्युत्तरकालभुवा नेदं रजतमित्यनेन बाधः । यत्र त्वनुमानेनैकरूपत्वं न कालद्वयेऽपि वस्तुनोऽवगतं तत्र न भवत्येव बाधः। यथा बदरफले श्यामप्रत्ययस्य पाककालभुवा रक्तप्रत्ययेन । प्रत्यक्षेण तु स्थायित्वावगमे तत्रापि बाधः स्यात् । तस्मान्न प्रत्यक्षेण स्थायित्वं स्वध्यवसानम् । एवं नियमोऽपि सर्वदेशकालव्याप्तिरूपत्वान्न । ननु स्वाभाविकत्वं संबन्धस्य नियमः न

तु कालान्तरसम्बन्धस्तच्च वर्तमानमेवेति युक्तं यत्प्रत्यक्षेण गृह्यते। किं पुनरिदं स्वाभाविकत्वं न तावत्सदातनत्वं कादाचित्कस्य तदयोगात्। अथ स्वरूपनिमित्तत्वम् अग्नेरपि धूमसंबन्धे स्वरूपं निमित्तमिति तस्यापि धूमसंबन्धो नियतः स्यात्। नन्वार्द्रेन्धनादिकृतोऽस्य धूमसम्बन्धो न स्वरूपनिमित्तः सत्यम् आर्द्रेन्धनादिनिमित्तं स्वरूपमपि निमित्तमेव। न ह्यसति संबन्धिस्वरूपे सम्बन्धो भवति। स्वरूपधर्मत्वमिति चेत् स एव दोषः। अग्निस्वरूपस्यापि धर्म एव संयोगः। अथ स्वरूपैकानिमित्तकः सम्बन्धः स्वाभाविकः वह्नेस्तु धूमसंबन्धे स्वरूपातिरिक्तोऽप्यार्द्रेन्धनादिरस्त्येव हेतुः धूमस्य वह्निसम्बन्धे स्वरूपमेव निमित्तम् न निमित्तान्तरमस्तीति मतमेवन्तर्हि प्रत्यक्षगम्यं स्वाभाविकत्वं न हि तेन निमित्तान्तराभावः शक्यते प्रत्येतुं भावविषयत्वात्प्रत्यक्षस्य। दृश्यादर्शनात्तु निमित्तान्तराभावः प्रतीयतइति प्रत्यक्षगम्यत्वानुपपत्तिः। अपि च धूमस्याग्निसम्बन्धे न स्वरूपमेव निमित्तमग्न्यादीनामपि निमित्तत्वात्। तस्मात्स्वरूपाव्यभिचार एव स्वाभाविकत्वम्। अव्यभिचारश्च सकलतद्देशकालव्याप्तिरिति प्रत्यक्षगम्यत्वानुपपत्तिः तस्य वर्तमानविषयत्वात्। अपि च स्वाभाविकताऽपि वर्तमानस्यैव संनिहितस्य निश्चेतुं शक्यते नातीतानागतव्यवहितविप्रकृष्टानां संबन्धानाम्। सन्ति हि बहवो वह्निधूमसम्बन्धस्य व्यक्तयः कथं तासां सर्वासां धूमस्वरूपमेव निमित्तमिति संयुक्तविषयेण प्रत्यक्षेण गम्यते। अथ सम्बन्धसामान्यस्य तन्निमित्तत्वम् न तस्य नित्यत्वेन निमित्ताभावात्। इदञ्च सकृद्दर्शनगम्यनियमपक्षेऽपि तुल्यमेव दूषणम्। तत्रापि हि संप्रयुक्तस्यैव हि संयोगस्य धूमा[1]भावनिमित्तता ऽवगम्यते नातीतादीनाम्। स च काला-

[1] धूमस्वरूपनिमित्ततेति प्र. पु. पाठः।

न्तरे नष्ट इति प्रत्यक्षावगतस्य संयोगस्य रूपनिमित्तेन कालान्तरेऽनुमानम्। तस्मान्न कथञ्चित् प्रत्यक्षविषयत्वं नियमस्येति स्थितम्। अपरे त्वर्थापत्तिगम्यं नियमं मन्यन्ते। यदेतच्छतशोऽग्नौ धूमदर्शनमनग्नौ च क्व चिदप्यदर्शनमिदमसति धूमस्याग्निना नियमेऽनुपपन्नम्। अनियतो हि कदा चित्क चिदप्यग्निं विनोपलभ्येतेति। तदप्यनुपपन्नम्। अदर्शनं तावदभावादेवोपपन्नम्। न तु तावता सर्वत्रानग्नौ नास्तीति शक्यमध्यवसातुं प्रमाणाभावात्। दर्शनमात्रमपि तत्र भावादेवोपपन्नम्। न तु तावन्मात्रेण सर्वत्राग्नावस्त्येव धूम इति त्वध्यवसानम्। तस्माद्वक्तव्यं नियमे प्रमाणम्। उच्यते किमत्र वक्तव्यम् यतः।

स्वयं वार्तिककारेण प्रमाणमुपदर्शितम्।
भूयोदर्शनगम्या हि व्याप्तिरित्यभिधानतः॥ ४॥

अनृजवो हि पूर्वमार्गा महान्तं क्लेशमाश्रित्यानुभवानारूढा वैयात्यमात्रेणागतिकागतिन्यायेनाश्रिताः। नियतो धूमोऽयं नूनमग्निनेत्यूहरूपस्य ज्ञानस्य संविद्विरुद्धप्रत्यक्षत्वाश्रयणादस्ति चायमृजुमार्गो भूयोदर्शनगम्यो नियम इति। किं पुनरिदं भूयोदर्शनं नाम प्रमाणम्। नैकं किं चिन्नियम्य वक्तुं शक्यते किन्तु येनैव प्रत्यक्षादीनामन्यतमेन लिङ्गस्य भूयःसाहित्यं लिङ्गिना गम्यते तदेव विपक्षादर्शनसहायं नियमप्रमाणं संभवतीति। ननु भूयोभिर्दर्शनैस्तत्र तत्र साहित्यं गम्यते न तु सर्वत्र दर्शनानां सर्वेषां स्वविषयपर्यवसानात् अनन्तप्रत्यक्षगम्यो हि सर्वत्र सहभावः स जीवद्भिर्दुर्लभः। विपक्षादर्शनादपि प्रत्यासन्नेष्वेव विपक्षेषु परमभावो गम्यते सर्वविपक्षव्यावृत्तिस्तु दुर्लभैव दृश्यादर्शनाभावात्। अदर्शनमात्रेण चाभावासिद्धेः। तत्कथं नियमस्य सर्वदेशकालव्याप्तिरूपस्य भूयोदर्शनगम्यत्वम्। एतच्च स्वयमेवाचार्येण शङ्कितम् यदाह।

"अन्वयो हि प्रतिव्याप्यं व्यापकस्य न दृश्यते ।
अनन्तेन हि लभ्येत स प्रत्यक्षादिजन्मने"ति ॥

तथा—

"नाभावेन विपक्षाद्धि हेतुभावः प्रतीयत"इति च ।
सर्वविपक्षाभावो न लभ्यतइत्यर्थः अत्र च समर्थनमुक्तम्
"तत्रास्यादृष्टिमात्रेण गमकः सहचारिण इति" तत्रेति विपक्ष-इत्यर्थः । एतदुक्तं भवति । मा नाम सर्वविपक्षाभावो लिङ्गस्य सैत्सीत् अदर्शनन्तु विपक्षेषु लिङ्गस्यास्त्येव तावता च सहचारी दृष्टो धूमादिः सहचारिणो ऽग्न्यादेर्गमको भवति । यत्तु सह-चारित्वमपि सर्वत्र दुर्लभं द्रष्टुमित्युक्तं तत्राप्युत्तरमुक्तम् ।

"दुर्लभं सहचारित्वं सर्वत्रेति यदुच्यते ।
द्रष्टुं न नाम सर्वत्र द्वित्रयोर्दृश्यते ध्रुवम् ॥
साहित्ये मितदेशत्वात्प्रसिद्धे वह्निधूमयोः ।
व्यतिरेकस्य वा ऽदृष्टेर्गमकत्वं प्रकल्पत"इति ॥

अयमर्थः मा नाम सर्वत्र सहचारित्वं दर्शि द्वित्रयोस्तु प्रदेशयोरीषत्करं दर्शनम् । तावता त्वसति व्यभिचारदर्शने भवत्यनुमानम् । यदि हि सकलदेशकालव्याप्तिरूपो नियमो ऽनुमानाङ्गमस्माभिरुपगम्येत ततः स्यादुपालम्भः । न त्वेवम-स्माभिरुच्यते किन्तु यत्र यत्र धूमादिकम् दृष्टं तत्र तत्र सर्वत्र नियमेनाग्न्यादिसाहित्यमनग्नौ चादर्शनमित्येतावदेवानुमानोदये कारणमेतावदेव हि लौकिकानां धूमो ऽग्निं गमयति । न तु सकलपक्षविपक्षान्वयव्यतिरेकावगतिमपेक्षते येन दुर्लभं प्र-माणं स्यात् । तेन न सकलदेशकालापेक्षया नियमाभिधानमपि तर्हि दृश्यमानेषु देशकालेषु यो लिङ्गस्य लिङ्गिसाहित्यनियमः स एव नियम इत्युच्यते । तस्मात्तन्मात्रमेवानुमानाङ्गम् । तच्च भूयोभि-रेव दर्शनैः सुगममिति नाप्रमाणं लिङ्गिसाहित्यनियमः । यथा ऽऽह

सहत्वदृष्टिमात्रेण गमकः सहचारिण इति ।

कियद्भिः पुनःसाहित्यदर्शनैरनुमानम् । को नामैतत्संचष्टे यावद्भिर्दृश्यते तावद्भिरेव न तु संख्याय वक्तुं शक्यते । ये ऽपि भूयोदर्शनसहायप्रत्यक्षगम्यं नियममाहुः ये ऽपि सकृद्दर्शने ऽपि गृहीते नियमे उपाध्याशङ्कानिराकरणार्थमर्थयन्ते भूयोदर्शनं ते ऽपि नैवं संचक्षते तथा वयमपीति न तद्विशेषः । किमिदानीं सकलधूमदेशकालव्यापित्वमग्नेर्नावगन्तव्यमनुमित्सता । सत्यम् नावगन्तव्यम् । नन्वेवं सामान्यतो ऽप्यज्ञातसम्बन्धः पक्षैकदेशी कथमिव ज्ञातसम्बन्धपदेनाभिधीयते । नानेन पक्षैकदेशिनो ऽभिधानमपि तु दृष्टान्तैकदेशिनः । तदयं भाष्यार्थः । अन्यस्मिन्नेव महानसाद्येकदेशिनि धूमाग्न्येकदेशाभ्यां ज्ञातसम्बन्धे सति तदेकदेशं धूममन्यत्र पर्वतादौ तस्मिन्नेव वा महानसे कालान्तरे दृष्ट्वा ऽग्निरनुमीयते लोके तथा दर्शनात् । तथा च ज्ञातसम्बन्धपदेन ज्ञातुं निर्देश इत्युक्त्वा अथ वा न प्रमातुः किन्तु प्रमेयस्य कस्य चिन्निर्देशो न ज्ञातुरित्यर्थः । कस्य प्रमेयस्यैकदेशिन इत्यपेक्षायां दृष्टान्तैकदेशिन इत्युक्तम् । यथाहुः

एकदेश्येकदेशाभ्यां कश्चिच्चेज्ज्ञातसंगतिः ।
तत्तुल्यो ऽन्यः स वा ताभ्यां विभागेनानुमीयते इति ॥

स वा ताभ्यामिति कालान्तराभिप्रायम् । एवञ्च वदन् ज्ञातसम्बन्धपदेनैकदेश्यन्यपदार्थपक्षे दृष्टान्तैकदेशिनो ऽभिधानमित्याह । भवतु नामैवं यथा दृष्टप्रदेशेषु साहित्यनियमादेवानुमानम् । यस्त्वयं यत्र यत्र धूमस्तत्र तत्राग्निरिति भूयोदर्शनतो ऽवगमः स कथम् । न ह्यसौ नास्ति न चाप्रमाणं सर्वदा सर्वेषां दृढत्वेन जायमानत्वात् । तदयं कस्मिंश्चित्प्रमाणे ऽन्तर्भवतीति वक्तव्यम् । उच्यते आनुमानिको ऽयमवगमो ज्ञातसम्बन्धस्योपजायमानत्वात् । परोक्षरूपत्वाच्च नैन्द्रियकः साक्षात्का-

रित्वाभावात् संविद्विरोधाच्च। धूमस्य हि बहुषु देशकालेष्व-ग्निना साहित्यमुपलब्धवतो भवत्यनुमानम्। अन्ये ऽप्यतीता-नागतविप्रकृष्टाः सर्वएव धूमवन्तो ऽग्निमन्तो धूमवत्त्वात् परि-दृष्टमहानसादिवदिति। तेन यथालोकं प्रमाणसामग्र्यनुसर-णाद्धर्म्यन्तरगतसाहित्यनियमादेव धर्म्यन्तरे ऽनुमानमित्यनवद्य-म्। आह च

"तेन धर्म्यन्तरेष्वेषा यस्य येनैव यादृशी।
देशे यावति काले वा व्याप्यता प्राङ्निरूपिता॥
तस्य तावति तादृक् स्याद् दृष्टधर्म्यन्तरे पुनः।
व्याप्यांशो व्यापकांशस्य तथैव प्रतिपादक" इति॥

यादृशतादृशशब्दाभ्यां दृष्टान्तपरिदृष्टरूपान्न्यूनरूपस्य न लिङ्गत्वं नापि लिङ्गित्वमिति दर्शितम्। न हि विना धूमत्वं पाण्डुर-वत्त्वमात्रेण कपोतादिभ्यो ऽग्निमनुमिमते लौकिकाः। नाप्यु-ष्णवह्निनियतस्तृणविकारो हिमे दृष्टः प्रत्यक्षावगतशैत्यविरो-धादौष्ण्यबाधे सति अनुष्णमेव वह्निमनुमापयति। यथालोकं च प्रमाणगतिः परीक्षकैरनुसरणीया न तद्विरोधेन। तदनेन सर्वेषामप्रयोजकहेतूनामाभासत्वं दर्शितम्। दृष्टान्तपरिदृष्टरूपा-न्न्यूनरूपो हेतुरप्रयोजक इत्युच्यते। पक्षसपक्षसम्बन्धभेदमात्र-न्तु सोढव्यम्। सर्वानुमानेषु तथा दर्शनात्। तदतिरिक्तन्तु रूपमविकलमेवाङ्गीकर्तव्यम्। तेन निषिद्धत्वसहितस्य हिंसा-त्वस्याधर्मत्वेन साहित्यमुपलब्धं ब्राह्मणहननादिष्विति विना ऽपि निषिद्धत्वेन हिंसात्वमात्रान्नाग्नीषोमीयहिंसायामधर्मत्वम-नुमातुं शक्यम्। निषिद्धत्वस्य विना ऽपि हिंसात्वेन गुर्वङ्ग-नागमनादावधर्मत्वसाहित्यं दृष्टमिति तदनुमापकम्। यथा ऽध्ययनादिकार्यवतः शिष्यस्यासकृदुपाध्यायसाहित्यमवगतमि-ति न शिष्यमात्रेणाध्यापकानुमानम्। तथा देवदत्ततनयानां

श्यामत्वसाहित्यं गर्भपरिणामसमयोपयुक्ताशितपीतादिविशेषनिमित्तमिति तदभावे देवदत्ततनयत्वमात्रेण न तत्तनयान्तरस्य श्यामत्वानुमानम्। एतेन संनिवेशविशिष्टतया तनुतरुमहीरुहादीनां घटादिवदुपलब्धिमत्कर्तृकत्वानुमानं प्रत्युक्तम्। तथा हि येषु हस्तादिव्यापारविशेषेण संनिवेशाः शक्यन्ते रचयितुं तेषामेव घटपटगृहादीनामुपलब्धिमत्कर्तृकत्वं तदभावे पारिणामिकानामङ्गदेहादीनां सन्निवेशविशेषमात्रेण कथं तदनुमानं पाण्डुरमात्रादिव वह्न्यनुमानम्। तथा शरीरेन्द्रियादियुक्तबुद्धिमत्कर्तृकत्वेन साहित्यं संनिवेशविशिष्टानामुपलब्धं तच्च दृश्यादर्शनाद्दूर्वाङ्कुरादिषु निषिद्धम्। तस्मिन्निषिद्धे बुद्धिमन्मात्रं शरीरादिरहितं नानुमातुं शक्यम् तृणादिविकारादिव हिमे उष्णवह्न्यनुमानम्। न चैवं सर्वानुमानोच्छेदप्रसङ्गः सर्वविशेषपरिहाणेन धूमत्वसामान्यस्य वह्नित्वसामान्येन साहित्यमवगतं पर्वते च तदविकलमेव दृष्टमिति युक्तं तत्र तदनुमानम्। सामान्यमेवानुमीयते न विशेषः अनुगत्यभावात्। अवगतमपि महानसादौ सामान्यं देशान्तरकालान्तरादौ प्रत्यक्षेणेवानुमानेन प्रत्यभिज्ञायमानं भवति प्रमेयमिति न सिद्धसाध्यता। सामान्यस्यापि चास्त्येव संयुक्तसमवायसम्बन्धः पर्वतेनेति युक्तं तत्र तस्यानुमानम्। ननु देशविशेषादपि पदार्थस्वरूपमन्यथा भवति क्वचिद्धि वृश्चिकदंशादपि मरणं भवति क्वचिन्न तथा धूमस्यापि देशान्तरेऽग्निव्यभिचारशङ्का भवेत्। सत्यमेषा भवति सा तु तत्तद्देशादागतेभ्यः श्रुत्वा शक्यते निरसितुमिति सर्वमवदातम्। तेन यस्य यादृशस्य सामान्यस्य विशेषस्य वा येन यादृशेन सामान्येन विशेषेण वा यथादृष्टेषु देशकालेषु साहित्यं येन केनापि सम्बन्धेन नियतमुपलब्धं तदेव तादृशमेव देशान्तरकालान्तरादौ दृष्टं तस्य तादृशस्य साहित्यनियमादेव बोधकं भवति दृष्टप्रदेशेषु भूयोभिरेव दर्शनैर्व्यभिचारादर्शनमा-

असहायैः साहित्यनियमः शक्यावगम इति सिद्धम् । नियमरूप एव लिङ्गस्य लिङ्गिना संबन्धः स च भूयोदर्शनप्रमाणक इति ।

पार्थसारथिमिश्रेण वार्तिकोक्तानुसारतः ।
यथाप्रतीति निर्णीतो नियमः सप्रमाणकः ॥ ५ ॥

इति पार्थसारथिमिश्रविरचितायां न्यायरत्नमालायां
व्याप्तिवादः समाप्तः ॥

वाक्यार्थसंविदो मूलं बहुधा वादिनो विदुः ।
तत्र वार्तिककारीयैर्न्याय्यो मार्गः प्रदर्श्यते ॥ १ ॥

तत्र केचित्तावदविभागमेव वाक्यं व्यञ्जकध्वनिभेदात्तेन तेन वर्णपदविपर्यासात्मना ऽवगम्यमानं तस्य तस्य वाक्यार्थस्य प्रतिपादकमिति मन्यन्ते ।

अन्ये त्वेवंविधमेव ज्ञानं वाक्यं तदनन्तरञ्चानेकजातिगुण-द्रव्यक्रियावभासं विज्ञानमेव वाक्यार्थः । कार्यकारणभाव एव च वाक्यवाक्यार्थयोः सम्बन्ध इति प्रतिजानते । उभयस्मिन्नपि पक्षे काल्पनिकपदपदार्थसम्बन्धव्युत्पत्तिरभ्युपायः ।

अपरे तु पदवद्वाक्यमपि पूर्वपूर्ववर्णसंस्कारसचिवो ऽन्त्यो वर्णो वाचक इत्यादिना मार्गेण सावयवमेव प्रतिलब्धसम्बन्धावयवभूतपदजनितपदार्थसंविदुपायं वाक्यार्थस्य वाचकं सङ्गिरन्ते ।

पदान्येव पदार्थान्तरान्वितं स्वार्थमभिदधतीति टीकाकारपादाः ।

पदैरभिहिताः पदार्था एव वाक्यार्थं प्रतिपादयन्तीत्याचार्याः । तत्र ज्ञानात्मकवाक्यवाक्यार्थवादस्तावत्स्वात्मनि क्रियाविरोधाद्बहिरवभासाच्च शून्यवादएव निरस्तः । पदपदार्थव्यतिरेकविकल्पस्याऽप्यनेकान्तवादाश्रयणेन परिहारः । वाक्यं हि नाम एकविशिष्टार्थप्रतिपादनपराणि पदान्येव । वाक्यार्थो ऽपि पदार्थ एवैकार्थान्तरव्यतिषक्तात्मेति यद्यपि नात्यन्ताभेदो भेदो वा शक्यते ऽभिधातुं तथा ऽप्यवान्तरस्थित्युपपत्तेर्न बहिर्भूतौ तौ शक्येते अपह्नोतुम् । निर्भागवाक्यवादो ऽपि भागावगमादेवापास्तः । पदवदिति चेन्न असिद्धत्वात् । तत्रैतत्स्यात् यथैव वर्णात्मकभागावगमे सत्यप्येकपदावभासादर्थप्रतिपत्तेश्च

वर्णेभ्यो ऽनुपपत्तेर्भागावगमस्य मिथ्यात्वान्निरवयवमेव पदं पदार्थस्य वाचकमाश्रितम् तथा वाक्यमपि। तत्रापि ह्येकमिदं वाक्यमिति परामर्शो ऽस्तीति स एव नानात्वं प्रतिक्षिपति नानात्वैकत्वयोर्विरोधात् । वाक्यार्थप्रतिपत्तिश्चानन्योपाया वाक्यमेव निर्भागं कल्पयतीति तन्नैवं दृष्टान्तासिद्धेः । न हि नो वर्णातिरेकेणानवयवः पदात्मा विद्यते । यस्त्वेकपदमिति परामर्शः स बहूनामप्येकार्थप्रतिपत्तिनिमित्तः । भवति हि बहूनामप्येककार्यनिबन्धनमेकत्वं यथा सेनेति यथा वा राजसूय इति । अत एवार्थैकत्वमजानतां नास्त्येकपदावमर्शः । प्रत्यक्षेण तु पदस्वरूपमेकमनौपाधिकं संहितापाठमात्रेण व्युत्पन्नानामितरेषाञ्चानुपहतेन्द्रियाणामविशेषेण प्रकाशेत तन्न तावदेकपदावभासाद्वर्णातिरिक्तपदसिद्धिः । प्रत्युतासत्त्वमेव तस्य योग्यानुपलब्ध्या निश्चीयते ।

न चार्थप्रतिपत्त्या ऽपि पदमन्यत्प्रसिद्ध्यति ।
वर्णानन्तरजाता हि सा तत्कारणिकैव नः ॥२॥

यदा वर्णा एवाक्षधीगोचरा नान्यदिति स्थितं तदा वर्णानन्तरजायमानाऽर्थप्रतिपत्तिः तन्निमित्तैव विज्ञायते। तत्त्वान्तरस्य तु प्रत्यक्षानुपलम्भनिरस्तसद्भावस्य दूरापास्तमेव वाचकत्वं नान्यथाऽनुपपत्त्या ऽपि कल्पयितुं शक्यते। तेन वर्णानामेवैकवक्त्रुच्चारणापादितनैरन्तर्याणां स्वरविशेषभाजां संहतानामानुपूर्वीविशेषशालिनामनन्तरमर्थावगमदर्शनात्तादृशानामेवार्थाभिधायकत्वं निश्चीयते। कथं पुनः क्रमवर्तिनां साहित्यम् अवान्तरव्यापारवशादिति ब्रूमः । पूर्वपूर्वो हि वर्ण उपलभ्यमानः संस्कारापरनामधेयमवान्तरव्यापारं जनयति । तत्सहितश्चान्त्यो वर्णो ऽर्थप्रतिपत्तिं जनयति एवन्तर्हि प्रतिवर्णं संस्कारा बहवः कल्पनी-

याः स्युः तद्वरमेकमेव शब्दतत्त्वं कल्पितम् । नेत्याह । न खलु प्रत्यक्षानुपलम्भनिरस्तसत्त्वस्य तस्य सद्भावस्त्वया ऽभ्युपेयः संस्कारस्तु दृष्टोपपत्तये कल्प्यमानो नातीव लज्जामावहति अनेकमपि दृष्टोपकारकं कल्पनीयं दृष्टविरुद्धं तु न किञ्चिदपि । यद्वा नात्राक्लृप्तसंस्कारान्तरपरिकल्पना क्लृप्ता एव स्मृतिहेतवः संस्काराः तएव चैते ऽपि । यदनुभवभावितास्ते तत्रैव स्मृतिं जनयन्ति न त्वर्थान्तरप्रतिपत्तिमिति चेन्नैव तेषां स्मृतिभ्यो ऽन्यत्र व्यापारो ऽभ्युपेयते तामेव तु स्मृतिं जनयन्तो ऽर्थप्रतिपत्तावप्युपायीभवन्ति स्मृतानामेव वर्णानां वाचकत्वात् । नन्वनुभववत्स्मृतयो ऽपि वर्णेषु क्रमेण जायमाना न सम्भवन्ति अर्थप्रतिपत्तौ अथ क्रमेणानुभूतानामपि युगपदेव स्मरणं ततो व्युत्क्रमेणाप्युच्चारिता वाचकाः स्युः । तत्रापि स्मृतिहेतुसंस्कारजननात् । भ्रममनादृत्य स्मरणस्य च सर्वेषु युगपदुत्पत्तेः । अथ तूच्चारणक्रमो ऽप्यङ्गमिष्यते तथा सति सैवादृष्टकल्पना संस्कारो ऽपि हि स्मृतिहेतुः क्रमान्तरे ऽपि जात्यतएव तन्निमित्तञ्च स्मरणम् । तत्र किमपरं क्रमविशेषेण कार्यमदृष्टकल्पनात् । न चादृष्टमपि कल्पयितुं शक्यते अन्तरेणाप्युच्चारणं तत्क्रमं च स्मृत्यारूढाभ्यां जराराजशब्दाभ्यां नामाख्यातरूपाभ्यामर्थविशेषावगमात् । यदि वर्णा एव पदं ततो राजजराशब्दयोर्वर्णभेदाभावात् अनुच्चारितावस्थायां चोच्चारणतज्जन्यानुभवक्रमयोरविद्यमानत्वात् स्मरणस्य चैकस्यैव युगपदनेकवर्णगोचरस्योत्पद्यमानस्याक्रमत्वात्कुतः पदभेदावसायः कुतस्तराञ्चार्थभेदावगमः । न च वर्णाः स्वरूपेण नित्या विभवो देशकालोपाधिकं क्रमं भजन्ते यद्भेदात्पदभेदः स्यात् । तदन्यदेव पदतत्त्वं यद्विलक्षणपदावभासं बोधयतीति शब्दतत्त्वविदः प्रतिपन्नाः । अत्रोच्यते ।

व्यञ्जकध्वनिधर्मस्य वर्णेष्वारोपितस्य च ।
क्रमस्यार्थाभिधाङ्गत्वं दैर्घ्यादेरिव संमतम् ॥३॥

तेषु यत्तावत्क्रमेण स्मरणेषु युगपदनुभववत् संभूयका-रित्वासंभव इति मतं तदस्तु युगपदेव तु सर्वेषु स्मरणमर्थान्तरे-ष्विव घटपटादिषु क्रमादनुभूतेष्वपि भवति । यत्त्वेवं व्युत्क्रमे-ऽप्यर्थावगतिः स्यादिति तदयुक्तं क्रमस्याप्यङ्गत्वात् । यद्यपि स्मरणस्यापि युगपज्जन्मनः क्रमो नास्ति वर्णेषु विभुषु नित्येषु वस्तुगत्या क्रमो नास्ति तथा ऽपि व्यञ्जकानां ध्वनीनां क्रम-र्वतित्वात्तैर्वर्णेष्वभिव्यज्यमानेषु तदीयक्रमो व्यङ्ग्येषु वर्णेषु दी-र्घत्वादिवदादर्शाल्पत्वमहत्त्वे इव मुखे समारोपितः प्रतीयते ततश्च स्मरणमपि पश्चाज्जायमानं विशिष्टानुपूर्वीसमालिङ्गितश-रीरानेव वर्णान् गोचरयतीति क्रमभेदात्पदभेदः । एवमनुच्चा-रितावस्थायामपि स्मृत्यारूढेनैव क्रमविशेषेण जराराजशब्दयो-र्भिन्नपदत्वसिद्धिः । तेन ध्वनिधर्माणामेव दीर्घोदात्तक्रमादीनां वर्णेषु समारोपितानां स्मृत्यारूढानामर्थाभिधानाङ्गत्वान्न किञ्चि-दनुपपन्नम् आह च ॥

"तद्वशेन च वर्णानां व्यापित्वे ऽपि क्रमग्रहः ।
एवं ध्वनिगुणान् सर्वान् नित्यत्वेन व्यवस्थिताः ॥
वर्णा अनुपतन्तः स्युरर्थभेदावबोधका" इति ॥

तत्सिद्धं न वर्णातिरिक्तमनवयवं पदमस्तीति । भागा-वगमादेव वाक्यमपि नानवयवं सिध्यति । कथं तर्हि वाक्यार्था-वगतिः । पदार्थवदिति ब्रूमः यथा वर्णेभ्य एव संहितेभ्यः पदार्थो ऽवगम्यते तथा तेभ्य एव वाक्यार्थो ऽपि तत्प्रतीत्येक-कार्यकरणाच्च बहवो ऽपि वर्णा एवैकं वाक्यमित्युच्यते आह ।

१ व्यङ्ग्ये इत्युभयोः पाठः ।

"अपेक्षते न वा वाक्यं स्वार्थसंगतिसंविदम्।
परस्मिन् सर्वसंवित्तिः पूर्वस्मिन्न तु कस्य चिदि"ति॥

यदि तावदगृहीतसंबन्धमेव वाक्यं वाक्यार्थमभिदध्यात्ततः सर्वेषामपि वाक्यश्राविणां वाक्यार्थसंवित्तिः स्यात्। न चाव्युत्पन्नपदपदार्थसंगतीनां जायते। अथ तु पदवद्वाक्यमपि स्वार्थेन सम्बद्धसंविदमपेक्षते ततोऽपूर्ववाक्यश्रवणे न कस्य चिदपि वाक्यार्थावगतिः स्यात्। अथ पदपदार्थव्युत्पत्तिरङ्गं वाक्याद्वाक्यार्थप्रतीतावपीत्युच्यते तदयुक्तं यदि हि वाक्यान्तवर्णः पूर्वपूर्ववर्णजनितसंस्कारसहितः स्मृत्यारूढा वा वर्णाः पदार्थेभ्यो ऽर्थान्तरमभिदधति तर्हि पदपदार्थसंवित्तत्र कथमिवोपकारं कुर्यात्। पदार्थज्ञानमिति चेन्न तेनाप्युपकारादर्शनात्। न हि वाक्याद्वाक्यार्थप्रतीतौ पदजनितपदार्थज्ञानेन कश्चिदुपकारः। को ऽपि नाम कल्प्यतइति चेत्तर्ह्यदृष्टकल्पनैव दोषः। किं चाल्पैरेव पदैरावापोद्वापभेदेन बहूनि वाक्यानीह रच्यन्ते तत्र सर्वेषामेव शक्तिं कल्पयतो महान् क्लेशः न च वाक्यार्थप्रतिपत्तेरनुपपत्तिः यत इमां वेदनामनुभवेम। लोकसिद्धार्थाभिधायिभिः पदैरेव तदुपपत्तेः। कथं पुनस्तैरपूर्ववाक्यार्थावगतिस्तत्र टीकाकारस्तावदाह।

"पदार्थानेव वाक्यार्थं मिथः संगतिशालिनः।
आचक्षते ऽभिधीयन्ते पदैस्ते च तथाविधाः"॥

पदार्था एव तावत्परस्परान्विता वाक्यार्थ इत्युच्यते ते च तथाभूता एव स्वपदैरभिधीयन्ते। तेन पदमेव वाक्यार्थस्य प्रमाणमिति। न चार्थस्वरूपमेव पदाभिधेयं नान्वितमिति वाच्यम्।

पदानन्तरजाता हि संविदन्वितगोचरा।
अन्विताथाभिधायित्वं पदानामुपकल्पयेत्॥४॥

विशिष्टार्थविषयदर्शनेन हि व्यवहरमाणस्य विशिष्टविषयैव व्युत्पित्सुना संविदनुमीयते सा च पदश्रवणानन्तरं जायमाना तत्कारणिकैव निश्चीयते । यद्यपि च पदसंघातश्रवणानन्तरं विशिष्टज्ञानं जायते तथा ऽपि

न संघातात्मना वाक्यं वाक्यार्थस्याभिधायकम् ।
अन्वयव्यतिरेकाभ्यां भागशस्तत्तु वाचकम् ॥५॥

गामानयाश्वमानयेत्यादौ गवादिपदावापे गवादिपदार्थावापात् तदुद्वापे चोद्वापाद्वाक्यभागानामेव वाक्यार्थभागवाचकत्वावगमात् न संघातस्य वाचकत्वं वाच्यत्वं वा सम्भवति व्यभिचारात् संबन्धग्रहणासंभवाच्च । आनन्त्याद्वाक्यवाक्यार्थानां न संगत्यवगमः संभवति । भवत्पक्षे वा कथमनन्तानामेकपदाभिधेयत्वम् अन्विताभिधायि हि पदम् । अन्यच्च गवान्वितादानयनादश्वान्वितमानयनं तत्कथमत्र संबन्धग्रहणमव्यभिचारो वा तदुच्यते ॥

संनिध्यपेक्षायोग्यत्वैरुपलक्षणलाभतः ।
आनन्त्ये ऽप्यन्वितानां स्यात्संबन्धग्रहणं मम ॥६॥

आकाङ्क्षितं संनिहितं योग्यं च पदार्थान्तरं तेनान्वितं स्वार्थमभिदधति पदानीति एकेनैवोपलक्षणेनानन्तानामपि वाच्यत्वं सुज्ञानमेव । अव्यभिचार एवान्यादृशे प्रयोगप्रतिपत्त्योरसम्भवात् । संघातस्यैव तर्ह्यनेनैव प्रकारेण सम्बन्धग्रहणं सम्भवति । येषां पदानां यदन्विताभिधायित्वं भवतेष्यते तत्पदसंघातस्तदर्थसंघातस्याभिधायक इति शक्यते एव सङ्गतिरस्माभिरवगन्तुमिति न कश्चिद्विशेषः । सत्यमेतत् शक्तिकल्पनागौरवात्तु नैतदुपपद्यतइत्युक्तम् । अन्विताभिधानमपि तर्ह्यनुपपन्नं

गौरवादेव स्वरूपमात्रमेव तु लाघवात्पदानामभिधेयं वरमाश्रितं तन्न अन्वितप्रतिपत्तेर्निर्मूलत्वप्रसङ्गात् । न हि तस्या मूलान्तरमुपलभ्यते स्वरूपेणैव पदैरभिहिताः पदार्थाः परस्परव्यतिषक्तमात्मानं प्रतिपादयन्तीति चेत् न अदर्शनात् ।

> प्रमाणान्तरविज्ञातैः पदार्थैर्न हि दृश्यते ।
> वाक्यार्थवेदनं शब्दप्रतीतेः कारणन्त्वथ ॥७॥
> शक्तित्रयं प्रकल्प्यं स्यात्पदानामर्थगोचरा ।
> अर्थानामन्विते शक्तिस्तदाधायकता पदे ॥८॥

न हि प्रमाणान्तरावगतानां प्रतिलब्धाकाङ्क्षादित्रयसहायानामपि व्यतिषङ्गप्रतिपादकत्वं दृश्यते न हि देवदत्तमुपलभ्य को ऽस्य पितेत्यपेक्षमाणः सन्निहितमपि यज्ञदत्तं योग्यमपि सहसैवाध्यवस्यति पितरम् । अथान्यत्राविदितमपि शब्दप्रतीतानामेवार्थानामन्वितप्रतिपत्तिकारणत्वं कल्प्यतइति ते मतम् एवन्तर्हि शक्तित्रयमदृष्टं कल्पितं स्यात् । पदानान्तावत्पदार्थाभिधानशक्तिः अर्थानाञ्चान्वितप्रतिपादनशक्तिः पदानाञ्च पुनस्तच्छक्त्याधायकत्वशक्तिरिति कल्पनागौरवाद्वरमेकैव पदानामन्वितगोचरा शक्तिरभ्युपगता । न त्वया ऽन्वितगोचरं शक्तिद्वयं कल्पितव्यम् तत्कथमेका शक्तिरित्युच्यते सत्यमेतत्तथा ऽपि शक्तित्रयकल्पनाल्लाघवमस्त्येव । किञ्च न पृथगन्वये शक्तिः कल्पितव्या । एकैव तु शक्तिरन्वितपर्यन्ता कल्प्यते अतः कल्पनालाघवादन्विताभिधायित्वमेव वरम् । यद्यपि कथञ्चिच्छक्तिकल्पना समाना भवेत् तथा ऽपि प्रथमावगतानामभ्युपेततात्पर्याणाञ्च पदानामेवान्विताभिधायकत्वं युक्तमेवाङ्गीकर्तुम् । एवञ्च शाब्दत्वमपि वाक्यार्थस्य समञ्जसं भविष्यति इतरथा

क्लिष्टं स्यात्। ननु सामान्यं पदार्थस्तच्च नान्तरेण विशेषमात्मानं लभते इति तद्विशेषमाक्षिपति विशेष एव च वाक्यार्थ इत्युच्यते। पदार्थस्वरूपं हि सर्वावस्थानां सामान्यम् अन्विततता चास्यावस्थाविशेष इति पदार्थ एव वाक्यार्थे प्रमाणमिति। नैतद्युक्तम्। यद्यपि सामान्यं विशेषमाक्षिपति तथा ऽपि अस्ति कश्चिद्विशेष इत्येतावन्मात्रमाक्षिप्येत नियतैकविशेषविषयाक्षेपस्तु दुर्लभ एव प्रमाणाभावात् तेन गामानयेति गवैवान्वितमानयनं न प्रतीयते। मत्पक्षे त्वाकाङ्क्षाद्युपलक्षणशालिनैवार्थान्तरेणान्वितं पदस्याभिधेयमिति युक्तम् यद्गवान्वितमानयनं प्रतीयते गौर्हि स्वपदेन सन्निहितो नार्थान्तरमिति नियतावगतिसिद्धिः॥

न च सन्निध्यपेक्षत्वे भवेदन्योन्यसंश्रयः।
न केवलाभिधानेन स्मृत्या ऽपि हि भवेदसौ॥९॥

न चैवं वाच्यं यदि संनिहितेनार्थान्तरेणान्वितं स्वार्थमभिधत्ते ततो गामानयेत्यत्र गोशब्देन तावत्स्वार्थो नाभिधातव्यः यावदानयतिना न स्वार्थो ऽभिहितः तेनापि हि स्वार्थे गोशब्देनानभिहितेन स्वार्थो ऽभिधेयः स्यादिति व्यक्तमेवेतरेतराश्रयमिति। न ह्यवश्यमभिधानसन्निहितेनैवार्थेनान्वितं शब्देनाभिधेयं यतो ऽयं दोषः स्यात् सन्निधिमात्रस्य तदुपलक्षणत्वात्। सन्निधेश्चान्तरेणाऽप्यभिधानं स्मृत्या ऽपि संभवात्। सर्वाणि हि पदानि प्राक्प्रतियोगिसन्निधेर्निमित्तभूतमर्थस्वरूपं स्मारयन्ति ततो न्यायावधारितवचनव्यक्तीनि स्वार्थमभिदधतीति न कश्चिद्दोषः। नन्वसन्निहितेनापि नियोज्येनान्विताभिधानं विश्वजिदादौ दृष्टं न तत्राप्यध्याहारेण सन्निधिलाभात्। न ह्यवश्यं शाब्द एव सन्निधिस्तदुपलक्षणं द्वारं द्वारमित्यादाव-

शाब्दैरेव संवरणादिभिरन्विताभिधानस्य लोकदृष्टत्वात् । एवन्तर्हि प्रत्यक्षेणाश्वे सन्निहिते गौरानीयतामित्यत्रानयतिर्गवाश्वयोरुभयोरपि शब्दप्रत्यक्षाभ्यां सन्निहितत्वान्न गवैव केवलमन्वितमानयनमभिदध्यात् सन्निध्यपेक्षायोग्यत्वानामुभयत्राविशेषात् । नैष दोषः । गवान्वयेनैवानयतेराकाङ्क्षोपरमात् अश्वान्वये प्रमाणाभावात् । कथमुभयोः सन्निधाने सति गवैव नैराकाङ्क्ष्यं नाश्वेन नन्वेवं सति विपर्ययः कस्मान्न भवति अश्वेन नैराकाङ्क्ष्यान्न गवान्वयः सम्भवतीति । न सम्भवति विपर्ययः अश्वान्वये गोपदस्याकाङ्क्षानुपरमात् । ननु तस्यापि प्रत्यक्षाद्यवगताभिः स्थित्यादिभिरेव क्रियाभिराकाङ्क्षा विरमेत्तेन प्रमाणान्तरेण स्थितावश्वे च सन्निहिते गौरानीयतामित्युक्ते गौस्तिष्ठत्यानीयतामश्व इति वाक्यद्वयं प्रतीयेत तन्न एकवाक्यत्वावगमात् । यावन्ति हि पदानि संहत्य प्रयुज्यन्ते तावतां सति सम्भवे संहत्यैकविशिष्टार्थप्रतिपत्तिपरत्वं लोके दृष्टम् तच्च श्रुतयोरेवान्वये निर्वहति । अन्यथा बाध्येत । किञ्चैकेनैवान्वयेनोभयोराकाङ्क्षोपरमसम्भवे ऽनेकान्वयकल्पनमयुक्तं गौरवात् । तस्मात्पदान्येवान्विताभिधायीनि वाक्यार्थस्य प्रमाणमिति । अत्राभिधीयते नैतन्मतमप्युपपत्तिमत् ।

> अदृष्टकल्पनैतस्मिन् मते हि स्याद्गरीयसी ।
> दृष्टबाधप्रसङ्गश्च तस्मादभिहितान्वयः ॥ १० ॥
> दृष्टानुगुण्यं तत्र स्यात्कल्पना च लघीयसी ।

अन्विताभिधायित्वे हि पदानामवश्यमेव विशेषणभूतो ऽप्यन्वयो ऽभिधातव्यः । अन्यथा ऽन्वितप्रतीतेरुत्पत्त्ययोगात् । ततश्चान्वयान्वितशक्तिद्वयकल्पनाद्दृष्टकल्पना [illegible] स्यात्

ननूक्तं न पृथगन्वये शक्तिः कल्प्यते एकैव हि साऽन्वितपर्यन्ते कल्प्यतइति तदयुक्तम् ।

शक्त्यैकया कथं हि स्यादुभयोरभिधेयता ।
एक एव विशिष्टोऽर्थः सत्यमन्यद्विशेषणम् ॥ ११ ॥

यद्यपि हि विशिष्टरूपोऽर्थ एक एव तथाऽपि विशिष्टाद्विशेषणमन्यदेव तस्मिन्नगृहीते न तद्विशिष्टं विशेष्यं ग्रहीतुं शक्यते न च तस्य प्रमाणान्तरं ग्राहकमस्तीति शब्देनैव तदभिधानपुरःसरं विशिष्टमभिधातव्यमिति शक्तिद्वयकल्पनाद्गौरवं स्यात् । तस्मात्स्वरूपमात्रमभिधातव्यमिति युक्तम् । न चैवं वाक्यार्थप्रत्ययस्या[1]नुपपत्तिः यतः ।

स्यात्स्वरूपाभिधानेऽपि धीर्विशिष्टार्थगोचरा ।
विशेषधीर्हि सामान्यादनायासेन सिद्ध्यति ॥ १२ ॥

सर्वावस्थासामान्यात्मनि पदार्थस्वरूपे पदेनाभिहिते तत एवान्वितरूपावस्थाविशेषप्रतीतिसिद्धेर्न तावदभिधाशक्तिरुपकल्पयितुं शक्यते । यच्चैवं सति गौरानीयतामित्यत्र कारकेण क्रियया च क्रियाकारकमात्राक्षेपान्न नियमेन गौरानयनेनानयनं गवा ऽन्वयं लभेतेत्युक्तम् तत्रोच्यते ।

तुल्योऽभिधानपक्षेऽपि स दोषः शब्दगोचरः ।
यत्तु तत्रैकवाक्यत्वं पदार्थेष्वपि तत्समम् ॥ १३ ॥

योऽप्याभिधानिकमन्वयमिच्छति तस्यापि तुल्योऽयं दोषः । प्रमाणान्तरेण क्रियान्तरे स्थित्यादिके कारकान्तरे चाश्वादिके सन्निहिते सति गौरानीयतामित्येतत्पदद्वयमुच्चारितं सन्निध्यपेक्षायोग्यत्वानामविशेषात् स्थित्यन्वितां गामानयनञ्चा-

१ प्रत्ययस्येति २ पु० नास्ति ।

श्वान्वितमभिदध्यान्न नियमेन गवानयनान्वयसिद्धिरिति तत्र यदुत्तरं तथा सत्येकवाक्यत्वं बाध्येतेति तत्पदार्थेष्वपि समानम्। यद्यपि गोपदार्थेन क्रियामात्रान्वय आक्षिप्यते आनयेत्यर्थेनापि कारकमात्रान्वयः तथाऽपि तत्प्रतिपादकयोः पदयोरेकविशिष्टार्थप्रतीतिपरत्वैकलक्षणैकवाक्यत्वावगमात् तन्मा बाधीति श्रुतयोरेव परस्परनियमः यत एव चायं नियमः पदान्तरसमभिव्याहारात्मकाद्वाक्यादेव सिध्यति न पदार्थसामर्थ्यमात्रादत एव शब्दस्य प्रमाणान्तरत्वमन्यथाऽनुमानं स्यात्। तेन पदार्थसामर्थ्याद् अनियमेनानेकवाक्यार्थपरिप्लवे सत्स्वप्यसत्स्वामपि वाक्यार्थविशेषव्याप्तौ परस्परसमभिव्याहारादेव विशिष्टवाक्यार्थावगतिसिद्धिः। आह च

"तत्रानैकान्तिकानेकवाक्यार्थोपप्लवे सति।
अन्योऽन्यात्मव्यवच्छेदादेकत्र स्थाप्यते मतिः॥
अतोऽन्वयातिरेकाभ्यामनुमाने यदिष्यते।
एकार्थैकान्तिकत्वं तदन्यथैवात्र लभ्यत"इति॥

यदनुमाने व्याप्तेः फलमेकार्थनिर्णयलक्षणं तदत्रान्यत एव पदान्तरसमभिव्याहारलक्षणाद्वाक्यात्सिध्यतीत्यर्थः। तेनैतदुक्तं भवति उभयोरपि वादिनोरनेकसाधारणान्वितप्रतिपादकशक्तेरेकवाक्यतया मिथो नियम्यते इत्येतावदवश्यं कल्पनीयम्। तव प्रमाणान्तरेण क्रियान्तरे सन्निहिते पदान्तरेण चानयने गोपदमाकाङ्क्षाद्यविशेषादुभयान्वितगोप्रतिपादनसमर्थमप्यानयत्येकवाक्यतया तदन्वितमेव स्वार्थमभिधत्तइति कल्प्यम्। मम तु गोपदार्थः स्वभावादेव येन केन चिदन्वितं स्वमात्मानं प्रतिपादयितुं समर्थः पदान्तरैकवाक्यतया तदर्थान्वितमेवात्मानं प्रतिपादयतीति कल्प्यमित्येतावदावयोस्तुल्यत्वम्। पदस्य तु भवान् विशिष्टे शक्तिं कल्पयति वयन्तु स्वरूपमात्रे इति महान्

विशेषः । अपेक्षाभावाददोष इति चेन्न । सत्यामप्यदर्शनात् । स्यादेतत् । न वयं साधारणी पदशक्तिरेकवाक्यतया नियम्यत-इति कल्पयामः कथन्तर्ह्यर्थान्तरेणान्विताभिधानं न भवति अपेक्षाभावात् । सा ह्यन्विताभिधानोपलक्षणम् । न च प्रमाणान्तरप्रतीतयोः क्रियाकारकयोरपेक्षा विद्यते श्रुतयोस्त्वपेक्षा सा च परस्परसंबन्धादपि निवर्तते इति नार्थान्तरान्वयप्रसङ्ग इति तन्नैवम् सत्यामप्यपेक्षायामन्वयाऽदर्शनात् । भवति हि कदा चिदियमवस्था यदैकस्मिन् देशे ह्रेषादिशब्देनाश्वमनुमाय तस्य क्रियाविशेषं जिज्ञासते किमश्वो गच्छति तिष्ठति वेति । प्रदेशान्तरे च पदनिक्षेपशब्देन गतिमनुमाय कारकविशेषं जिज्ञासते किमत्र गौरश्वो वा गच्छतीति तस्यामवस्थायां गौस्तिष्ठतीति पदद्वयं कश्चिदुच्चारयति । तत्र यद्येकवाक्यत्वं नियामकं नेष्यते ततो ह्रेषादिशब्दानुमितस्याश्वस्य क्रियाविशेषापेक्षत्वात्तिष्ठतीति पदावगतायाः क्रियायाः कारकविशेषापेक्षत्वात्परस्परान्वयः स्यात् तिष्ठत्यश्व इति । तथा पदविक्षेपशब्दानुमितस्य गमनस्य कारकापेक्षत्वाद्गोपदावगतायाश्च गोः क्रियापेक्षत्वादन्योन्यान्वयः स्यात् । गौर्गच्छतीति न नियमेन गौस्तिष्ठतीत्यन्वयः सिध्येत् सन्निध्यपेक्षायोग्यत्वानामविशेषात् । न चैवं दृश्यते । न च पदसामर्थ्यमेव पदान्तरस्मारितान्वितस्वार्थविषयावबोधनाय व्यवस्थापकमिति वक्तव्यम् अशाब्दैरप्यन्विताभिधानस्येष्टत्वात् । तस्मान्न पदसामर्थ्यान्नियमसिद्धिः । अत एकवाक्यतैव शरणमर्थनीया नियतैकान्वयबोधनाय पदैरप्यन्विताभिधायिभिः सा च पदार्थैरपि स्वभावसिद्धान्वयबोधनसामर्थ्यैस्तन्नियमायापेक्षितुं क्षम्यतइति कृतमन्विताभिधानपरिकल्पनव्यसनेन । किञ्च धवखदिरावित्यादिषु युगपदधिकरणे द्वन्द्व इत्यभ्युपगमाद्वाचकत्वानभ्युपगमाच्च अवश्यं खदिरो द्विवचनान्वयाय सद्वितीयमात्मानं लक्षयति

नाभिधत्ते येन केनापि सद्वितीयस्य तदन्वयोपपत्तौ किमिति धवसद्वितीयमेवात्मानं लक्षयति। तदेकवाक्यत्वादिति चेत्तर्हि तदेव सर्वत्र पदार्थानामन्यान्वितात्मलक्षणायां कारणं भवतीति न कदाचिदक्लृप्तकल्पनम् । तुल्यैव शक्तिकल्पना स्यात्तथाऽपि पदार्था एव वाक्यार्थे प्रमाणं युक्तमङ्गीकर्तुं न पदान्यानन्तर्य-व्यवधानाभ्याम् । अन्विताभिधानवादेऽपि हि पदैः पदार्थेष्ववगतेषु पश्चाद्वाक्यार्थज्ञानं जायतेऽन्यथा सन्निधेर्दुर्लभत्वात् । ते तु तैरभिहिताः स्मारिता वेत्यत्र विवादः सर्वथा तावत्पदग्र-हणानन्तरं पदार्थेषु प्रतीतेषु वाक्यार्थावगतिरित्यविवादम् । तत-श्चानन्तरानुभूतपदार्थातिक्रमेण व्यवहितानि पदानि न युक्तं यद्वाक्यार्थावगतेः कारणं भवन्तीति कल्पयितुम् । न च पुनः पदानुसन्धानमस्तीति । किञ्च न प्रमाणमस्ति । किञ्च दीर्घतमेषु वाक्येष्वशक्यमेवानुसन्धानम् । असत्यपि च तस्मिन् पदार्था-नुसन्धानमात्रेण वाक्यार्थः प्रतीयतइति सर्वजनीनमेतत् । तेन दृष्टानुगुण्यादपि पदार्थनिमित्तक एव वाक्यार्थो न पदनिमि-त्तः दृष्टबाधप्रसङ्गात् । तदाह ।

"पदार्थानाञ्च सामर्थ्यं गम्यमानमपह्नवम् ।
आनन्तर्याद्धि वाक्यार्थस्तद्धेतुत्वं न मुञ्चती"ति ॥

एतेन यत्पदानामेवान्विते सामर्थ्यमित्यत्र कारणमुक्तं प्रा-थम्यादिति तद्विपर्ययस्तावनमिति प्रतिपादितव्यम् । यत्तु तात्पर्यात्प-दानामेव साक्षादन्वितप्रतिपादकत्वं युक्तमित्युक्तं तत्काष्ठानाम-नपेक्षितज्वालानां पाकसाधनत्वमाग्नेयादीनाञ्चातन्त्रितावान्तर-व्यापाराणां परमकार्यसाधनत्वमापादयेत् । अथ तत्राग्नेयादि-स्वरूपेषु तिरोहितेषु जायमानं परमापूर्वं न तैः साक्षाज्जनयितुं शक्यते तात्पर्यञ्चावान्तरव्यापारद्वारेणापि साधयतामविरुद्धमि-त्युच्यते तदत्रापि समानम् । अत्रापि हि तिरोहितेष्वेव पदेषु

पदार्थानुसन्धानानन्तरमवगम्यमानस्य वाक्यार्थस्य पदार्था एव साक्षात्साधनं पदानि तु तद्द्वारेणैव साधनं न साक्षादिति । नन्वेवमभिधायकत्वं पदानां न स्यात् पदार्थस्वरूपावगतेः स्मरणादविशिष्टत्वात् । स्मारकत्वमेवास्तु नाभिधायकत्वं भवत्वेवमिति केचित् । तथा च

"भावनावचनस्तावत्तां स्मारयति लोकवत् ।
पदमप्यधिकाभावात्स्मारकान्न विशिष्यते ॥
तेऽपि नैवास्मृता यस्माद्वाक्यार्थं गमयन्ति नः ।
तस्मात्तत्स्मरणेष्वेव सङ्गतेषु प्रमाणता" ॥

इत्याहुः । अन्ये त्वाहुः । प्रत्यासत्तिनिमित्तं स्मारकत्वं न च पदपदार्थयोः संयोगसमवायादिलक्षणा प्रत्यासत्तिरस्ति यतः स्मारकत्वं स्यात् । वाचकत्ववदिति चेन्न तस्य स्वाभाविकत्वात् । स्यादेतत् । यथा सम्बन्धान्तराभावेऽपि वाचकत्वमेवं स्मारकत्वमपि भविष्यति । तन्नैवम् । स्वाभाविकत्वाद्वाचकत्वस्य प्रत्यायकत्वं हि वाचकत्वं तच्च स्वभावशक्त्याऽप्युपपन्नं चक्षुरादीनामिव रूपादिषु । ननु तत्रापि संयोगसंयुक्तसमवायतत्समवायलक्षणः सम्बन्धो विद्यतएव । सत्यम् । स तु रसादिसाधारणः । शक्तिरेव त्वसाधारणं प्रत्यायकत्वे निमित्तम् । तच्छब्दस्यापि स्वाभाविक्यैव शक्त्या प्रतिपादकत्वं भविष्यति स्मारकत्वं तु संस्काराद्बोधन । न च सम्बन्धपर्यान्तरादर्शनेनासावुद्बोधयितुं शक्यते क्वचिदप्यदर्शनात् । ननु प्रत्यायकत्वमप्यसम्बन्धिनो नैव दृष्टम् । स्वाभाविकशक्तिशालिनामपि चक्षुरादीनां सम्बद्ध्यैव प्रतिपादकत्वात् अन्यथा दविष्ठानामपि ग्रहणप्रसङ्गात् । शब्दस्य तु न कश्चिदर्थेन सम्बन्धोऽस्ति । तत्कथमस्य प्रत्यायकत्वम् । अथान्यत्रादृष्टमपि तदिहैव कल्प्यते तर्हि स्मारकत्वमेव किमिति न कल्प्यते । वक्तव्यो वा विशेषः ।

स उच्यते । सर्वथा तावदन्यत्रासम्बन्धिनोऽदृष्टमपि स्मारकत्वं प्रत्यायकत्वं शब्दस्य वा कल्प्यम् । तत्र प्रत्यायकत्वकल्पनमेव ज्यायः । शब्दानन्तरमर्थप्रत्ययदर्शनात्तस्यैव तत्र कारणत्वं कल्पयितुं युक्तं न तु शब्दात्संस्कारोद्बोधः ततश्चार्थप्रतीतिरिति युक्तं प्रणाल्यां प्रमाणाभावात् । तस्मादभिधायकमेव पदं न स्मारकमिति । गृहीतग्राहित्वात्स्मरणमेव पदजनितं विज्ञानमिति चेत्तदसत् अतल्लक्षणत्वात् । न गृहीतग्राहित्वं लक्षणं स्मरणस्य किन्तु संस्कारमात्रजन्यत्वं प्रत्युत्पन्नकारणजनितं तु यद्गृहीतग्राहि ज्ञानं तदनुवाद इत्युच्यते न स्मृतिरिति । कथन्तर्हि वार्तिकघटना सत्यं घटतएवानुवादस्यापि गृहीतग्राहितया स्मरणादविशिष्टत्वात् । "भावनावचनस्तावत्तां स्मारयति लोकवदि"त्यादिष्वौपचारिकः स्मरणव्यवहारः । तथा च "पदमप्यधिकाभावात्स्मारकान्न विशिष्यत" इत्याह । न तु स्मारकमिति दर्शयति तेनार्थस्वरूपमात्रेऽपि वाच्येऽभिधायकत्वं पदस्य युक्तमिति ।

प्राथम्यं कारणं यत्तु तद्विपर्ययसाधनम् ।
ये तात्पर्याऽभिधातृत्वे तेऽप्यनैकान्तिकीकृते ॥ १४ ॥

इति संग्रहश्लोकः । किञ्च यद्यभिधानत पदान्वितप्रतीतिः कथन्तर्हि [गङ्गायां घोष इत्यादिषु लाक्षणिकस्य तीरादेर्घोषान्वितस्य प्रतिपत्तिः । न हि तत्स्वरूपमपि गङ्गाशब्दस्याभिधेयं प्रागेवान्वितम् । अथोच्येत] गङ्गाशब्देन निमित्तभूतेऽर्थस्वरूपे स्मारिते सति तेन यत्संबन्धात् स्मारितं तीरस्वरूपं तेनान्वितं स्वार्थं घोषशब्दोऽभिधत्ते गङ्गाशब्दस्तु तीरस्मरणमात्रोपयो-

[ ] एतच्चिन्हगो ग्रन्थो २ पु० नास्ति ।

गीति । यत्र तर्हि सर्वपदानामेव लाक्षणिकार्थत्वं न कस्य चिदपि मुख्यो ऽर्थो विद्यते तत्र कथमन्वितप्रतिपत्तिः ।

अस्ति वा तादृशं वाक्यं सत्यं यत्र न विद्यते ।
कार्यं तदान्वितं वापि यथा गच्छति भूमिपः ॥ १५ ॥

सर्वेषामेव पदानां कार्यं तदन्वितं वा ऽभिधेयम् । लिङादीनां कार्यमन्येषां तु तदन्वितम् । यस्तु लोके कुतूहलप्रश्नप्रतिवचनरूपः सिद्धार्थविषयः शब्दप्रयोगः कार्यशून्यो दृश्यते यथा को ऽयं गच्छति भूमिपो गच्छतीत्यादिः कवीनां वा ऽर्थविशेषवर्णनारूपः यथा ।

नीलोत्पलवनेष्वद्य चरन्तश्चारुसंरवाः ।
रामाः कौशेयसंवीताः कादम्बा इव शोभनाः ॥

इत्यादिः स लाक्षणिक इति हि भवतां समयः । तत्रापि चान्वितसंविदस्त्येव । न चासौ पदैरुदेतुमर्हति तेषामतदभिधायकत्वात् । न हि भूमिपशब्दस्य कार्यान्वितस्वार्थाभिधायित्वादाकाङ्क्षादित्रयशालिना ऽपि गच्छत्यर्थेनान्वितः स्वार्थो ऽभिधेयः तथा गच्छतेरपि तदन्वितो ऽनभिधेय एवेति न पदनिमित्तान्वयप्रतीतिर्भवेत् । तेनावश्यं पदस्मारितनिमित्तभूतार्थस्वरूपाभ्या- [illegible]न्वितसंविदुदयमासादयतीत्यकामेनाप्यनुज्ञातव्यम् । ततश्च सर्वत्रैव तथा ऽस्तु किमन्विताभिधानकल्पनया ।

अथ त[1]त्रानुमानेन संविदन्वितगोचरा ।
जायते न पदैर्नापि पदार्थैरिति मन्यसे ॥ १६ ॥

---

१ अथात्राप्यनुमानेनेति २ पु० पा० ।

यथा सिद्धार्थेषु न पदनिमित्ता वाक्यार्थसंवित्तथा पदार्थनिमित्ताऽपि न भवति किन्त्वनुमाननिमित्ता । वाक्यरचना हि पौरुषेयी विशिष्टार्थविवक्षापूर्विका तामनुमापयति । सा च स्वकारणभूतं विशिष्टविज्ञानं तेन च विषयभूतार्थानुमानसिद्धौ न सर्वपदार्थानामन्वितत्वप्रतिपादनसामर्थ्यमुपकल्पयितुं शक्यते इति । यद्येवम्

यत्रापि कार्यसंवित्तिस्तत्राप्येवं प्रसज्यते ।
पदानामपि सामर्थ्यमन्विते ऽतो न सिध्यति ॥१७॥

गामानयेत्यादिष्वपि त्वदुक्तयैव नीत्या ऽनुमानपरम्परया विशिष्टकार्यावगतिसिद्धेर्न पदानामप्यन्विताभिधायित्वं सुकल्प्यम् । अत्रोच्यते ।

यदर्थविषयं वाक्यं तेनासावनुमीयते ।
नान्यस्तेनान्विते सिध्येत्पदानां शक्तिनिर्णयः ॥ १८ ॥

विशिष्टार्थविषयव्यवहारदर्शनेन हि व्यवहरमाणस्य तद्विषयमेव विज्ञानमुत्पन्नमित्यवश्यमङ्गीकर्तव्यम् । न च तद्वाक्यमात्रात्सिध्यति किन्तु विशिष्टवाक्यावगमात् । तस्य चार्थाभिधायित्वमेव विशेषः । विशिष्टवाक्यार्थप्रतिपादकेन हि वाक्येन तद्विषयविवक्षां वक्तुरनुमाय ततो विशिष्टार्थविषयविज्ञानानुमानद्वारमर्थविशेषमनुमाय प्रयोज्यवृद्धो विशिष्टार्थव्यवहाराय घटते नान्यथा । तेनावश्यं विशिष्टार्थप्रतिपादकत्वं वाक्यस्याभ्युपगन्तव्यम् । तच्चान्वयव्यतिरेकाभ्यामवयवशक्तावेवेति सिद्धं पदानामन्विताभिधायित्वमिति । यद्येवम्

सिद्धार्थेभ्यो ऽपि वाक्येभ्यो विशिष्टार्थावबोधनात् ।
पदानाञ्चासमर्थत्वात्पदार्थानां निमित्तता ॥ १९ ॥

सिद्धार्थेभ्यो ऽपि हि वाक्येभ्यः पार्थिवो गच्छतीत्यादिभ्यो राजगमनादिरूपविशिष्टार्थविषयमेव विज्ञानमुपजायते तच्च वक्तुर्विशिष्टज्ञानानुमानात्। विशिष्टवाक्यरचनया च तादृशज्ञानानुमानम्। वाक्यस्य च विशेषस्तदर्थप्रतिपादकतया स्याद् नान्यथा। तेन विशिष्टार्थप्रतिपादकत्वं वाक्यस्याभ्युपगन्तव्यम्। तत्र च पदानां कार्यान्वितस्वार्थाभिधायिनामतादृशे सामर्थ्याभावात् पदार्थद्वारेणैव विशिष्टार्थप्रतिपादकत्वमभ्युपेतव्यम्। यद्युच्येत नावश्यमन्वितप्रतिपादकेनैव वाक्येन तद्विषयविज्ञानानुमानम् अर्थविशेषस्मारकपदसंघातविशेषादेव विशिष्टानुमानलाभात्। तथा हि ईदृशी व्याप्तिसंवित् यो येषां पदार्थानामितरेतरान्वययोग्यानां प्रतिपादकानि पदान्याप्तः समुच्चारयति तस्य तेषामन्वये ज्ञानमस्तीति एवञ्चान्तरेणापि पदार्थानामन्वितप्रतिपादकत्वं पदविशेषरचनयैव ज्ञानानुमानद्वारेण सिद्धार्थेषु विशिष्टवाक्यार्थानुमानसम्भवाद् न पदार्थनिमित्तत्वं वाक्यार्थस्य सिध्यतीति। एवन्तर्हि

कार्यार्थेभ्यो ऽपि वाक्येभ्य एवमेव प्रसिध्यति।
वाक्यार्थवेदनं तेन न सिध्येदन्विताथेता ॥ २० ॥

गामानयेत्यादिवाक्येष्वपि पदानां पदार्थस्वरूपाभिधायकत्वमात्रेणापि विशिष्टज्ञानानुमानपुरस्सरं विशिष्टवाक्यार्थानुमानसम्भवान्नान्विताभिधायित्वं सिद्ध्येत्। विनाप्यन्विताभिधायित्वं स्वरूपाभिधायकत्वमात्रेणापि येषां पदार्थस्वरूपाणामन्वययोग्यानामभिधायकानि पदानि येनाप्तेनोच्चारितानि स तदन्वयविदितीदृश्यैव व्याप्त्या विशिष्टज्ञानानुमानसम्भवात्। किञ्च स्वरूपमात्रमपि नाभिधेयं पदविशेषस्यैव वाचकत्ववद्विशिष्टार्थविषयेणैव विज्ञानेन व्याप्तिग्रहणसम्भवात्। यथा

हि वाचकत्वं प्रतिपदमर्थविशेषं प्रति गृह्यते गोपदं सास्नादिमतो वाचकम् अश्वपदं वाजिवाचकमिति । तथा तदन्वितार्थविषयविज्ञानव्याप्तिस्तस्य तस्य पदस्य ग्रहीतुं शक्यते । आप्तस्य गोपदरचनाकाङ्क्षितसंनिहितयोग्यार्थान्तरान्वितसास्नादिमद्विज्ञानपूर्विके[1]ति । ततश्च पदानाम्

अर्थस्वरूपवाचित्वमपि नैव प्रसिध्यति ।
प्रागेवान्वितवाचित्वमतो वेदाप्रमाणता ॥ २१ ॥

न ह्यपौरुषेयस्य वक्तृज्ञानानुमानद्वारं वाक्यार्थप्रतिपादकत्वं वेदवाक्यस्य सम्भवतीत्यप्रामाण्यं स्यात् । स्यादेतत् शब्दश्रवणसमनन्तरभाविनीं प्रयोज्यवृद्धस्य चेष्टामुपलभ्य विशिष्टार्थविषया प्रतीतिस्तस्य कल्प्यते । सा च शब्दानन्तर्यात्तत्कारणिकैवेति शब्दस्य तद्वाचकताशक्तिः कल्प्यते पश्चात्तु कस्य चिद्यथार्थपदरचनामुपलभ्य कथं व्यभिचारिणो वाक्यात्प्रयोज्यवृद्धस्यार्थनिश्चयः संजात इति विचिकित्सयैवमवधारयति । नूनमनेनैवायं वक्तैवमवधारितः नायमनन्वितार्थानि पदानि प्रयुङ्क्ते तेन नूनमेतेनैषामन्वयो ज्ञात इति ज्ञानानुमानपुरःसरमर्थं निश्चितवानिति कल्पयति । पूर्वावगतन्तु वाचकत्वं न मिथ्या मन्यते तस्मादस्ति वाचकत्वमिति । नैतत्सारम् ।

न हि कार्यादतज्जन्याच्छक्तिः शब्दस्य कल्प्यते ।
स्यात्तु तज्जन्यताभ्रान्तेर्भ्रान्तिः सा च निवर्त्स्यति ॥ २२ ॥

न हि प्रयोज्यवृद्धस्य शब्दानन्तरभाविनी प्रतिपत्तिः[2] शब्दजन्या यत्तस्य शक्तिं कल्पयेत् । शब्दानुमितवक्तृज्ञानलिङ्गजन्यत्वात् । न चान्यतो निष्पन्नं कार्यमन्यस्य शक्तिं कल्पयति

---

१ पूर्विकैवेति इति प्र० पु० पा० ।
२ प्रतीतिः उभय पु० पा० ।

अतिप्रसङ्गात् । यद्यपि च तस्यामवस्थायामजन्यत्वानवधारणाच्छब्दानन्तर्याच्छब्दजन्यत्वं भ्रान्त्या ऽवगम्य शब्दस्य शक्तिर्भ्रान्त्या ऽवगम्यते तथा ऽपि पश्चादतज्जन्यत्वमवगत्य तज्जन्यत्वभ्रान्तौ निवृत्तायां तन्निमित्ता शक्तिभ्रान्तिरपि निवर्तिष्यतएवेति धूमायमानधूममहिषजनितधूमध्वजविज्ञानवत् । तद्धि स्वरूपेणाबाधितमपि लिङ्गबाधादेव निवर्तते । तथा शब्दस्यापि वाचकत्वकल्पना कार्यस्यातज्जन्यत्वावधारणात् निवर्तितुमर्हति । नन्वनुमितमप्यर्थं पश्चादनुवदद्वाक्यं वाचकं शक्तं स्यात् । तन्न अनुवादकत्वे प्रमाणाभावात् । न ह्यनुवादकत्वमन्तरेण किञ्चिदनुपपन्नं यतस्तत्कल्प्येत । शक्तत्वादनुवादकत्वमिति चेत् तदितरेतराश्रयं शक्तेरनुवादस्ततश्च शक्तिरिति । तस्मान्न वाचकत्वं सिध्यति । यदि परमर्थविशेषविषयज्ञानानुमानसिद्ध्यर्थं पुनर्वाचकत्वमवस्थाप्येत तच्चान्तरेणापि वाचकत्वं शब्दविशेषस्य ज्ञानविशेषेणैव व्याप्तिग्रहणसम्भवादनुपपन्नं तस्माल्लोकवचसामनुमानत्वेन प्रामाण्याङ्गीकरणे पदानां वाचकत्वायोगादप्रतिपादकत्वेनाप्रामाण्यं वेदस्य स्यादिति तत्प्रामाण्यसिद्ध्यर्थं लोके ऽपि शब्दानां शब्दतयैव प्रामाण्यमभ्युपगन्तव्यम् । ननु मा भूत्तस्य प्रामाण्यं न तु तावता प्रमाणमन्तरेण वाचकत्वं कल्प्येत न हि किञ्चित्प्रमाणमस्ति यतः शब्दस्य वाचकत्वं कल्प्येत तदभावे ऽपि यथोक्तेन न्यायेनानुमानत एव लोके शब्दानन्तरमर्थावगमसम्भवात् । स्यादेतदेवं यद्याप्तवाक्यश्रवणादेवार्थबुद्धेर्जन्म स्यात् ।

जन्म तुल्यन्तु बुद्धीनामाप्तानाप्तगिरां श्रुतौ ।
न चानाप्तोक्तिजाता धीर्लिङ्गादुत्पत्तुमर्हति ॥ २३ ॥

[1]शब्दशक्तिरतः कल्प्या तदुत्पत्तिप्रसिद्धये ।
ये त्वनाप्तोक्तितो बुद्धेरनुत्पत्तिं प्रचक्षते ॥ २४ ॥
लिङ्गत्वं चाप्तवाक्यस्य तेषामेव तु दूषणम् ।
एतावानेव भेदः स्यादाप्तानाप्तगिरां मम ॥ २५ ॥
यत्रानाप्तोक्तिजातायाः प्रामाण्यं स्थाप्यते धियः ।
वक्तृदोषेण दुष्टत्वादाप्तोक्तेर्या तु जायते ॥ २६ ॥
प्रामाण्यं स्थाप्यते तस्या वक्तृधीहेतुसम्भवात् ।
बुद्धिजन्मोभयत्रापि विद्यतेऽतो न दूषणम् ॥ २७ ॥

अनन्यमनस्कानां स्तिमितान्तरात्मनां वक्तुर्धीविशेषं तस्य चाप्तानाप्तत्वमनाकलयतामेव यतः कुतश्चिदुच्चरन्ति पदानि सहसैव संविदमर्थगोचरामुत्पादयन्तीति सर्वजनीनमेतत् । न च तत्रानुमानं सम्भवतीति शब्दानामेव वाचकत्वशक्तिरवश्यं कल्पनीया तेन नास्माकं किञ्चिद्दूषणम् । ये तु सर्वजनासिद्धमप्येतदपह्नुत्यानुमानत्वमेव लौकिकवचसां सङ्गिरन्ते तेषामेव वेदाप्रामाण्यमापद्यते । न ह्यतदुत्पन्नाद्वाक्यार्थविज्ञानाच्छब्दस्याभिधायकत्वं कल्पयितुं शक्यते प्रागेवान्विताभिधायित्वम् असिद्धत्वादन्वितप्रतीतेः । न हि शब्दश्रवणानन्तरं प्रयोज्यवृद्धस्यान्वितसंविदुदये किञ्चन प्रमाणमस्ति यदन्वितार्थविषयता शब्दस्य सिध्येत् ।

प्रमाणमनुमानञ्चेन्न तद्धेतोरदर्शनात् ।
अथ[2] प्रवृत्तिलिङ्गत्वं तन्नानैकान्तिका हि सा ॥२८॥

---

१ इयं कारिका द्वि० पुस्तके नास्ति ।
२ अथ प्रवृत्तिलिङ्गञ्चेदित्युभय पु० पा० ।

स्यादेतद् अनुमानेन प्रयोज्यवृद्धस्यान्वितप्रतीतिरवगम्यत इति । तन्न अनुमानस्य लिङ्गादर्शनात् । ननु प्रवृत्तिरेव लिङ्गं सा हि विशिष्टावगतिपूर्विका तामनुमापयतीति । तन्न अनैकान्तिकत्वात्प्रवृत्तेः सा हि भवन्मते शुक्तिकायामिव रजतार्थिनो विवेकाग्रहणादपि सिद्ध्यति । तेन गामानयेत्यत्र गोप्रातिपदिकेन द्वितीयया धातुना विधिप्रत्ययेन च चतुर्ष्वर्थेषु स्वरूपमात्रेणाभिहितेषु अनभिहिते ऽप्यन्वये ऽनन्वयाग्रहादेव प्रवृत्तिसिद्धेर्नान्वितप्रतीतिः कल्पयितुं शक्यते । यो हि रजतमिदमिति पुरःस्थितवस्तुगोचरां संविदमुदीयमानां साक्षात्कुर्वाणो ऽपि क्लृप्तकारणानुपलब्ध्या ऽपहनुत्यान्यत्रादृष्टमपि भेदाग्रहणस्य प्रवृत्तिहेतुत्वम् अदृष्टकल्पनाविशेषे ऽपि दोषसहितेन्द्रियादेरयथार्थज्ञानजनकत्वमवगत्यनुसार्यकल्पयित्वा कल्पयति स कथं क्लृप्तप्रवृत्तिहेतुभावभेदाग्रहणादपि सिध्यन्त्या प्रवृत्त्या ऽनैकान्तिक्या ऽन्वितसंविदं परस्यानुमाय तत्कारणत्वेन चान्यत्राक्लृप्तमपि शब्दस्य सामर्थ्यं कल्पयन्न लज्जते । यच्चोच्यते भेदाग्रहणनिबन्धनस्य व्यवहारस्य विसंवादो भवति यथा तस्यैव शुक्तिकायां रजतव्यवहारस्य न च गामानयेत्यादिषु विसंवादः समस्ति तस्मान्नाग्रहणनिबन्धन इति । तदयुक्तम् अग्रहणनिबन्धनस्यापि ज्वालैकत्वव्यवहारस्य उष्णजलव्यवहारस्य चाविसंवाददर्शनात् । तथा

विधूमपावकाद्देशादूर्ध्वं बाष्पं विलोकयन् ।
अग्निसत्ताभिमानेन प्रवृत्तो न विहन्यते ॥ २९ ॥

इदमपरमुदाहरणं यदेकस्मिन् देशे विधूमो ऽग्निरवस्थितः तस्य चोपरि बाष्पोद्गमो भवति तं च कश्चिद्धूमं मत्वा ऽस्याधस्तादग्निरस्तीत्यभिमन्यमानो ऽग्न्यर्थी तदाजिहीर्षया यतमानो ऽग्नि-

प्रतिलम्भान्न विसंवादमृच्छति तदा तत्राग्रहणनिबन्धनस्यापि व्यवहारस्याविसंवादर्शनादनैकान्तिको व्यवहाराविसंवादो नान्वितज्ञानोत्पत्तिकल्पनायां कारणं (प्रमाणं) भवितुमर्हति। तदपरिकल्पनाच्च नान्विताथर्त्वं शब्दस्य सिद्ध्यतीत्यप्रामाण्यं वेदस्य वाक्यार्थं प्रति स्यात्। तदेवमन्वितज्ञानस्यासिद्धत्वात्सिद्धत्वे ऽपि तस्य शब्दशक्तिमन्तरेणैव वक्तृज्ञानानुमानद्वारेणात्मलाभसम्भवात् वाक्यजन्यत्वे ऽपि सिद्धार्थपरे[1]ष्विव वाक्येषु पदावगतपदार्थसामर्थ्यप्रभावितत्वसम्भवाद्भवन्मते तावदप्रमाणकं पदानामन्विताभिधायित्वमिति सिद्धम्। अस्मन्मते तु यद्यप्यग्रहणाधीनव्यवहारासंभवादनुमानत्वेन प्रामाण्यानङ्गीकारात् सिद्धार्थेष्वपि वाक्येषु शब्दानां श्रुतिवृत्तत्वादिसादिभिर्हेतुभिरन्विताभिधायित्वं निराकर्तुं न शक्यते तथा ऽपि दृष्टबाधात् कल्पनागौरवाच्च निरासः। कथं पुनः कल्पनागौरवम् एतावतीति हि शक्तिर्भवतो ऽन्विताभिधानमङ्गीकुर्वतः कल्पनीया पदानाम् आकाङ्क्षितयोग्यात्मकवाक्यभूतपदप्रतीतश्च यदर्थान्तरं तेनान्वितं स्वार्थमभिदधाति पदानीति न चैवमध्याहृतैः संवरणादिभिर्द्वारादेरनन्वयप्रसङ्गः तत्रापि भवन्मते संक्रियताभिसादिकस्य पदस्यैवैकवाक्यभूतस्याध्याहारात् तत्प्रतिपादितैः संवरणादिभिरन्वयसंभवात्। एतावती च पदार्थानामपि कल्पनीयैवेति न शब्दशक्तिकल्पनागौरवमस्माकमिति चेदुच्यते।

क्लृप्तमन्वितसामर्थ्यं पदार्थानां स्वभावतः।
एकवाक्यतया तत्र कल्प्यं नियममात्रकम् ॥ ३० ॥

---

१ सिद्धार्थपरेषु इति प्र० पु० पा०।

अक्लृप्तमेव सामर्थ्यं पदानामन्विते ऽर्थवत् ।
कल्प्यं स्वरूपक्लृप्तिश्च गुर्वी नियमकल्पनात् ॥३१॥

पदानां तावदर्थस्वरूपे शक्तिकल्पनमुभयोरपि पक्षयोरविशिष्टम् । अभिहितान्वयपक्षे पदार्थानामन्वितप्रतिपादकत्वसामर्थ्यं क्लृप्तमेव । नियममात्रमेकवाक्यतया कल्पयितव्यम् । तच्च लघीयः पदानान्त्वसन्ताक्लृप्तमेवान्वितप्रत्यायकत्वं कल्प्यं तच्च गरीयः दृष्टानुगुण्यं च प्रागेव समर्थितम् । यत्तु सन्निध्यपेक्षायोग्यत्वाविशेषे ऽपि प्रमाणान्तरावगतानामर्थानां नियतान्वयनिमित्तत्वं न दृष्टं शब्दावगतानाञ्च तत्कल्पने शक्तित्रयकल्पनमित्युक्तं तत्सन्निधिमात्रस्याङ्गतानङ्गीकारात्परिहृतम् । स्वाभिधायकपदैकवाक्यभूतपदान्तराधीनो हि सन्निधिः पदार्थानां नियतैकान्वितबोधने ऽङ्गं न चासौ प्रमाणान्तरावगतेष्वस्तीति न तत्र नियतैकवाक्यार्थावगतिः । यत एव चैकवाक्यभूतपदान्तराधीन एवासन्निधिः पदार्थानामन्वितबोधने ऽङ्गं न सन्निधिमात्रम् अत एवापरिपूर्णेषु विश्वजिदादिवाक्येष्वाकाङ्क्षितस्यार्थस्य शाब्दसन्निध्यर्थं शब्दस्यैव कल्पनाच्छ्रुतार्थापत्तेः शब्दगोचरत्वसिद्धिः । तथा चातिदिष्टेषु मन्त्रादिषु प्राकृते ऽग्न्यादिपदे ऽर्थलोपान्निवृत्ते निर्वापादिषु सूर्यादिपदाध्याहारादूहसिद्धिः । अन्यथा ऽसौ न स्यादित्यास्तां तावत् । यद्यपि पदानां पदार्थानां चोभयेषामपि सामर्थ्यमपूर्वमेव कल्पयितव्यं तथा ऽपि पदार्थानामेव कल्पयितुं युक्तं न पदानाम् । तथा हि यत्र तावदेकं पदमेकश्च पदार्थः तत्रान्विताभिधानपक्षे पदस्य द्वे शक्ती कल्प्ये अभिहितान्वयपक्षे ऽपि पदस्यैका पदार्थस्य चैकेति द्वे एवेति तुल्यम् । यत्राप्येकशब्दस्यानेके ऽर्था वाच्याः यथा ऽक्षशब्दस्य विदेवनादित्रयं तत्राप्यन्विताभिधायित्वं प-

सर्थं शब्दस्य शक्तिद्वयकल्पनात् षट् शक्तयः अभिहितान्वये ऽपि शब्दस्य प्रत्यर्थमेकैकशक्तिकल्पनात्तिस्रः पदार्थानाञ्च त्रयाणां तिस्र इति षडेवेति तुल्यमेव। यत्र तु बहवः शब्दा एकस्यार्थस्य वाचका यथा पाणिकरहस्तशब्दास्तत्रान्विताभिधानपक्षे प्रतिशब्दं शक्तिद्वयकल्पनात् षट् शक्तयः स्युः अभिहितान्वयपक्षे तु त्रयाणां शब्दानामर्थस्य चैकैकशक्तिकल्पनाच्चतस्र इति लाघवम् । एवं चतुःपञ्चषडादिषु शक्त्युपचयो दर्शयितव्यः । चतुर्षु त्रयाधिक्यं पञ्चसु चतुष्काधिक्यं षट्सु पञ्चकाधिक्यमित्यूहनीयम् । शक्तिकल्पनातुल्यत्वे ऽपि चानन्तर्यात्पदार्थनामेव वाक्यार्थनिमित्तत्वं युक्तं न पदानामित्युक्तम् । तस्मादभिहितान्वय एव ज्यायान् । तथा च सूत्रकारः अर्थस्य तन्निमित्तत्वादिति व्यक्तमेव पदार्थानिमित्तकत्वं वाक्यार्थस्य दर्शयति । भाष्यकारो ऽपि हि अमूनि पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि अथेदानीं पदार्था अभिहिताः सन्तो वाक्यार्थमवबोधयन्तीत्याह । यत्त्वस्य व्याख्यानं क्रियते व्यतिषक्ताभिधायि पदं न व्यतिषङ्गाभिधायि व्यतिषक्ततो ऽवगतेर्व्यतिषङ्गस्येति । तस्य तावदयमर्थः यथैवाकृत्या शब्देनाभिधीयमानया सह प्रतीयमाना व्यक्तिः शब्दजप्रतीतिगोचरा ऽप्याकृतिगम्येत्युच्यते तत्र आकृतिप्रत्ययो हि व्यक्तिप्रत्ययस्य निमित्तमिति न हि तत्राकृतिमात्रं शब्देनावगम्यते तथा व्यक्तिरपीति युक्तम् । केवलाया जातेः प्रत्येतुमशक्यत्वात् । स्वभावः खल्वसावाकृतेर्यदसौ नान्तरेण व्यक्तिं प्रतीतिमारोढुं क्षमते रूपं हि सा व्यक्तेः न च रूपिशून्या रूपे बुद्धिरस्ति । यदि स्यात् रूपितैव न स्यात् । तस्मात्सह व्यक्त्यैव जातिः प्रतीयते अथ चाकृतिप्रत्ययो व्यक्तिप्रत्ययस्य निमित्तमित्युच्यते । तत्कस्य हेतोः शब्दो हि स्वशक्त्या जातिमेवाभिधत्ते तस्यास्तु व्यक्तिमन्तरेण

प्रत्याययितुमशक्यत्वाद्व्यक्तिमपि प्रत्याययति । तेन स्वाभाविकं शब्दस्याकृतिप्रत्यायकत्वम् । तन्निमित्तं तु व्यक्तिप्रत्यायकत्व-मिति आकृतिप्रत्ययो व्यक्तिप्रत्ययस्य निमित्तमित्युच्यते न तु शब्देन प्रथममवगता ऽऽकृतिः पश्चाद्व्यक्तिमवबोधयतीति । तथा ऽन्विताभिधायिना शब्देनान्वयमन्तरेणान्वितस्य बोधयितुम-शक्यत्वात् अन्वयो ऽवबोध्यमानः पदार्थनिमित्तक इत्युच्यते । भाष्ये च पदार्थशब्देनान्वित इत्युच्यते वाक्यार्थशब्देनान्वयः पदार्था वाक्यार्थमवबोधयन्ति अन्विता अन्वयमवबोधयन्ती-त्यर्थः । अन्वितप्रतिपादकत्वनिमित्तमन्वयप्रतिपादकत्वमिति यावदिति ॥

सेयं क्लिष्टेन मार्गेण ग्रन्थव्याख्या न शोभते ।
पदार्थानां हि वाक्यार्थे स्पष्टोक्ता ऽत्र निमित्तता ॥३२॥
यद्यन्विताभिधायित्वं पदानां युक्तिभिर्दृढम् ।
क्लिष्टेनापि प्रकारेण ग्रन्थव्याख्या ततो भवेत् ॥३३॥
पदैरभिहिताः स्वार्था वाक्यार्थस्यावबोधकाः ।
प्रसाधिता यदा युक्त्या तदा नैषोपपद्यते ॥ ३४ ॥
अन्वितप्रतिपत्तेश्च निमित्तं पूर्वपक्षिणा ।
आक्षिप्तं तेन तन्मूलं भाष्येणानेन कथ्यते ॥ ३५ ॥
अभ्युपेत्यान्विते मूलं यदि स्यात्पूर्वपक्षिणा ।
आक्षिप्तमन्वये मूलं समाधीयेत तत्त्वतः ॥ ३६ ॥
न त्वेतदस्ति तेनेदं व्याख्यानं नोपपद्यते ।
यत्तु व्यक्तिवादिरयुक्तं तदयुक्तं न शब्दतः ॥ ३७ ॥

व्यक्तिप्रतीतिरस्माकं जातिरेव तु शब्दतः ।
प्रथमावगता पश्चाद्व्यक्तिं यां काञ्चिदाक्षिपेत् ॥३८॥

जात्यभिधायी हि शब्दः तामेव बोधयति न व्यक्तिं तत्रासमर्थत्वात् । असमर्थाच्च कार्योत्पत्तावतिप्रसङ्गात् । जात्यवगतेरपि असमर्थादेवोत्पत्तिसंभवात् । अथ व्यक्तावपि शब्दस्य सामर्थ्यमस्तीत्युच्यते तर्हि सा ऽप्यभिधेया स्यात् । यदि तु यत्र स्वाभाविकी शक्तिस्तदभिधेयं जातिश्च तथा तदभिधायकत्वनिमित्ता च व्यक्तौ शक्तिरस्ति ततो नासावभिधेयेत्युच्यते तदयुक्तं प्रमाणाभावात् । यदि तस्यार्थद्वये ऽपि शक्तिद्वयं शब्दस्य कल्पितं ततः केन प्रमाणेनायमवान्तरविभागो ऽवगम्यते स्वाभाविक्याकृतौ शक्तिर्व्यक्तौ तु तन्निबन्धनेति ।

अथ न व्यक्तौ शब्दस्य शक्तिः किन्तु जातावेव सा तु शब्देनैव प्रतीयमाना वस्तुस्वभावाद्व्यक्त्या सह प्रतीयतइत्युच्यते तन्न व्यक्तिप्रतीतेः कारणाभावात् । अप्रतीयमानया च तया सह जातेः प्रसेतुमशक्यत्वात् । कथं व्यक्तिप्रतीतेः कारणं नास्तीत्युच्यते शब्दस्याशक्तत्वेनाकारणत्वात् । जातिप्रतीतेश्च ततः पूर्वमनिष्पन्नत्वेन तत्कारणत्वायोगात् । तेन पूर्वावगतिर्जातेरङ्गीकर्तव्या । नन्वसौ न केवला प्रसेतुं शक्यते एवन्तर्ह्यस्याः अप्रतीतिः प्रसज्ज्येत । व्यक्तिस्तावत्प्रसायकाभावान्न प्रतीयते तस्यां चाप्रतीयमानायां न तया सह जातिः प्रसेतुं शक्यते केवला च न प्रतीयतइत्यप्रतीतिरेव जातेः स्यादिति । तस्माज्जातिरेव शब्दात्प्रतीयतइत्यङ्गीकर्तव्यम् ।

रूपिशून्या च रूपेषु बुद्धिरस्त्येव तद्यथा ।
हिमवर्त्तिनि हेमन्ते शैत्यसंवित्त्वगिन्द्रियात् ॥ ३९ ॥

तथा गन्धवति द्रव्ये नासाग्रमधिरोहति ।
न द्रव्ये जायते संविद्गन्धएव तु जायते ॥ ४० ॥
तस्माज्जात्यभिधायित्वाच्छब्दस्तामेव बोधयेत् ।
सा तु शब्देन विज्ञाता पश्चाद्व्यक्तिं प्रबोधयेत् ॥४१॥

भवतु वा जातिमात्राभिधानशक्तेनापि शब्देनापर्यवसाना-देवावगम्यमाना व्यक्तिर्न पृथक् शब्दशक्तिं प्रकल्पयतीति । न त्विह तथा पृथक्शक्तिमन्तरेणान्वयप्रतीत्यसंभवात् । जातिर्हि व्यक्तेरर्थान्तररूपा युक्तं यत्तस्यामभिधीयमानायामपि न व्यक्ति-रभिधामनुप्रविशतीति । न हि व्यक्तिमत्त्वैव जाते रूपं येना-भिधेयानुप्रवेशाद्व्यक्तेरप्यभिधेयत्वं स्यात् । अन्वितस्य चान्वय-वत्त्वैव रूपमिति तस्मिन्नभिधीयमाने अन्वयस्याभिधानानुप्रवेशः स्यादेव । ततस्तत्रापि शक्तिः कल्पनीया । अथान्वितशब्देन पदार्थानां स्वरूपमुपलक्ष्यते तच्चानभिधाय अन्वयमभिधातुं शक्यतइत्युच्यते न तर्हि शब्देनान्वयप्रतीतिसिद्धिः । न हि जातिवद्व्यक्तिमन्वयमन्तरेण पदार्थस्वरूपमनिरूप्यं येन तदपर्य-वसानाच्छब्देन प्रत्याय्येत । ननु यथा जातिर्न क्व चिदपि व्यक्तिविकला ऽवगता तथा पदार्था अपि न व्यतिषङ्गविकलाः क्व चिदप्युपलभ्यन्ते अन्ततो ऽस्त्यर्थेनापि सर्वत्र सर्वपदार्था-नामन्वितत्वम् । तस्याप्यपर्यवसानादेव सिद्धेर्नाभिधेयत्वमिति । सत्यम् अन्वयमात्रमपर्यवसानाद्गम्यते तद्विशेषस्तु नान्तरेणाभि-धानं शाब्दीं प्रतीतिमारोहति तस्मादन्विताभिधायित्वे शब्दस्य शक्तिकल्पनागौरवात्स्वरूपमात्रमभिधेयम् । कथं तर्हि भाष्यकारेण प्रातिपदिकादुच्चरन्ती द्वितीयाविभक्तिः प्रातिपदिकार्थो विशेषक इत्याहेति प्रत्ययस्यान्विताभिधायित्वमुच्यते । भवन्मते वा कथं सर्वशब्दानामन्विताभिधायित्वे सति विशेषेण तत्प्रत्ययस्य

कथ्यते तेन ग्रन्थानुगुण्याच्छब्दान्तराणां स्वरूपमात्राभिधायित्वं प्रत्ययस्य त्वन्विताभिधायित्वमिति व्यवस्थाप्यम् । यद्वा अनेनापि अन्विताभिधायित्वं प्रत्ययस्य नोच्यते किन्तर्हि प्रत्ययेन स्वार्थो ऽभिधीयमानः प्रथमावगतप्रकृत्यर्थानुरक्त एवावगम्यतइति तत्रान्वयव्यतिरेकाभ्यां प्रकृतेः प्रत्ययस्य च स्वे स्वे ऽर्थे अनुरागांशे च प्रकृतिप्रत्ययसमभिव्याहारस्यैव पदार्थान्तरानुरागनिमित्तत्वं विविच्यते। यथा ग्रहणस्मरणात्मनि प्रत्यभिज्ञाने ग्रहणांशस्येन्द्रियनिमित्तत्वं स्मरणांशस्य च संस्कारनिमित्तत्वं यथा च वस्त्वन्तराभावविशिष्टे वस्त्वन्तरे गृह्यमाणे विशेष्यस्य भावांशस्य प्रत्यक्षादिविषयत्वं विशेषणस्य चाभावांशस्याभावविषयत्वं विविच्यते तथा ऽत्राप्यनुरागांशस्य प्रकृतिप्रत्ययसमभिव्याहारादेव प्रतीतिसिद्धेर्न प्रत्ययस्य तदभिधायकत्वं स तु स्वार्थमेवाभिधत्ते । आह च

"प्रकृतिप्रत्ययौ ब्रूतः प्रत्ययार्थं सहेति यत् ।
भेदेनैवाभिधाने ऽपि प्राधान्येन तदुच्यते ॥
पाकं हि पचिरेवाह कर्तारं प्रत्ययो ऽप्यकः ।
पाकयुक्तः पुनः कर्ता वाच्यो नैकस्य कस्य चिदि"ति ॥

मत्वर्थीयास्तु विशिष्टमेवाभिदधति । न हि तेषां वाच्यान्तरं निरूप्यते । हिरण्यमालिन ऋत्विज इत्यत्र विशेषणभूता हिरण्यमाला तावत् प्रकृत्यैवाभिहिता ऋत्विजो ऽपि हि विशेष्याः स्वपदेनैव मत्वर्थीयः किमभिदध्यादन्यद्विशिष्टात् । तदसौ विशिष्टाभिधाय्येव । अन्येषामपि तु येषां युगपदनेकार्थाभिधायित्वं विभक्तेरिव लिङ्गसंख्याकारकाणां तेषामप्यन्विताभिधायित्वम् एतच्च सर्वमङ्गनिर्णये एव वक्ष्याम इति । इतरेषां तु शब्दानां स्वार्थरूपमेवाभिधेयमन्वितरूपस्तु वाक्यार्थः पदार्थगम्य इति । अत एव वाक्यार्थो लाक्षणिक इति

मीमांसकाः । अभिहितार्थसम्बन्धादभिगम्यमानत्वात् । नन्व-विनाभावनिमित्ता लक्षणा न च पदार्था वाक्यार्थविशेषणावि-नाभूता इति स कथं लक्ष्यते नावश्यमविनाभावनिमित्तैव लक्ष-णां एकवाक्यता ऽपि तत्र निमित्तम् । अत एवासत्यप्यविना-भावे व्रीहीनवहन्तीत्यत्र दर्शपूर्णमासैकवाक्यतया तत्साधनत्वल-क्षणोपपत्तिः। एकवाक्यता च क्व चित्प्रत्यक्षा यथा सोमेन यजे-तेति। क्व चित्प्रकरणाद्यनुमेया यथा दर्शपूर्णमासाभ्यां यजेत समिधो यजतीत्यनयोः समिदुपेता दर्शपूर्णमासभावना कर्तव्ये-त्येवंरूपैकवाक्यता कल्प्यते एवमन्यत्रापि द्रष्टव्यम् ॥

तस्मान्न वाक्यं न पदानि साक्षा-
द्वाक्यार्थबुद्धिं जनयन्ति किन्तु ।
पदस्वरूपाभिहितैः पदार्थैः
संलक्ष्यते ऽसाविति सिद्धमेतत् ॥४२॥

पार्थसारथिमिश्रेण निर्णयो ऽभिहितान्वये ।
यथागमं यथाप्रज्ञं वार्तिकोक्तः प्रदर्शितः ॥४३॥

दृष्ट्या वार्तिककारस्य विशेषः काम्यनित्ययोः ।
अङ्गसाकल्यवैकल्यलक्षणः प्रतिपाद्यते ॥ १ ॥

केचित्किल नास्त्येव नित्यकाम्ययोर्वैषम्यमुभयत्रापि सकलाङ्गोपसंहारादिति मन्यन्ते। एकदेशिभिश्च कैश्चिदनतिप्रयत्नेन दुर्बलहेत्वभिधानात्तेषामेव प्रसरः स्थिरीकृतः ॥

उभयेषान्निरासेन सम्यङ् न्यायः प्रदर्श्यते ।
येन सिध्येत् स्फुटो भेदः कर्मणोः काम्यनित्ययोः॥२॥

तत्र पूर्वपक्षः ।

अधिकारो हि सर्वत्र विनियोगानुसारतः ।
अन्यथा ह्यनिवार्या स्याच्छूद्रादेरप्यधिक्रिया ॥३॥

सर्वत्र न केवलं काम्ये ऽपि तु नित्ये ऽपीत्यर्थः। यस्मिन् कर्मणि यदङ्गजातं श्रुत्यादिभिः स्मृत्या ऽऽचारेण वचननामधेयचोदनालिङ्गनिमित्तातिदेशेन च प्रापितं तदुपसंहारशक्तियुक्तस्यैव तत्राधिकार इति तिर्यगधिकरणे स्थापितम्। सामग्र्यधीनत्वात्फलसिद्धेरितिकर्तव्यतायुक्तस्यैव च करणस्य तत्त्वात्। समुच्चितानामङ्गानामुपसंग्रहणादन्यथा ह्यष्टविधदोषनिदानविकल्पापत्तेः। विकल्पितस्य चाननुष्ठेयत्वात् कुतो यथाशक्ति प्रयोगसिद्धिः। यदि च कतिपयाङ्गोपसंहारे ऽपि फलसिद्धिः स्यात् काम्ये ऽपि स्यादविशेषात्। ननु यावज्जीवादिवाक्येषु निमित्तश्रुत्या तस्मिन् सत्यवश्यकर्तव्यत्वावगमादकरणे च तद्विरोधात्तद्बलेनाङ्गहीनस्यापि फलसाधनत्वावगमात् तथैवानुष्ठीयते। काम्ये त्वेवं विरोधाभावात्सर्वाङ्गोपसंहारेणानुष्ठानमिति चेन्न। निमित्तवशादप्यवश्यकर्तव्यत्वमधिकारिण एव सर्वशक्तियुक्तश्चाधिकारी नान्यः। निमित्तवाक्ये सर्वेषामधिकारावगमात्तद्-

नुसारेणाङ्गोपसंहारः। यो यावन्त्युपसंहर्तुं समर्थस्तस्य तावद्भिरेव फलसिद्धिरिति यद्युच्येत तर्हि काम्ये ऽपि स्वर्गकाममात्रस्याधिकारावगतेस्तथैवानुष्ठानप्रसङ्गः। यदि च निमित्तबलेनाङ्गसंकोचः स्यात्ततः शूद्रस्यानाहिताग्नेराहिताग्नीनां च विद्याविरहिणां तद्व्यतिरिक्ताङ्गानुष्ठानशक्तिशालिनामप्यधिकारः स्यात्। तस्मात्सर्वाङ्गशक्तिरधिकारिविशेषणमिति। अत एव पञ्चमाध्यायात्परमधिकारनिरूपणं शक्त्यपेक्षत्वादधिकारस्य। शक्तेश्च शक्यरूपानुष्ठेयाधीननिरूपणत्वात्तस्य चाध्यायपञ्चकेनावधारणात्। तदुक्तं कार्ये ज्ञाते ऽधिकारः स्यादिति। एतेन ज्ञाप्यज्ञापकभावं सम्बन्धं निराकृत्यावसरलक्षणमधिकारलक्षणस्याचक्षाणा निरस्ता वेदितव्याः। तदुभयत्रापि सर्वाङ्गोपसंहार इति।

के चित्तु विषयीभावः करणीभावपूर्वकः।
काम्ये तेनाङ्गसाकल्यमाहुर्नित्ये विपर्ययम्॥४॥

कार्यरूपं तावदपूर्वं प्रधानवाक्यार्थ इति स्थितं तच्च कृत्यधीनात्मलाभं कृतिश्चैवंविधेषु पुरुषप्रयत्न एव स च चेतनं कर्तारमपेक्षते तस्य च कर्तृत्वमधिकारापेक्षम्। यो हि मदर्थमिदं कर्माहमत्र स्वामीति विजानाति स तदनुतिष्ठति नान्यः। स चाधिकृत इत्युच्यते। अधिकारश्चैवंविधेषु नियोज्यतापेक्षः। तद्धि कर्म तस्य स्वं भवति यद्यस्य कार्यं साधयति तेन ममेदं कार्यमित्येवं कार्यमपेक्ष्य तत्साधने कर्मणि पुरुषस्याधिकारावगमः यश्च कार्यं स्वकीयत्वेन बुध्यते स नियोज्यः न चापूर्वं कार्यं सुखदुःखपरिहारवत्कस्य चिदिच्छागोचरः। यतः प्रमाणान्तरेणैव तदर्थिनः कार्यत्वावगमात् तत्साधने कर्मण्यधिकारः स्यात्। अतो वचनेनैवास्येदं कार्यमिति प्रतिपादयितव्यम्। तदेवं नियोज्यापेक्षं कार्यं स चानुपादेयविशेषणविशिष्टः। तच्च फलनिमित्तभेदेन द्विविधं तत्र फलमनुत्पन्नं न स्वरूपेण विशे-

षणीभवितुमर्हतीति स्वकामनामुखेन नियोज्यं विशिनष्टि । फलकामश्च स उच्यते यः फलमात्मनः साधयितुमिच्छति स च तदेव कार्यं बुध्यते यत्स्वकामानुगुणमिति । [नन्वपूर्वस्य फलं प्रति जनकत्वेनान्वये विशेषणतापत्त्या नियोग एव प्रधानं वाक्यार्थ इति सिद्धान्तासिद्धिरित्यत आह । नियोगस्येति । प्रधानस्यापि नियोगस्य स्वसिद्ध्यर्थो यः फलकामनाविशिष्टनियोज्येन सम्बन्धस्तदर्थं फलानुकूल्यमास्थेयं स्वीकार्यमित्यर्थः।] नियोज्यस्य[1] फलानुकूल्यं प्रधानस्यापि स्वसिद्ध्यर्थविशिष्टनियोज्यसंबन्धार्थमास्थेयम् । तच्च कार्यं प्रयत्नसम्पाद्यं प्रयत्नस्यानवच्छिन्नस्यानिरूपणात्तदवच्छेदकमपेक्षते । अवच्छेदकश्च प्रायेण भावार्थः तस्यैव स्वरूपेण तत्संबन्धित्वात् । न खल्वलब्धपाकादिभावार्थविषयः प्रयत्नो लोके दृश्यते । क्वचिच्च शब्दवशेन द्रव्यदेवतासंबन्धादिर्भावार्थनिर्वाहितप्रयत्नसंबन्धो ऽवच्छेदको भवति । तदेवं कार्यस्य कृत्यवच्छिन्नत्वात्कृतेश्च भावार्थाद्यवच्छेदकमन्तरेणाप्रतीतेः कृतिप्रणाडिकया कार्यस्य भवति भावार्थादिरवच्छेदकः । अवच्छेदकश्च । विषयइत्युच्यते प्रतीत्यनुबन्धो हि विषयः । अनवच्छिन्नं च कार्यं प्रत्येतुमशक्यमिति तदवच्छेदकं तत्प्रतीत्यनुबन्धितया भवति विषयः स च भावार्थः कामानुगुणस्य कार्यस्य विषयाभावात् पुरस्कृतकामोपायभावः शक्यो ऽभिगन्तुमित्युपायत्वेनैव रूपेण विषयीभवति । तदुपायता च निखिलाङ्गग्रामसंपादितोपकारस्येत्यङ्गानुषङ्गव्यतिक्रमे समस्ताङ्गजन्याङ्गोपकारस्यासम्पत्तेरुपायत्वाभावे विषयत्वाभावाद्विषयिणो ऽपि कार्यस्याप्रतीतेर्न तद्बलेन हीनाङ्गकर्मानुष्ठानं भवेत् । नित्ये तु नायं प्रकारः संभवति । न हि तत्र फलकामो नियोज्यः येनानुपायं कार्यं कार्य-

[ ] एतच्चिन्हस्थः पाठ उभयपुस्तकयोर्नास्ति
१ नियोगस्येति प्र पु. पा.

तया न बुध्येत । सिद्धविशेषणविशिष्टस्तु भावार्थावच्छिन्नमेव कार्यं प्रथममवगच्छति प्रतीतसविषयकार्यस्तु कृतिं विना कार्याभावात्कृतेश्चाकरणिकाया असंभवात् करणमपेक्षमाणः सन्निहितस्य भावार्थस्य विषयीभूतस्य करणतामुपकल्पयति । कथं पुनः कृतिनिर्वर्त्य एव भावार्थस्ताम्प्रति करणमिति चेत् तदवच्छिन्नायास्तस्यास्तदपूर्वविशेषकृतित्वात्तथाविधस्य च लोके करणत्वप्रसिद्धेः। तथा हि यथा च्छेत्तुरुद्यमननिपातनलक्षणया क्रियया परशुर्व्याप्यमानो ऽपि तामेव प्रति करणं तद्विषयायास्तस्या द्वैधीभावफलत्वात् । न हि लोष्टविषये उद्यमननिपातने द्वैधीभावं फलतः । एवं यद्यपि कृत्या भावार्थो व्याप्यते तथा ऽप्यपूर्वविशेषकृतित्वं तस्यास्तद्विषयत्वाधीनमिति युक्त एव करणभावो भावार्थस्य । अपूर्वस्य तूद्देश्यत्वात् कार्यत्वम् । तदेवं नित्ये विषयीभूतस्य भावार्थस्य पश्चात्करणत्वमितिकर्तव्यतासाहित्यं च तस्य प्रतीयतइति नाङ्गलोपे ऽपि विषयाभावस्ततश्च विषयाधीनप्रतीतेः कार्यस्य विषयाविलये ऽविलयात्तत्साधने कर्मण्यधिकारप्रतीतेस्तद्बलेन हीनाङ्गकमपि कर्मानुष्ठापयति नियोगो वैकृतइव प्रत्याम्नातप्रतिषिद्धलुप्तार्थाङ्गव्यतिरिक्ताङ्गानुष्ठानमिति सिद्धः काम्यनित्यविशेषः । तदेतदापातकल्याणं सूक्ष्मन्यायदृष्ट्या निपुणं निरूप्यमाणमारकूटायते । कथम्

फलस्य विप्रकृष्टत्वादपूर्वानभिधानतः ।
तत्प्राधान्यप्रहाण्या[1] च विषयत्वोपपत्तितः ॥ ५ ॥
समप्रधानभावेन स्वरूपस्यानपायतः ।
अप्रयोजकभावेन जातेष्टौ च प्रसङ्गतः ॥ ६ ॥

---

[1] प्रहाणेनेति द्वि. पु. पा.

विप्रकृष्टं हि पदान्तरोपात्तं फलं भावार्थस्य सन्निकृष्टन्तु स्वपदोपात्तमपूर्वं तत्र विप्रकृष्टेन प्रथमं साधनतया ऽन्वीय विप्रकृष्टतरैर्वाक्यान्तरोपात्तैरङ्गैः सम्बद्ध्य तदन्वितेन रूपेण स्वपदप्रतिपाद्यमपूर्वं पश्चादवच्छिनत्तीति कः श्रुतिवाक्यबलाबलज्ञो ऽभिदधीत । यद्यपि कामोपायस्य कार्यस्य विषयीभवतो भावार्थस्य तत्साधनत्वमवश्यंभावि तथा ऽपि न तत्प्रथमं निरूपयितव्यम् । न हि येन विना यद्वस्तु नोपपद्यते तन्निरूपणपुरःसरमेव तद्वस्तु प्रत्येतव्यम् । प्रतिपन्ने ऽपि च वस्तुनि तदुपपादकं वस्तु पश्चादपि प्रतीयतएव धूमइव धूमध्वजस्तेन प्रथमं पदश्रुत्या भावार्थमात्रविषयमपूर्वं प्रतिपद्य पश्चात्फलोपायभूतकार्यविषयत्वान्यथानुपपत्त्या तत्साधनभावस्तदुपपत्तये चाङ्गान्वयः प्रतीयतइति नास्त्यङ्गलोपे विषयविलोप इति । यदि च विप्रकृष्टप्रमाणकं चरमनिरूपणमपि साधनत्वमवश्यं भवतीति कृत्वा विषयकोटौ निवेश्येत ततो नित्ये ऽपि विषयीभवतस्तत्करणत्वावश्यंभावादङ्गोपेतस्य च तत्त्वात्तथैव विषयत्वमित्यङ्गाभावे विषयविलयः प्रसज्येत । यस्तु वदति नावश्यं नित्ये नियोगविषयस्य तत्करणमकरणभूतस्यापि नञर्थस्य नियोगविषयत्वदर्शनादिति । स वक्तव्यः काम्यनियोगविषयस्यापि नैकान्तिकं फलकरणत्वं द्रव्यदेवतासंबन्धस्याकरणभूतस्यापि सौर्यादिवाक्येषु विषयत्वदर्शनादिति । स चेदेवमुक्तः प्रतिब्रूयादकरणभूतो ऽपि द्रव्यदेवतासंबन्धस्तदविनाभूतस्तेन रूपेण विषय इति प्रतिब्रूयादेनम् एवं नञर्थस्यापि तदविनाभूतस्य तेनैव रूपेण विषयत्वमिति तुल्या चर्चा । तस्माद्यथा नित्येषु भावार्थमात्रे विषयीभूते पश्चात्करणत्वमितिकर्तव्यता तु पश्चात्प्रतीयते तथा काम्येष्वपि ।

श्रुत्या भावार्थमात्रस्य विषयत्वे निरूपिते ।
पश्चात्फलादिसम्बन्धो वाक्यादेः संप्रतीयते ॥ ७ ॥

एवं पदान्तरोपादानलक्षणस्तावदेको विप्रकर्षः लक्षणानिमित्तश्चापरः । तथा हि न स्वर्गकामशब्देन स्वर्गस्य साध्यत्वमभिधीयते कामसंबन्धात्तु स्वर्गस्य साध्यत्वमनुमाय ततः स्वर्गसाधनत्वं यागस्य निरूपयितव्यमिति विप्रकर्षः । यत्र च द्रव्यदेवतासंबन्धो नियोगविषयस्तत्र तस्य करणत्वानभ्युपगमादकरणीभूतस्य विषयत्वानुपपत्तेरेवं वक्तव्यम् । करणीभूतयागसंपाद्यो द्रव्यदेवतासंबन्धो नियोगस्य विषयः अङ्गभावे च करणीभूतयागाभावात्तत्संपाद्यद्रव्यदेवतासंबन्धाभावेन विषयविलय इति । ततश्च द्रव्यदेवतासंबन्धेन यागमनुमाय तस्य च करणत्वं परिकल्प्य तत्संपाद्यद्रव्यदेवतासंबन्धस्य विषयत्वरूपणमिति विप्रकर्षः । विश्वजिदादौ च यत्र फलकामो नियोज्यो न श्रूयते तत्र नियोज्यं कल्पयित्वा तत्संबन्धे यागस्य करणत्वं परिकल्प्य तादृशस्य विषयत्वं निरूपयितव्यमित्यपि विप्रकर्षः । किञ्च तत्र नियोज्यपरिकल्पने निमित्तं तावन्न नियोगः तस्याप्रतिपन्नत्वात् । न ह्यप्रतिपन्नं कल्पकं कल्पनाय कल्पते । अप्रतिपन्नश्चात्र नियोगो विषयानिरूपणात् अविषयकार्यप्रतीत्यनुपपत्तेः । करणीभूतो हि यागो नियोगविषयः । न चाकल्पिते नियोज्ये फलकामे करणीभूतयागसिद्धिः । तत्सिद्धौ च नियोज्यसिद्धिः तदधीना च करणीभूतयागसिद्धिरिति चक्रकमप्रतिष्ठितमापद्येत । तेन तत्र प्रथमं भावार्थमात्रविषयमपूर्वं प्रतीत्य ततो नियोज्यत्वादिकल्पनमिसङ्गलोपविषयाविलयाद्यथाशक्ति प्रयोगप्रसङ्गः । किञ्च सोमादिषु साधनेषु स्ववाक्येषु श्रूयमाणेष्वपि तत्साध्यरूपेण विषयत्वमनभ्युप-

गम्य फलश्रवणबलेन तत्साधनरूपस्य विषयत्वमिच्छद्भिः स्व-
दर्शनानुरागो ऽतीवाविष्कृतः। कः खलु पदान्तरेभ्यः फलपदे
विशेषः। तदधीनसिद्धित्वमिति चेन्न व्याघातात्। स्यादेतत्।
फलकामिनियोज्यसम्बन्धबलेन हि यागस्य तत्साधनत्वानुपप-
त्त्या तद्व्यतिरिक्तमपूर्वं सिध्यत्तदानुकूल्येन सिध्यतीत्यवश्यं त-
द्विषयस्य तत्साधनत्वेन भवितव्यमिति अस्ति पदान्तरेभ्यः फ-
लपदस्य विशेषः। तन्न व्याघातात्। यस्मात्क्षणिकस्य यागस्य
फलसाधनत्वं नोपपद्यते तस्मात् फलकामी न तत्कार्यतया बु-
ध्यते अपि तु फलसाधनभूतयागविषयमपूर्वं बुध्यतइति कथमि-
दं परस्परं व्याहतं बुद्धिमन्तो ऽभिदधीरन्। कश्चित्तु निपुणं-
मन्यः प्रभाकरदर्शनं शिक्षयन्निदं ब्रह्मास्त्रमुत्सृजति नैव भावा-
र्थस्य फलकरणभूतस्य विषयत्वं किन्तर्हि फलकामस्य यत्का-
र्यन्तत्तत्सामग्र्यवच्छिन्नमेव तेन प्रत्येतव्यम्। सामग्री च कर-
णेतिकर्तव्यतारूपा तेनेतिकर्तव्यतालोपे विषयविलय ति। न
चैवं यागस्याविषयत्वं सामग्र्यवच्छिन्नस्यापि तद्विशेषापरिज्ञाने
साकाङ्क्षत्वात्। तेन स्वपदावगतो नियोगः पश्चाद्यागेनावच्छि-
द्यते न तु याग एव फलान्वितो ऽवच्छेदक इति। तस्यापि
तदस्त्रमयमेव ब्रह्मदण्डो ग्रसते फलस्य विप्रकृष्टत्वादिति। न
खलु पदान्तरोपात्तफलाविनाभावप्रतीता तत्सामग्री स्वपदस्था-
द्यागात्पूर्वमेवापूर्वमवच्छेतुं पारयति। यथा न यागो ऽपूर्वं
विहाय फलेन प्रथमं सम्बद्ध्यते तथा ऽपूर्वमपि यागं विहाय
फलसामग्र्या विप्रकर्षस्य तुल्यत्वादित्यलमनेन। प्रसिद्धएव
मार्गे दूषणान्तरमुच्यते। यदि च करणीभूतो यागो विषयः
ततो नियोगस्य विषयाधीननिरूपणत्वादनिरूपिते च विषये
तदधीननिरूपणाशक्तेर्नियोगप्रतिपत्तेः पूर्वमेव फलसाधनत्वं
यागस्य निरूपयितव्यम्। निरूपिते तत्साधनभावं च यागं फल-

कामी कार्यतया बोद्धुमलमेवेति न नियोज्यसम्बन्धानुपपत्त्या क्रियातिरिक्तकार्याभिधानकल्पनाबीजं लिङादीनां सिध्यतीति सर्वं भवदीयसिद्धान्तकोशसारभूतमपूर्वाभिधानमुत्सन्नसंकथं जातम् । सिध्यतु वा ऽभिधानं न पुनः प्राधान्यं सम्भवति परार्थभूतवाक्यार्थ[1]विषयत्वादङ्गप्रधानोत्पत्तिनियोगवत् । यो हि साधिकारवाक्ये प्रधानभूतकार्याभिधायित्वेन प्रज्ञातानामपि लिङादीनां प्रयाजादिवाक्येषु विनियुक्तविषयतया प्राधान्यं विहाय लक्षणया गुणभूतकार्याभिधानमाश्रयति स कथमन्यत्राऽविदितप्रधानकार्याभिधानशक्तीनामेवाधिकारवाक्येषु विनियुक्तविषयत्वे सत्यपि प्रधानकार्याभिधानमाश्रयेत् । तेनापूर्वस्य प्राधान्यं विहीयतइति । किञ्चोपपद्यतएव यागस्याकरणभूतस्यापि विषयत्वम् । नियोगो हि फलसाधनं तस्य यागः स्वरूपेणैव विषय इति किन्नोपपद्यते । यद्युच्येत सत्यमपूर्वं फलसाधनं तत्तु न स्वरूपेण स्मृ[2]तिगोचरं भावार्थगोचरया तु तया साध्यं तयैव च कृत्या तद्गोचरया ऽपूर्वद्वारेण फलमपि साध्यते । तेनेकयैव कृत्यैकभावार्थगोचरया ऽपूर्वं फलं च साध्यतइति अपूर्वविषयस्य भावार्थस्य फलकरणत्वमवश्यम्भावीति । सत्यमेवं किन्त्वपूर्वकरणत्वनिरूपणपुरोधानएव सति फलकरणत्वमुक्तं भवति तत्करणत्वं विषयपुरःसरमिति विषयभूतस्य करणत्वप्रसङ्गः । अवश्यं चापूर्वकरणत्वपुरःसरमेव क्रियायाः फलकरणत्वं निरूपयितव्यम् अन्यथा कथं क्षणिकायास्तस्या कालान्तरभाविनि फले साधनत्वं सम्भाव्येत । नन्वलब्धे द्वारे मा नाम सम्भूत् लब्धे तु किमिति न सम्भवति किमत्र द्वारं लब्धं किन्तदपूर्वं तत्त्वान्तरं वा तत्त्वान्तरत्वे तावत्तत

---

१ भावार्थं इति प्र. पु. पा.

२ कृतिगोचरमिति द्वि. पु. पा.

एव यागस्य करणत्वोपपत्तेर्देयजलाञ्जल्यपूर्वं प्रसज्येत । अपूर्वद्वारेण तु फलसाधनत्वमपूर्वसाधनत्वनिरूपणाधीननिरूपणम् । तद्धि तस्य द्वारमुच्यते यद्येन स्वफलोद्देशप्रवृत्तेन तत्सिद्ध्यर्थमन्तरा साध्यते तदेवं सत्यपि यद्यत्र करणीभूतस्य विषयत्वमुच्यते ततः फलकरणत्वाधीनं नियोगविषयत्वं तदधीनञ्च नियोगं प्रति करणत्वं तदधीनञ्च फलकरणत्वमिति चक्रकमापद्येत । किञ्चैवमङ्गलोपे विषयविलयं ब्रुवाणः प्रष्टव्यः किमङ्गविशिष्टस्य विलयत्वमुत तदुपलक्षितस्येति । किञ्चातः यदि तावदङ्गविशिष्टस्य ततः सर्वेषामेव प्रयाजादीनामाग्नेयादीनाञ्च समप्राधान्यं प्रसज्येत गुणाधिकारवत् । यथा हि दधिविशिष्टहोमस्येन्द्रियकामापूर्वसाधनत्वे दधिहोमयोरपि समप्राधान्यं न गुणप्रधानभावः तद्वदिहापि स्यात् । अथाङ्गोपलक्षितस्य यागस्वरूपस्य तर्हि पुरोडाशद्वयोपलक्षितस्येवान्तरालकालस्याङ्गलोपे ऽपि एकपुरोडाशापाये ऽप्यनपायान्नास्त्यङ्गलोपे विषयविलयः। किञ्चैवमपूर्वप्रयुक्तिरपूर्वग्रहणञ्चाङ्गानां न स्यात्।साधिकारो विधिप्रतिपन्नः सन् स्वसन्निधिसमाम्नातान् प्रयाजादीन् स्वस्वानुवादशङ्कानिरुद्धनियोगान्तरविषयभावान् स्वार्थतया गृहीत्वा स्वगृहीतेष्वेव व्रीह्यादिषु द्वारभूतेषु स्वरूपातिक्रमेणैव स्वसाधनविशेषरूपे विनियुङ्क्ते अङ्गसम्बन्धात्तु प्राग्विषयाभावेनाप्रतिपन्ने नियोगे सर्वमिदमजातपुत्रक्रीडनकमापद्यते । फलं करणं वा प्रयोजकं स्यादङ्गानाम् अप्रयोजकभावेनेत्यस्यापरा व्याख्या। फलसाधनरूपे भावार्थे नियोगेन संबद्ध्यमाने ऽर्थाभिधानकर्मचेत्यनेन न्यायेन तुषोपवापवत्कपालस्याप्रयोजकं साङ्गस्य यागस्यापूर्वं प्रसज्येत।नन्विष्टमेव काम्येषु विधेयप्रयोजकत्वमत एव श्येनस्याविधेयत्वादनर्थत्वम् । यद्यपि स्वविधिसिद्ध्यर्थमनुमीयेत[1] तथाऽपि न विधेयत्वं यस्य विधिः स्वसिद्ध्यर्थमनुष्ठानमा-

१ अनुष्ठीयेतेति द्वि॰ पु. पा.

क्षिपति तद्विधेयं न तु विधिसाधनमात्रम्। काम्येषु तु फलत एवानुष्ठीयमानं कर्म विधिमपि साधयतीति न विधेयमिति। किमिदानीमङ्गेष्वप्रयोजको विधिरिष्यते साङ्गस्य हि फलसाधनस्य विषयत्वोपगमे तादृशस्यैव फलप्रयुक्तस्योपजीवनादङ्गप्रयोजको विधिरङ्गानामपि स्यात्। ततश्चाग्नीषोमीयहिंसा विधेयत्वाभावान्निषेधगोचरोऽनर्थः स्यात्। अत्र कश्चिद्वैयात्यादेवमाह मा भूदङ्गानां विधेयत्वं न चैतावताऽग्नीषोमीयादेर्निषेधप्रसङ्गः। द्विविधस्यापि निषेधस्यासंभावनीयत्वात् द्वेधा हि किञ्चित्फलोद्देशेनानुष्ठीयमानं कर्म निषिध्यते फलपर्यन्तं वा साधनमात्रपर्यवसानं वा तद्यथा सुखार्थं मदिरास्वादः प्रसक्त एव निषिध्यते नानेन सुखमवाप्तव्यम् अकार्यमेतत्साध्यं सुखमिति। क्वचित्साधनत्वमात्रं निषिध्यते तद्यथा रोगार्त्तस्तदुपशमार्थी तदुप्रकारकएव भेषजबुद्ध्या प्रवर्तमानो निषिध्यते मैवं कार्षीर्नेदमस्योपशमसाधनमिति। तत्र न तावदग्नीषोमीये फलपर्यन्ते निषेधसंभवः। स्वर्गस्य निरतिशयसुखरूपस्य कार्यत्वेन सर्वजनविदितस्याकार्यत्वाभिधाने प्रमाणान्तरविरोधप्रसङ्गात्। नापि साधनत्वनिषेधः वचनविरोधात्। तस्मान्न निषेध्यत्वमिति। तदिदमतितुच्छं न निराकरणमपि प्रयोजयति। तथा हि मदिरास्वादेन संपाद्यं सुखं प्रमाणान्तरेण कार्यं विदितमप्यकार्यमुच्यते वचनेन तथा स्वर्गसुखमपीति नोच्यते प्रमाणान्तरं हि क्षिप्रमेवाग्रहणतया व्याख्यायते। तस्मादङ्गेष्वप्यप्रयोजकत्वमनिष्टमेव। तच्चापद्येताङ्गविशिष्टस्य विषयत्वे। आह सत्यमङ्गविशिष्टस्य विषयत्वे समप्राधान्यमप्रयोजकत्वं च स्यात्। न तु तद्विशिष्टो विषयः करणीभूतस्तु विषयः तद्भावश्चाङ्गलोपे लुप्यात् इत्यङ्गलोपे विषयविलय इत्युच्यते न त्वङ्ग-

लोपे तस्यैव विषयत्वं तस्माददोष इति । नैतद्युक्तं यद्यङ्गलोपे करणत्वं नास्ति नित्ये ऽपि तर्हि हीनाङ्गस्य करणत्वं नास्तीत्यननुष्ठानं स्यात् । अथ तत्र विधिना यावदङ्गं प्राप्यते तदुपेतस्यैव करणत्वं भवति तदितरत्रापि कियद्भिरङ्गैरुपेतस्य करणत्वमित्यनवगमाद्विधिगृहीतानामेवाङ्गानां संग्रहणाद्यावन्त्यङ्गानि विधिना प्राप्यन्ते तदुपेतस्यैव करणत्वं भवतीति नास्त्यङ्गलोपे विषयविलयः । किञ्च जातेष्टौ संवलिताधिकाराभ्युपगमात्करणीभूतस्यैव विषयत्वमिति न यथाशक्ति प्रयोगः स्यात् । ततश्चाङ्गसंपत्त्यर्थमेवोत्कर्षस्य वक्तुं शक्यत्वाच्छेषिविरोधेन निमित्तस्वभावभङ्गार्थमाद्यमधिकरणमनर्थकं स्यात् । ननु तत्र निमित्तश्रवणबलादङ्गहानं स्यात् । न श्रुते ऽपि निमित्ते नैमित्तिकमेव कर्तव्यं नान्यत् करणीभूतभावार्थविषयञ्च कार्यं नैमित्तिकमिति कुतो ऽनीदृशस्यानुष्ठानमित्यलमनेन करणीभूतविषयत्वेन ।

तदेतत्सर्वसिद्धान्तकोशसारधनं हरन्[1] ।
को हि शङ्खनिधिं प्राज्ञः स्वगृहे स्थापयेत् स्वयम् ॥ ८ ॥

तस्मात् सर्वत्र नित्ये काम्ये च निखिलाङ्गोपसंहार इति । अत्राभिधीयते ।

निमित्तश्रवणान्नित्यं यथाशक्ति प्रयुज्यते ।
काम्यं च तदभावेन निखिलाङ्गसमान्वितम् ॥ ९ ॥

इह हि यावज्जीवमग्निहोत्रं जुहोतीति यावच्छब्दानुबन्धाज्जीवनं होमनिमित्तत्वेनावगम्यते । निमित्तस्य च तद्रूपं यत्तस्मिन् सति नैमित्तकमवश्यं कार्यम् । किमिदमवश्यं कार्यमिति । अवश्यमेव कर्तारमभिप्रेतेन फलेन योजयतीत्यर्थः । यथा चैत-

[1] कोशसारं समुद्धरन् २ पु. पा. ।

देव कार्यत्वं तथा प्रतिपादितं विधिविवेके। अत एवैष सर्वेषामभिमतः प्रत्यवायपरिहारः प्रयोजनमवकल्पते । यदि ह्यन्यथा-लक्षणं फलं स्यात्ततः सर्वेषां फलसाधनत्वं श्रुतमुपरुद्ध्येत । ननु च सर्वेषामभिमतः स्वर्गः किमिति न कल्प्यते। न तस्य मुमुक्षुभिरप्रार्थितत्वात् प्रत्यवायपरिहारस्तु तैरपीष्यते एव । कथं तर्हि स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वादिति नन्वेवं विश्वजित्यपि प्रत्यवायपरिहार एव फलं स्यात् । पापक्षयार्थस्य च नित्यत्वे त्रियुनैकत्रिकादीनामपि पापक्षयार्थानां नित्यत्वं स्यात् । तथा च यथाशक्ति प्रयोगः स्यात् । उच्यते । न तावद्विश्वजिति प्रत्यवायपरिहारः फलं प्रसज्यते गौरवात् । प्रत्यवायो हि न तावत्स्वरूपेण फलमपुरुषार्थत्वात् । न च तत्प्रागभावः तस्य स्वयमेव सिद्धत्वात् । न तद्ध्वंसः उत्पन्नस्य दुःखस्य स्वयमेव विशरणात् । तेन प्रत्यवायहेतुभूतादृष्टप्रध्वंसः फलं कल्पयितव्यम् । ततश्च प्रत्यवायावच्छिन्नं तद्धेतुं निरूप्य तदभावः फलं कल्पयितव्यम् इति गौरवम् । सुखस्य तु स्वयमेव साध्यत्वं सुकल्पमिति लाघवं तेन सुखरूपे तावत्साध्ये कल्पयितव्ये पशुपुत्रादिसुखविशेषापेक्षया ऽनवच्छिन्नसुखरूपस्य स्वर्गस्य सर्वान् प्रत्यविशिष्टत्वादिति विशेष उच्यते । ये ऽपि जीवदधिकारं प्रयुक्तिकल्पनाभयादनिष्ट्वा कामाधिकारमिच्छन्ति तैरपि प्रत्यवायनिवृत्तिकाममुत्सृज्य स्वर्गकामकल्पने ऽयमेव न्यायः समाश्रयितव्यः । विद्यन्ते हि तेषामपि दर्शने शंय्वधिकरणसिद्धान्तात्के चित्प्रत्यवायकरा निषिद्धाः अभ्युपगम्यैतदुच्यते न तु जीवने ऽधिकारविशेषणे किञ्चिद्गौरवम् । ननु निमित्ताधिकारे विधेः प्रयोजकत्वं कल्पयितव्यमिति तैरत्रापि विधेः फलसाधनत्वं कल्पयितव्यमित्यविशेषः प्रत्युत प्रयोजकत्वमेव विधेः स्वाभाविकमप्रयोजकत्वन्त्वपवादः । किञ्चाख्या-

तार्थाविनाभावप्रतीतकर्तृत्ववत्त्वेनैवाजीवतस्तदनुपपत्तेर्जीवनं प्रतिपन्नं तस्याधिकारिविशेषणत्वमेव केवलं कल्प्यम् इतरत्र फलकामनास्वरूपमेवान्यतो ऽप्रतिपन्नं कल्प्यमिति महाविशेष इति । प्रकृतमनुसरामः । तदेवं विश्वजिति तावत्स्वर्गः फलं यावज्जीवादिष्वावश्यकत्वात्पापक्षय इत्युक्तम् । यत्तु वियुनादीनामप्यावश्यकत्वं तत्फलत्वादिति तन्न आवश्यकानां पापक्षयः फलमुच्यते न तत्फलानामावश्यकत्वमिति । कः पुनरनयोर्विशेषः । अयमस्ति विशेषः यत्फलमवश्यमेव साधयति तदावश्यकं नैमित्तिकञ्च तथा वियुनादि तु नावश्यं फलं साधयतीति शब्दो ऽस्ति निमित्ताश्रवणात् । फलन्तु सर्वेषामिष्टं नाम भवतु फलसाधनत्वावश्यंभावश्चाङ्गसंकोचनिमित्तमिति न यथाशक्ति प्रयोगप्रसङ्ग इति गभीरो ऽयं न्यायमहाह्रदः। आह कथं पुनरवश्यंभावादङ्गसंकोच इति । उच्यते अवश्यमेवास्मिन् सतीदं कृतं फलं साधयतीति प्रतीयते । यदि त्वङ्गलोपे न साधयेत् अवश्यसाधनत्वं विरुद्ध्येत । नन्वधिकारिणा कृतमवश्यं साधयतीति वक्तव्यमितरथा शूद्रादिकृतमपि साधयेत् अकाले च । सर्वाङ्गशक्तश्चाधिकारीसन्यादृशेन कृतमसाधनमिति । तदुच्यते न तावच्छक्तिरधिकारिविशेषणं संश्रूयते। सा ऽनुष्ठानोपदेशाऽन्यथाऽनुपपत्त्या ऽशक्तस्य तदुपदेशासम्भवात्कल्प्यते । तत्र यावत्प्रयोगविधिना श्रुत्यर्थाद्वा ऽनुष्ठाप्यते तच्छक्तिरधिकारिविशेषणं सा च स्ववाक्यनिमित्ताविरोध्यङ्गमनुष्ठापयतीति यावन्त्यङ्गानि यदा अनुष्ठातुं शक्यन्ते तावन्ति तदा ऽनुष्ठापयति । न चैवमङ्गोपादानपरित्यागाभ्यां वैरूप्यं प्रसज्यते यथाशक्ति कुर्यादित्येवंविधैकरूपयैव वचोभङ्ग्योभयसिद्धेः । एतच्च प्रयोगविध्यनुष्ठाप्येष्वङ्गेषूच्यते । यद्धि कुर्यादित्युच्यते तद्यथाशक्तीत्युपपद्यते । यानि तु स्वभावसिद्धा-

नि विध्यन्तरसिद्धानि चोपजीव्यन्ते यथा लोके ऽर्थार्जनादि वेदे कालो विद्या ऽग्निश्च तेषां स्वरूपेणैवाधिकारिविशेषणत्वम् अमावास्यासम्बन्धी द्रव्यवान् विद्यावानग्निमानिति। एतदुक्तं भवति। अङ्गं हि नाम विधिसम्बन्धादुपादीयते निमित्तानुरोधात्यज्यते वा उभयानुग्रहार्थं वा शक्तं प्रत्युपादीयते ऽशक्तं प्रति त्यज्यतइति नान्या गतिरस्ति । तत्रोभयानुग्रहस्तावत्साधीयान् यदि सम्भवति। सम्भवश्चोपादेयेष्वङ्गेषु यथाशक्ति व्रीहीन् संपादयेत् यथाशक्ति वा ऽवहन्यादिति । आहवनीयादिस्वरूपन्तु नानेन विधिनोपादीयते। यद्यपि होमं प्रत्युपादीयते स्वरूपन्तु नोपादीयते तत्र यद्याहिताग्निराहवनीये जुहुयादितरश्च यत्र क्वचिदिति विधीयते ततो वैरूप्यं प्रसज्येत। न च यथाशक्त्याहवनीयं संपाद्य जुहुयादित्युभयसाधारण्येन विधानं सम्भवति। आहवनीयादिसम्पादनस्यात्रार्थादपि व्रीह्यादिसम्पादनवद्विधानात् । तेनाहवनीयमनादृत्यैव होममात्रमनुष्ठाप्येत । आहवनीयवन्तं वा ऽधिकृत्याहवनीये होमस्तत्रानादरे सत्याहवनीयविधेरत्यन्तबाधप्रसङ्गात् । यावज्जीवशब्दस्य तदीयजीवने ऽपि कृतार्थत्वेनात्यन्तपीडाभावात् अग्निमान् जीवन् जुहुयादित्येवमाश्रीयते । अनेन कालविद्यादयो व्याख्याताः । नन्वेवमङ्गान्तरे ऽपि किमिति जीवनं नोपसंह्रियते तच्छक्तिमान् जीवन्निति शक्त्यपेक्षया ऽप्युपसंहारे तेषामत्यन्तविरोधाभावात् । तत्र निमित्तं वा ऽङ्गानुरोधेन किञ्चिद्बाध्यते अङ्गानि वा निमित्तानुरोधेनेति चिन्तायां प्रधानवाक्ये श्रुतत्वेन निमित्तं प्रथमं प्रधानमनुरुध्य प्रधानाविरोधेनाङ्गानि सम्बन्धयन्ति । काम्ये तु निमित्तवाक्यस्य कश्चिद्विरोधो नास्तीत्यङ्गान्यपेक्षितान्युपसंह्रियन्तइति निखिलाङ्गयुक्तस्यैव प्रयोगः। नित्ये तु यथोक्तेन न्यायेन विप्राग्निकालार्षेयवरणपरित्यागेनान्येषामङ्गानां यथाशक्त्यु-

पसंहार इति सिद्धः काम्यनित्यविशेषः । आह भवेदेवं यदि निमित्तानन्तरं नैमित्तिकेनावश्यं भवितव्यम् न तु तदस्ति कारणपर्यायो हि निमित्तशब्दः न चावश्यं कारणानि कार्यवन्ति सत्यपि कारणे सहकारिव्यपेक्षया कार्यविलम्बदर्शनात् । तदुच्यते कारणशब्दस्तावदनेकेष्वनेकविधेषु च भावेषु कार्यजननं निमित्तीकृत्य प्रवर्तमानो न तदतिवर्तितुमर्हति । न खलूत्सृष्टस्रजं पुरुषं स्रग्विणमाचक्षते । यस्त्वकुर्वत्यपि मृत्पिण्डे घटकारणव्यपदेशः स लक्षणयेति द्रष्टव्यम् । न च यावज्जीवादिशब्दस्य लक्षणाकारणमस्तीति मुख्यमेव जीवनादीनां निमित्तत्वं तादृशं च कार्याव्यभिचारीति भवत्येव नैमित्तिकस्यावश्यंभाव इति युक्त एवाङ्गसंकोच इति ।

यस्य नैमित्तिकं कर्म विफलं तस्य तादृशः ।
अनुष्ठानं कुतः सिद्ध्येद्यथाशक्ति कुतस्तराम् ॥ १० ॥

कार्यस्य किं न फलापेक्षा ऽस्ति स्वयमेव कार्यरूपत्वात् । विश्वजिदादावपि न फलापेक्षया स्वर्गः कल्प्यते किन्तु कार्यस्य कृत्यधीनत्वात् कृतेश्च कर्तृत्वाधिकारित्वप्रणाडिकया नियोज्यापेक्षत्वात्तस्य चाविशिष्टस्यानुपपत्तेस्तद्विशेषणापेक्षायां स्वर्गस्तद्विशेषणतया कल्प्यते न फलतया तथाविधस्य च तस्य तादर्थ्याधिकरणन्यायेन फलत्वं संपत्स्यते । नैमित्तिकेषु तु निमित्तस्यैव नियोज्यविशेषणस्य लब्धत्वान्न तद्विशेषणतया फलसिद्धिः । न च फलतया ऽनपेक्षितत्वात् । भावनाया हि वाक्यार्थत्वे स्याद्भाव्यापेक्षा । भावनोपसर्जनस्य तु भाव्यरूपस्यापूर्वस्य वाक्यार्थत्वेन फलापेक्षा नास्तीति नैमित्तिकं कर्म विफलमिति यस्य दर्शनं तस्य मते तादृग्भूतस्य विफलस्य कर्मणो ऽनुष्ठानमेव न सिद्ध्यति प्रागेव तु यथाशक्त्यनुष्ठानम् ।

कार्यावगमात्प्रवृत्तिर्न फलमपेक्षतइति चेन्न फलवत्त्वादृते कार्यत्वस्यैवासम्भवात्। कृतिप्रधानं हि कार्यमुच्यते। न च सुखदुःखपरिहारतत्साधनव्यतिरिक्तं कृतेः प्रधानं भवितुमर्हति। नन्विदमनुमानमागमविरुद्धमुत्थं नोत्पत्तुमर्हति। आगमेन ह्यपूर्वस्य कार्यत्वमुच्यते। तत्कथमनुमानेन निराक्रियते। सत्यं प्रवृत्त एवागमो ऽनुमानं निरुणद्धि तत्प्रवृत्तिरेव तु पदार्थयोग्यत्वाधीना न चासुखस्यातत्साधनस्य वा ऽपूर्वस्य कृतिं प्रति प्राधान्ययोग्यता ऽस्ति। एकशब्दवाच्यत्वादविरोध इति चेन्न व्युत्पत्तिविरोधात्। यदि मन्येत एकेन हि प्रत्ययेन कृतिस्तत्प्रधानं च कार्यमुच्यते अतस्तत्र योग्यत्वमकारणं यत्र त्वनन्वितौ स्मृतौ पश्चादन्वितावभिधेयौ तत्र योग्यत्वं कारणमिति तन्न व्युत्पत्तिविरोधात्। अन्वयायोग्ययोर्ह्यर्थयोरनेनैव शब्देनान्वितावभिधेयाविति व्युत्पत्तिरेवासम्भावनीया। तेनायोग्यता भिन्नशब्दवाच्ययोरन्वयं निरुणद्धि एकशब्दवाच्ययोस्तु व्युत्पत्तिमपि। व्युत्पत्त्यवसरे नास्त्ययोग्यत्वमिति चेन्न इतरत्रापि प्रसङ्गात्। स्यादेतत्। कामाधिकारे ह्यपूर्वस्याभिधेयत्वं निरूप्यते तत्र च फलानुकूलत्वादस्येत्र कृतिप्राधान्ययोग्यत्वमपूर्वस्येति। तन्न एवं सति नैमित्तिके ऽपि फलं प्रसज्येत। यदा हि कामाधिकारे कार्यत्वनिर्वाहकत्वेन फलवत्त्वमङ्गीकृतं तदा नैमित्तिके ऽपि कार्यत्वाभ्युपगमेन तन्निर्वाहकं फलवत्त्वमपि नियोज्यवदङ्गीकर्तव्यम्। तदभावे नियोज्यत्वाभाव इव कार्यत्वस्यैव प्रविलयान्नानुष्ठानं सिद्ध्यति नतरां यथाशक्त्यनुष्ठानमित्यास्तां तावत्। ननु च।

निमित्तफलसम्बन्ध एकवाक्येन युज्यते।
उद्देश्यद्वयसम्बन्धे वाक्यभेदः प्रसज्यते ॥ ११ ॥

निमित्तफलयोर्हि द्वयोरुद्देश्ययोरेकवाक्यसम्बन्धासम्भवा-त्प्रत्युद्देश्यं वाक्यपरिसमाप्तेर्निमित्तवाक्ये दुरभ्युपगमं फलमिति। उच्यते।

द्वाभ्यां विधेयसम्बन्धे वाक्यभेदः प्रसज्यते।

उद्देश्येन निमित्तेन विधेयस्य न सङ्गतिः॥ १२॥

विधेयस्य हि द्वाभ्यामुद्देश्याभ्यां सम्बन्धे वाक्यभेदो भवति न चेह तथा विधेयस्य कर्मणः फलेन सम्बन्धात्। तत्कर्तव्य-तायाश्च निमित्तेन। न चैवं सति वाक्यभेदो भवति साकाङ्क्ष-त्वात्। भवति ह्यस्मिन् सतीदं कुर्यादित्युक्ते किमर्थमित्याकाङ्क्षा तत्रैतदर्थमिति संबध्यमानं फलं न वाक्यं भिनत्ति समानजातीयं ह्युद्देश्यद्वयं वाक्यं भिनत्ति न विजातीयम्। यथा यस्य पिता पितामहः सोमं न पिबेदिति निमित्तद्वयं यः प्रजाकामः पशुकाम इति फलद्वयं तस्मान्नास्ति वाक्यभेद इति। यत्तु भगवता मण्ड-नाचार्येण निमित्तस्योद्देश्यत्वं वाक्यभेदपरिहारार्थं निराकृतं तद्विधेयं प्रत्युद्देश्यभावाभिप्रायं वार्तिके बहुशो निमित्तस्योद्दे-श्यत्वाभिधानादित्यलमतिविस्तरेण। तस्मात्सिद्धः काम्यनित्य-विशेष इति।

पार्थसारथिना सम्यग्विशेषः काम्यनित्ययोः।

आचार्यमतमाश्रित्य न्यायलेशात्प्रदर्शितः॥ १३॥

इति श्रीयज्ञात्मसूरिसुतपार्थसारथिसूरिविरचितायां
न्यायरत्नमालायां नित्यकाम्यविवेकः॥

अङ्गस्वरूपसंबन्धप्रमाणं सप्रकारकम् ।
यदुक्तं वार्त्तिके सम्यक्तत्संक्षेपेण कथ्यते ॥ १ ॥

यदङ्गस्वरूपं यथाविधं च यश्च तस्य प्रधानेन संबन्धो यथा च यच्च तत्र प्रमाणं यथा च तत्प्रमाणं भवति तत्सर्वं यथावार्त्तिकमनुसंधास्यामः । तत्र

दृष्टादृष्टोभयार्थत्वात्त्रेधाऽङ्गानि प्रचक्षते ।
दृष्टार्थानि चतुर्द्धा स्युर्जातिद्रव्यगुणक्रियाः ॥ २ ॥
अदृष्टार्थं द्विधा कर्म्म द्व्यर्थमपि तन्मतम् ।
दृष्टार्थेष्वपि सर्वेषु नियमाद्दृष्टमिष्यते ॥ ३ ॥

त्रिविधमङ्गजातं दृष्टार्थमदृष्टार्थमुभयार्थमिति । दृष्टार्थमपि जातिद्रव्यगुणक्रियात्मम् । तत्र जातिगुणौ पशुना यजेतारुणया क्रीणातीति क्रियासाधनत्वेन विनियुक्तौ तत्साधनद्रव्यावच्छेदेन दृष्टेनैवोपकारेण तस्याः शेषभावमनुभवतः । कथं पुनर्द्रव्यपरिच्छेदात्क्रियासाधनत्वमिति चेत् । उच्यते । विशिष्टस्य क्रियासाधनत्वात्तस्य च विशेषणाधीनप्रतिपत्तित्वादप्रतिपन्नस्य च साधनभावासंभवात्तत्प्रतिपत्त्युपायभूतयोर्जातिगुणयोस्तद्द्वारेण भवति क्रियासाधनत्वं गुणस्य तु साधनत्वं श्रुतं यथोक्तेन प्रकारेणोपपादयितुं तद्विशिष्टस्य द्रव्यसाधनत्वं कल्प्यते । तदेवं जातिगुणयोर्दृष्टार्थत्वं द्रव्यस्य तु साक्षादेव । क्रिया ऽपि चावघातादिर्दृष्टार्थैव यां सन्निपत्योपकारकमाचक्षते । अदृष्टार्थत्वं तु क्रियाया एव । सा च द्वेधा सन्निपत्योपकारकरूपा प्रोक्षणादिः । आरादुपकारकरूपा प्रयाजादिः । सन्निपत्योपकारकाणि च दृष्टार्थानि कर्म्माणि स्वकारकाणां कर्म्मादीनामुत्पत्तिं प्राप्तिं विकारं वा कुर्वन्ति सन्ति तत्साध्यस्य प्रधानस्योपकुर्वन्ति । यथा संयवनं पिण्डस्योत्पत्तिम् । दोहनं पयसः प्राप्तिम् । अव-

घातो व्रीहिविकारम्। अदृष्टार्थं तु सन्निपातिसंस्कारं स्वकारकस्य कुर्वत्प्रधानोपकारि भवति। तदेवमुत्पत्त्यादिसाध्यभेदात्सन्निपाति चतुर्विधं भवति। तच्च कर्म्मादीनामन्यतमे कारके यथायथमुत्पत्त्यादि करोति। तद्यथा कर्म्मण्यवघातः कर्त्तरि व्रतम् करणे प्रयाजशेषाभिघारणम् संप्रदाने पशुपुरोडाशयागः अपादाने ऽग्नेस्तृणान्यपचिनोतीति अधिकरणे दध्यानयनम्। आरादुपकारकं तु न कारकद्वारम् अपूर्वद्वारं तु तत्प्रधानस्योपकरोति। दृष्टादृष्टार्थं च किंचित्कर्म्म यदाश्रयिशब्दाभिधानीयकं भजते। यथा पशुपुरोडाशयागः। स हि यागांशेनादृष्टमुद्देशांशेन च दृष्टं देवतास्मरणं करोतीत्युभयार्थः। एकं वा चोदनैकत्वादित्येकेनैव विध्युपपत्तेः प्रयोजनद्वयं न युक्तमिति चेत्। न दृष्टत्वादेव तावत्प्रयोजनापेक्षायां प्रथमं स्मरणं स्वीक्रियते। स्वीकृते च तस्मिंस्त्यागांशस्य तत्रोपयोगमपश्यतः पुनरपेक्षा जायते सा चादृष्टकल्पनयैव निवर्त्तते। तेनैवंजातीयकमुभयार्थम्। यस्तु यागस्य साक्षाद् दृष्टोपकारित्वाभावात्तदङ्गभूतयोश्चासेचनमन्त्रयोर्दृष्टं कुर्वतोर्यागे ऽधिकारानुप्रविष्टे तत्र विनियोगासंभवात्तस्य चापूर्वमन्तरेण तदनुप्रवेशासंभवाददृष्टार्थत्वमङ्गद्वारेण च दृष्टार्थतेत्युभयार्थत्वं स्विष्टकृदादीनामाह तस्य पशुपुरोडाशयागः पूर्वमेवाङ्गसबन्धाद् दृष्टं कुर्वन्नोभयार्थः स्यात्। तेन यथोक्तेनैव न्यायेनोभयार्थत्वम्। अनेनैव च न्यायेन सर्वेषु दृष्टार्थेषु नियमादृष्टमुन्नेयम्। यदि तु दृष्टमेव तुषविमोचनमवहननस्य प्रयोजनं स्यात्ततस्तस्यान्यतो ऽपि संपत्तेर्नावश्यमवघातो ऽनुष्ठीयेत। तत्रास्य विधिरुपरुध्येत। तेनावघातेनादृष्टानुविद्धास्तण्डुला निष्पाद्यन्तइति कल्प्यते क्रियानिष्पाद्यमपि चादृष्टं नियमस्य प्रयोजनापेक्षायां तत्फलत्वेन कल्प्यमानं नियमादृष्टमित्युच्यतइति। किं पुनरेषामङ्गत्वं किं

च तत्र प्रमाणम् । तदुच्यते ।

कर्त्तुः समीहितं येन सिद्ध्यत्यङ्गं तदुच्यते ।
प्रमाणं च विधिस्तत्र श्रुतिलिङ्गादिसंयुतः ॥४॥

समीहितसाधनत्वं तावदङ्गत्वं यद्यथा समीहितं पुरुषस्य तत्तथा येन तत्समीहानिमित्तपुरुषव्यापारगोचरीभूतेन साध्यते तत्तस्य समीहितस्याङ्गमुच्यते इदमेव च पारार्थ्यम् । यथोक्तम् । उद्देशेन हि तादर्थ्यं विविच्यतइति । उद्देशः समीहा ऽभिसंधिरिच्छेति पर्यायाः तेन समीहितसाधनमङ्गशब्देन शेषगुणादिपर्यायेणाभिधीयते । तत्र च विधिः प्रमाणम् । स हि चेतनप्रवर्त्तनात्मकः न चासौ समीहितसाधनादन्यत्र प्रवर्त्तयितुं शक्यते तेन विधिरेव स्वात्मा मा भाजीति स्वविषयस्य समीहितसाधनभावं कल्पयन्नङ्गत्वे प्रमाणम् । यदा तु श्रेयःसाधनत्वमेव विधिरित्याश्रीयते तदा श्रौतमेवाङ्गत्वं सर्वथा विधिशब्द एव श्रुत्या अर्थाद्वा ऽङ्गत्वं बोधयति । कथं तर्हि श्रुत्यादीनि विनियोगकारणानि तादर्थ्यमेव विनियोगः तच्चेद्विधितः न श्रुत्यादीनां तत्कारणत्वमुपपद्यते अत उक्तं श्रुतिलिङ्गादिसंयुत इति । विधिर्हि भावनायाः सामान्यतः श्रेयःसाधनत्वं बोधयंस्तद्विशेषसमर्पकमन्यदपेक्षते । न हि व्रीह्यादिश्रुतिमन्तरेणावघातादिभावनाया व्रीह्याद्यर्थत्वं सिध्यति । बर्हिर्लवनमन्त्रस्य वा लिङ्गमन्तरेण लवनार्थत्वम् । यागस्य वा स्वर्गकामादिपदसमभिव्याहारमन्तरेण तादर्थ्यं प्रयाजादीनां वा विना प्रकरणेन क्रत्वर्थत्वम् । तेन समीहितविशेषप्रतिपत्त्यर्थं तावत् श्रुत्याद्यपेक्षा धात्वर्थानां नामार्थानां च विधेयत्वमेव श्रुत्याद्यपेक्षं विधिर्हि विधेयस्याङ्गत्वमवगमयति नान्यस्य । न चासौ भावनाव्यतिरिक्तं साक्षाद्विधत्ते तामेव तु विशिष्टां विषयीकुर्वंस्तद्विशेषणान्यप्यर्था-

द्विधत्ते। यत्रापि च सामान्यतः प्राप्ता तत्रापि विशिष्टविषयत्वेन प्रतीयमानो विधिः प्राप्ताप्राप्तविवेकेन विशेषणपरो भवति। विशेषणत्वं च श्रुत्याद्यधीनं समानप्रत्ययाभिधानोपादानलक्षणया हि श्रुत्या कर्तृसंख्यादीनां भावनाविशेषणत्वम्। पदश्रुत्या धात्वर्थस्य पदान्तरोपात्तानां तु पश्वादीनां तत्संख्यालिङ्गयोश्च विभक्तिश्रुत्याद्यूहनीयम्। तदेवं शेषिविशेषप्रतिपादनेन शेषविशेषप्रतिपादनेन चाङ्गत्वं बोधयतो विधेः साहायकं कुर्वन्ति श्रुत्यादीनि विनियोगे कारणान्यभिधीयन्तइत्यनवद्यम्।

तत्र श्रुतिस्त्रिधा भिन्ना विध्युक्तिविनियोगकृत्।
विनियोक्त्री त्रिधा भिन्ना तुल्यशब्दादिभेदतः ॥५॥

तत्र विधात्री लिङाद्या। अभिधात्री व्रीह्यादिश्रुतिः। विनियोक्त्री त्रिधा एकाभिधानम् एकं पदं विभक्तिरिति। यस्य हि शब्दस्य श्रवणादेव सम्बन्धः प्रतीयते सा विनियोगश्रुतिः। तद्यत्रानेकार्थाभिधानमेकेन शब्देन युगपद्भवति विभक्त्येव लिङ्गसंख्याकारकाणाम् तत्र तेषामन्वितानामेवाभिधानम् अनन्वितानामनेकेषामर्थानामेकेन शब्देन युगपदभिधानस्यैकशेषमन्तरेणासम्भवात्। अक्षशब्देनेव विदेवनादीनाम्। अन्यथा गामानयेतिवद्यां कां चिद्व्यक्तिमक्षमानयेति नियुक्तो विदेवनादीनामन्यतममानयेन्न सन्दिहीत सन्दिग्धे च किंपरोऽयं प्रयुक्त इति। तस्मादन्विताभिधानम्। तत्रापि प्रतीतिबलेन कारकं प्रधानतो लिङ्गसंख्ये गुणतः। तथा चोक्तं यदा कर्म्मादयो विभक्त्यर्थास्तदैकत्वादयो विशेषणानीति। एतेन विभक्तिवाच्यायाः संख्याया विध्याक्षेपेण कारकविशेषणत्वमभिदधाना निरस्ताः। अनन्वितानामप्यभिधाने प्रथममेकशब्दोपात्तेन प्रधानभूतेन च कारकेणैव संख्या सम्बध्यते न प्रातिपदिकार्थेन

विप्रकृष्टेन गुणभूतेन च। प्रातिपदिकार्थान्वितैव सा ऽभिधीयते न कारकान्वितेति तु स्वसमयसन्तमसतिरस्कृतार्थतत्त्वानां श्रद्धामात्रं न प्रामाणिकं प्रतीत्यविशेषात् । यथा पशुनेत्युक्ते पशुः करणं प्रतीयते तथैकं करणमित्यपि प्रतीयतएव । न चैकमभिधानमर्थान्तरान्वितमर्थान्तरमभिदधानं न दृष्टम् । लिङ्प्रत्ययस्य कृत्यप्रत्ययस्य च कृत्यवच्छिन्नापूर्वाभिधानाभ्युपगमात् । कथं च विध्याक्षेपः । तादर्थ्यादिति चेत् । न । प्रातिपदिकार्थं कारकं वा प्रति विशेषणभूतस्यैकत्वस्य तदवधीरणेन विध्यैदमर्थ्यासम्भवात् । सम्भवे वा क्षिपिष्ठादीनामपि विध्यर्थत्वं स्यात् तदुपपत्तये च देवताभूतवायुविशेषणता कल्प्येतेति क्षिपिष्ठगुणविशिष्ट एव वायुर्देवता स्यान्न वायुस्वरूपमित्यलमनेनालौकिकविवादेन । तदेवं संख्यादेरेकशब्दोपादानलक्षणया श्रुत्या कारकान्वयः । प्रातिपदिकार्थस्य तु पदश्रुत्या । प्रकृतिप्रत्ययार्थयोर्हि श्रवणादेव सम्बन्धः प्रतीयते न पदद्वयवदर्थपरामर्शमपेक्षते इति पदमपि श्रुतिपक्षे निक्षिप्यते तदेवमेककारकान्वितानां जातिलिङ्गसंख्यानामरुणैकहायनीन्यायेन परस्परानियम इति । विभक्तिस्तु सम्बन्धमेव साध्यत्वं साधनत्वं वा प्रतिपादयन्ती विनियोगकारणम् । तत्र द्वितीया साध्यत्वं प्रतिपादयति तृतीयादयस्तु साधनत्वम् । तत्र व्रीहीनवहन्तीति द्वितीया साध्यत्वेन व्रीहीनभिदधाना अवघातस्य तेषु विनियोगकारणं भवति कथं तर्हि सक्तुषु होमस्याविनियोगः । तेषामसमीहितत्वात् ।

[१]समीहितं स्वशब्देन व्रीहयो न समीहिताः ।
अपूर्वसाधनत्वेन व्रीहयस्तु समीहिताः ॥६॥

सक्तवो हि द्वितीयया साध्यत्वेन प्राप्ता अपि समीहितत्ववैधु-

१ समीहितं हि भाव्यं स्यात्सक्तवो न समीहिता इति २ पु. पाठः ।

यान्त्यज्यन्ते । न हि द्वितीया समीहितत्वं प्रतिपादयति अपि तु साध्यत्वमेव वदति तेन सक्तूनां शेषित्वं न संभवतीति परिवृत्य होमभावना भाव्यान्तरमपेक्षते अवघाते तु नैवं परिवृत्तिकारणमस्ति । तथा हि । अवघातभावना भाव्यं समीहितमपेक्षमाणा द्वितीयाप्रतिपादितसाध्यत्वान् व्रीहीन्भाव्यत्वेन स्वीकर्तुमभिप्रस्थिता स्वरूपेण तेषामसमीहितत्वाद्विलम्बते । तत्र यदि कथं चिदपि तेषां समीहितत्वं सक्तुवन्न लभ्येत ततो विपरिवृत्त्य भाव्यान्तरमपेक्षेत संभवति च तेषां प्रकृतापूर्वसाधनविशेषरूपेण समीहितत्वम् । तथा हि व्रीहिभिर्यजेतेति यागसाधनत्वेन व्रीहयो विहिताः । न च तेषां साक्षाद्यागसाधनत्वमुत्पत्तिशिष्टपुरोडाशावरोधादुपपत्तिमत् । तेन पुरोडाशप्रकृतित्वेन तेषां साधनत्वमिति तेन रूपेण समीहिताः तथैव भाव्या भवन्ति । व्रीहिशब्दश्च तदुपलक्षणार्थः । एवं च यवेष्वप्यौपदेशिक एवावघातः सिद्धो भवति तद्रूपस्य तेष्वप्यविशेषात् । तदेवं प्रकरणसहितया श्रुत्या ऽवघातविनियोगस्तदधीनत्वादपूर्वसाधनलक्षणायाः । तथा हि दर्शपूर्णमासप्रकरणे श्रुतस्यावघातस्य श्रुतिसंयुक्तव्रीहिमात्रेण प्रयोजनापर्यवसानाद्व्रीहीनवहन्तीति वाक्यं साकाङ्क्षं प्रकृतेन दर्शपूर्णमासवाक्येनैकवाक्यत्वं प्रतिपद्यते दर्शपूर्णमाससम्बन्धिनो व्रीहीनवहन्तीति तत्सम्बन्धिनश्च प्रयोजनाविनाभूताः स्वसाध्यं प्रयोजनमुपस्थापयन्ति । तस्मिंश्चोपस्थिते तदर्थत्वमवघातस्य व्रीह्यर्थत्वापरित्यागेन संपादयितुं व्रीहिशब्दस्य तत्साधनलक्षणार्थता भवति । नन्वेवं सति बर्हिर्लुनातीत्यस्यापि दर्शपूर्णमासवाक्येनैकवाक्यत्वात्तत्साधने बर्हिषि लवनस्य विनियोगादङ्गप्रधानार्थता न सिध्येत् । न सम्यगवगतमस्मन्मतमायुष्मता । न हि दर्शपूर्णमासाभ्यां व्रीहिबर्हिःप्रभृतयस्तादर्थ्येन विशेष्यन्ते दर्शपूर्णमासार्थान् व्रीहीनिति किं तर्हि तत्-

संबन्धमात्रेण तत्संबन्धित्वं चाङ्गानामप्युपकारकत्वाद्भवत्येव त-त्सबन्धिभिश्च यत्प्रयोजनं प्रधानापूर्वं[1] मन्यद्वा ऽपूर्वमुपस्थाप्यते तत्साधनरूपे व्रीहिबर्हिरादिशब्दैर्लक्षिते तत्र विनियुज्यमानं लवनादि तस्य सर्वस्याङ्गं भवति। अत एव स्थानादग्नीषोमीययागेन विशेषिते ऽपि यूपे विनियुज्यमानानां रशनातद्धर्माणामग्नीषोमीयप्रधानतदङ्गापूर्वव्यतिरेकेण तद्यूपसाध्यसवनीययागाङ्गत्वमपि । ततश्च तदीयद्वितीयपरिव्याणे ऽपि रशना तद्धर्म्माश्चौपदेशिका भवन्ति । यद्यङ्गाङ्गेष्वपि तद्धर्म्मा भवन्ति वैमृधाङ्गेष्वपि तर्हि व्रीहितद्धर्म्मा उपदेशेनैव भवेयुः । न। तदभावात् । न हि वैमृधस्य व्रीहय उपदिष्टा भवन्ति यदा तु तत्र चोदकेन प्राप्नुवन्ति तदा सहैवावघातेन प्राप्नुवन्तीति द्विरुक्तत्वान्नोपदेशसम्भवः । अत एव सवनीयस्य वैशेषिके द्वितीयएव परिव्याणे रशनादीनामुपदेशो नान्यत्र द्विरुक्तिदोषादिति । तत्सिद्धं प्रकरणसनाथया श्रुत्या ऽवघातादीनां विनियोग इति । तदत्र प्रकरणवशेन श्रुतस्यैव शब्दस्यार्थविशेषलक्षणपरत्वं कल्प्यते । प्रयाजादिषु तु शब्दस्वरूपमेव विनियोजकं कल्प्यते इत्येतावान्विशेषः प्रकरणाधीनत्वं तूभयत्राविशिष्टम् । यस्य तु क्रतुसम्बन्धाव्यभिचारः स्रुवादेस्तत्सम्बन्धित्वेन विनियुज्यमानस्य खादिरत्वादेस्तद्द्वारेण प्रयोजनाकाङ्क्षायां बुद्धावविपरिवर्त्तमानमपि पूर्वमपूर्वं तेनैवाव्यभिचारिणा लिङ्गेन हृदयमागच्छतीति विना ऽपि प्रकरणं तत्साधनरूपलक्षणया विनियोगोपपत्तिः । यत्र द्रव्यं नास्ति तत्र साधनलक्षणं न घटते इति प्रकरणसहिता श्रुतिरवघातविनियोगे कारणम् । स्यादेतत् द्वितीयया व्रीहीणां साध्यत्वमात्रमभिधीयते अवघातसाध्यत्वं तु तत्पदसमभिव्याहारात्मकाद्वाक्यादेव तत्कथं श्रुत्या ऽवघातस्य व्री-

१ प्रधानाङ्गापूर्वमित्यधिकः पाठो २ पु॰ दृश्यते ।

ह्यङ्गत्वमिति। सत्यं यथाऽऽह भवान्किं तु विनियोगः श्रुत्यैव सम्बन्धो हि विनियोगः। स च समीहितासमीहितयोः साध्यसाधनभावरूपः। तत्र द्वितीया व्रीहिणां समीहितानां साध्यत्वं प्रतिपादयन्ती प्रतियोगिनः शेषत्वमाक्षिप्य तद्विशेषमात्रं पदान्तरसमभिव्याहारात्मकाद्वाक्याल्लभते। तृतीयादिरपि साधनत्वं प्रतिपाद्य प्रतियोगिनः शेषित्वमाक्षिप्य तद्विशेषमात्रार्थं वाक्यमपेक्षते तेनोभयत्रापि श्रुतिरेव विनियोगकारणमुच्यते। यत्र पुनः शेषिशेषयोः साध्यसाधनभावो न श्रुतः पदद्वयसमभिव्याहारादेव शेषशेषित्वयोग्यत्वमालोच्य कल्प्यः यथा स्वर्गकामो यजेतेति तत्र वाक्येनैव विनियोग इति। न हि तत्र स्वर्गकामस्य यागस्य वा साध्यत्वं साधनत्वं वा केन चिदुपात्तं पदद्वयसमभिव्याहारादेव तु सम्बन्धे कल्पयितव्ये असाधकं तु तादर्थ्यादित्यनेन न्यायेन कामिनः प्राधान्यं यागस्य गुणत्वं कल्प्यते। आह

स्वर्गकामस्य भूतस्य भाव्यत्वं संभवेत्कथम्।
भूतिकर्त्तुर्हि भाव्यत्वं भवनस्य न भूतिषु॥ ७॥

भवनस्य ह्युत्पत्त्यपरनामधेयस्य कर्त्ता भाव्यो भवति स्वर्गकामस्तूत्पन्नो नोत्पत्तुमर्हति इति न भाव्यः स्यादिति तदुच्यते॥

भूतस्यापि स्वरूपेण स्वर्गकामस्य भाव्यता।
धर्म्मान्तरविशिष्टस्य क्रतुव्रीह्यादिवद्भवेत्॥ ८॥

स्वर्गकामस्य तावद्यागभावना शेष इति वाक्यादवगम्यते शेषत्वं च द्वेधा भवति यदि तावत्स्वरूपमेव समीहितस्य साधयति तद्गतं वा कं चिद्धर्मभेदम् उभयथाऽपि च साध्यं शेषि

भवति यथा प्रयाजादिभावनायाः क्रतुः न हि प्रयाजादिभिः क्रतुस्वरूपमुत्पाद्यते तदुपकार एव तु साध्यते अथ च क्रत्वर्थत्वेनैव प्रयाजादयः सम्बध्यन्तइति वक्ष्यामः । यथा च व्रीहयो निष्पन्ना अप्यवघातस्य भाव्या भवन्ति न हि स्वरूपेणैवोत्पाद्यं भाव्यमिति नियमः समस्ति । धर्म्मान्तरोपेतेनापि रूपेण भाव्यतोपपत्तेः । तत्र प्रथमं भाव्यतामात्रात्मके शेषित्वे ऽवधृते ऽपि कमुपकारं कृत्वा ऽस्यायं शेषः किं स्वरूपोत्पत्तिं किं वोपकारान्तरमिति विशेषापेक्षायां सामर्थ्येन विशेषः कल्प्यते । तत्र स्वर्गकामस्य भूतस्य स्वरूपेण भाव्यत्वं न सम्भवतीति फलविशिष्टत्वेनैव रूपेण भाव्यत्वं भवति । अत एव फलपरं स्वर्गकामपदं मीमांसकवरिष्ठा मन्यन्ते । यथा दण्डी प्रैषानन्वाहेति दण्डविशिष्टे ऽनुवचनाङ्गत्वेन चोद्यमाने विशेष्यस्य पूर्वमेव क्लृप्तत्वाद्विशेषणभूतस्य दण्डस्यानुवचनाङ्गत्वप्रतिपादनपरं वचनं सम्भवति । तथा स्वर्गकामो यजेतेति विधिनैव यागभावनायाः पुरुषार्थत्वे प्राप्ते पुरुषस्य शेषित्वं न स्वरूपेण सम्भवतीति किंचित्फलमिच्छतस्तद्विशिष्टेन स्वरूपेण शेषित्वमिति सामर्थ्यादवगते फलविशेषमात्रे चानवगते स्वर्गकामस्य शेषित्वमुच्यमानं स्वर्गाख्यविशेषणपरमेव भवति तेन स्वर्गसाधनद्वारेण यागस्य पुरुषशेषत्वमिति । यथा ऽऽहुः ।

"अपेक्षितत्वाद् भाव्यस्य कामशब्दा हि तत्पराः ।
विशेषणप्रधानत्वं दण्डीत्यादिषु दर्शितमिति" ॥

तदेतदेकाशाद्ये विस्पष्टमेव भगवता भाष्यकारेणोक्तम् । ननु नैवात्र स्वर्गः फलं श्रूयते इत्यादिना फलस्य वाचकाभावं चोदयित्वा ऽनेन स्वर्गकामशब्देनेत्युक्त्वा ननु पुरुषविशेषस्यायं वक्तेत्यादिना चोद्यपूर्वकं पुरुषपरत्वं कालपरत्वं च स्वयं निरस्य

निमित्तपरत्वं चाख्यातोपात्तकर्तृसंख्याविवक्षाप्रतिपादनावसरे षष्ठे स्पष्टं सूत्रकारेणैव फलकामो निमित्तमिति चेत् न नित्यत्वादिति परिहृतमित्युक्त्वा परिशेषात्फलसंयोग एवायम् इत्युपसंहृत्य कथं पुनरनेन शक्यते फलमभिधातुमिति पृष्ट्वा वचनव्यक्तिद्वयमुपन्यस्य मलिनः स्नायादितिवत् शेषित्वेनान्वये पुरुषस्य स्वर्गकामाय याग उपदिश्यतइति दर्शयित्वा तत्र च स्वर्गाख्योपकारविशेषप्रतिपत्तिपरत्वमेव संपत्स्यतइत्यन्ते ऽभिहितम् । अन्तरेणापि तद्वचनं पुरुषमात्रमाख्यातादेव गम्यते तस्माद्यागात्स्वर्गो भवति इत्येवमर्थं वचनमिति । तदेवं यत्र साध्यसाधनभावप्रतिपादकविभक्त्यभावस्तत्र वाक्येन विनियोगः । यत्र तु शेषिणि साध्यत्वप्रतिपादिका यथा व्रीहीनिति शेषे च साधनत्वप्रतिपादिका विभक्तिर्यथा सोमेन यजेतेति तत्र श्रुतिविनियोगः । यत्राप्यन्यतरत्र सम्बन्धमात्रप्रतिपादिका षष्ठी यथा दध्नेन्द्रियकामस्येति शेषिणि यजमानस्य याज्येति शेषे तत्रापि योग्यत्वालोचनया सैव सम्बन्धविशेषे वर्त्ततइति श्रुतिविनियोगः । यत्रापि शेषिणि चतुर्थी मैत्रावरुणाय दण्डमिति तत्रापि संप्रदानस्य कर्मणा ऽभिप्रेयमाणस्य स्फुटमेव साध्यत्वश्रुतिरेव । तादर्थ्यचतुर्थ्यां तु स्फुटतर एव श्रुतिविनियोगः । यथा यः सोमवामी स्यात् तस्माएतं सौमेन्द्रं श्यामाकं चरुं निर्वपेत् सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति च । यत्र तु श्रुतिविपर्ययः यथा पूर्वेद्युरमावास्यायां वेदिमिति शेषिणि सप्तमी सक्तून् जुहोतीति शेषे द्वितीया तत्र लक्षणया साधनवाचिन्या साध्यत्वं तद्वाचिन्या च साधनत्वं प्रतिपाद्यम् । लक्षणा च सर्वत्र वाक्यनिमित्ता इति वाक्यविनियोग इति । एवं तावत् श्रुतिविनियोगः प्रपञ्चितः । आह कथं पुनर्विनियोगश्रुतेर्द्वैविध्यमुक्तं पदस्य कारकविभक्तीनां च विनियोजकत्वमिति हि द्वैविध्य-

मेव दर्शयति । पदग्रहणं तुल्याभिधानश्रुतेरपि दर्शनार्थमित्यदोषः । तथा च ।

कारकेण गृहीतत्वादेकत्वादेः क्रियार्थता ।
कारके श्रुतिगम्यत्वाद्बाधते द्रव्यशेषताम् ॥ ९ ॥

तथा

यथा पश्वङ्गमेकत्वं पदश्रुत्या प्रतीयते ।
समानप्रत्ययश्रुत्या बलीयस्या क्रियाङ्गतेति ॥ १० ॥

तत्र समानाभिधानश्रुतिं दर्शयति । तस्मात्त्रिविधा विनियोक्त्रीति सूक्तम् ॥

इति न्यायरत्नमालायामङ्गनिर्णये प्रथमः परिच्छेदः समाप्तः ।

सर्वभावगता शक्तिर्लिङ्गमित्यभिधीयते ।
वाक्यं तु पदसंघातमात्रमित्युदितं पुरा ॥ १ ॥
इतिकर्त्तव्यताकाङ्क्षा प्रक्रिया द्विविधा च सा ।
पाठानुष्ठानसादेश्यभेदेन द्विविधः क्रमः ॥ २ ॥
समाख्या यौगिकी संज्ञा लौकिकी वैदिकी तथा ।
विनियोजकमेतावदिति भाष्यविदो विदुः ॥ ३ ॥

तत्र बर्हिर्मन्त्रस्य प्रकरणसापेक्षेण लिङ्गेनापूर्वसाधनविशेषबर्हिर्लवने विनियोगः । दृष्टार्थेष्वेवाङ्गेषु लिङ्गस्य विनियोजकत्वं नादृष्टार्थेषु । श्रुतिवच्चात्रापि प्रकरणापेक्षा साधनविशेषाङ्गत्वसिद्धये भवति । अयं चापरो विशेषः यदत्र विनियुज्यमानस्य मन्त्रस्य लिङ्गविनियोगात्प्रागेव केनापि प्रमाणेन क्रतुसंबन्धोऽपेक्षितः । तदभावे लिङ्गविनियोग एव न सम्भवतीति लिङ्गक्रमसमाख्यानादिरत्र प्रतिपादितम् । वाक्यविनियोगस्तु श्रुतिविनियोगावसरएव विवेककथनार्थं प्रपञ्चितः । मन्त्रेष्वपि यानि समवेतार्थाभिधायिव्यतिरिक्तानि सवित्रादिपदानि तेषां वाक्येनैव निर्वापादिषु विनियोगः । प्रकरणविनियोगस्तु प्रयाजादीनाम् । किं पुनः प्रकरणम् इतिकर्त्तव्यताकाङ्क्षा । कस्य पुनरितिकर्त्तव्यताकाङ्क्षा । भावनाया इति कर्म्मण्यारम्भभाव्यत्वादिति भाष्यकारो वक्ष्यति । भावना हि प्रतिलब्धभाव्यसम्बन्धा तत्सिद्ध्यर्थं करणमपेक्षते । तत्र प्रत्यासत्त्या प्रकृत्यर्थः सम्बध्यते यागेन स्वर्गं भावयेदिति । ततः कथमितीतिकर्त्तव्याकाङ्क्षा भवति । तेन भाव्यसिद्ध्यर्थं भावनया सम्बध्यमानमितिकर्त्तव्यताजातं भाव्यप्रयुक्तमुच्यते । न तु स्वरूपेण भाव्यमितिकर्त्तव्यतया सम्बन्धुमर्हति । न हि भवत्यपूर्वं कथमिति । भवति तु भावयेत्कथ-

मिति । ननु स्वर्गं भावयेदिति ब्रूयुर्भावना च फलस्योच्यत-इत्येवमादिभिस्तत्र तत्र भाष्यकारेण फलस्य भाव्यत्वाभिधाना-त् भाव्यप्रयुक्तमितिकर्त्तव्यताजातं फलप्रयुक्तं स्यान्नापूर्वप्रयु-क्तम् । उच्यते । सत्यं फलमेव प्रथमं भाव्यतया सम्बध्यते तत्तु कालान्तरभावित्वात्क्षणभङ्गुरेण यागेन साक्षान्न भावयितुं श-क्यतइत्यपूर्वद्वारेणेत्युपबध्यते यागेनापूर्वं कृत्वा स्वर्गं कुर्यादि-ति । न चैतावता यागस्य करणत्वहानिः । तुषपक्वा भवन्तीति-वदुपपत्तेरिति सप्तमाद्ये भाष्यकारेणैवोक्तम् । एवं चापूर्वे कृते तत एव फलं सिद्ध्यतीत्यवधारणात्फलकर्त्तव्यता ऽपूर्वे संक्रा-मतीतिकर्त्तव्यतामपेक्षते कथमनेन यागेनापूर्वं कर्तव्यमिति । त-त्रेत्थंभावेन प्रयाजादयः सम्बध्यन्ते । तेन भाव्यप्रयुक्तमप्यान्त-रालिकभाव्ये ऽपूर्वे वाङ्मियमवदीक्षणीयापूर्वे पर्यवस्यति । एत-च्चोपरिष्टाद्विस्पष्टं वक्ष्यामः । तेनापूर्वभावनया प्रयाजादयः स-म्बध्यन्ते । प्रयाजभावना हि भाव्यमपेक्षते फलभावना चेत्थं-भावम् अतस्तयोराकाङ्क्षासन्निधियोग्यत्वैरेकवाक्यता प्रयाजभाव-नोपेता दर्शपूर्णमासभावना ऽपूर्वं साधयतीति । तेन विशिष्टस्य साधनत्वं विशेषणेनोपकारजनने घटते नान्यथेति विशेषणस्य प्रयाजस्योपकारकत्वं कल्प्यते । तत्रापि च करणोपकारकत्वे-नैव तदुपकारकत्वं सम्भवतीति करणोपकारकत्वं भावनाङ्गत्वे-नावगतानां प्रयाजादीनां तादर्थ्यनिर्वाहाय पश्चात्कल्प्यते । आह च ।

"एकभावनयोपात्तास्त्रयो ऽप्यंशाः परस्परम् ।
उपकार्योपकारित्वं पश्चादनुभवन्ति त"इति ॥

एवं चोभयोरप्याकाङ्क्षोपरमः । ननु प्रयाजभावना भाव्यम-पेक्षते फलभावना च करणोपकारमित्याकाङ्क्षावशात् प्रथममेव प्रयाजभावना करणोपकारेणैव सम्बध्यते न तु तादर्थ्येनैव कृ-

तुना तेन प्रकरणमुपकार्योपकारकभावे प्रमाणं न तु तादर्थ्ये इति। बालिशभाषितमेतत्। न ह्याकाङ्क्षा स्वयमेव प्रमाणम्। शब्दस्तु प्रमाणम् आकाङ्क्षया त्वेतावद्भवति। नायं शब्दो निरपेक्षः किं तु अन्येन सहैव पर्यवस्यतीति तत्र यद्यन्यो योग्यः सन्निहितो भवति ततस्तेनैव सहैकवाक्यभावं भजते। अथ न सन्निहितः ततो ऽध्याहृत्य योग्यं तेन सह पर्यवस्यति। तदिह समिधो यजतीत्यस्य साकाङ्क्षस्य सन्निधौ न क्रतूपकारः सन्निहितः तच्छब्दस्याश्रवणात्। तत्र यदि दर्शपूर्णमासाभ्यां श्रुताभ्यामेकवाक्यतायामाकाङ्क्षा पर्य्यवस्येत् ततो ऽध्याहृतेनोपकारेण स्यादेकवाक्यता। यथोक्तेन तु मार्गेण दर्शपूर्णमासैकवाक्यतायामाकाङ्क्षापर्य्यवसानमुभयोर्भवति। अपेक्षितो ऽपि प्रथममुपकारो न केन चिदपि समर्पितः येन प्रयाजवाक्येनैकवाक्यतया ऽन्वियात्। तेन दर्शपूर्णमासप्रयाजवाक्ययोरेकवाक्यतायां गुणप्रधानभावेन निष्पन्नायां पश्चादपेक्षितोपकारनिर्वृत्तिः। आह च। दर्शपूर्णमासयोरुपकारमपेक्षमाणयोः प्रयाजादिषु वोपकार्य्यमपेक्षमाणेष्वनिष्पन्नावस्थ एवोपकारे प्रकरणात्तावत्तादर्थ्यं प्रतीयते। तदन्यथानुपपत्तेः करणोपकारः कल्प्यते। तेनोपकारापेक्षामात्रमिह तादर्थ्यप्रमाणानुमाने व्याप्रियते। नोपकरादेव शेषित्वं तादर्थ्यं वेति। अत एव पदार्थपूर्वकः प्रकृतावुपकार इति तन्त्रज्ञाः। विनियुक्तेषु पदार्थेषु कल्पिते चोपकारे विकृतिरपेक्षावशात्प्रथममुपकारमेव गृह्णातीति तत्रोपकारपूर्वकत्वम्। तदेवं प्रकरणं प्रयाजादीनां विनियोजकम्। तच्च द्विविधं महाप्रकरणमवान्तरप्रकरणं चेति। तत्र फलभावनायाः प्रकरणं महाप्रकरणम्। तदन्तराले यदङ्गभावनायाः प्रकरणं तदवान्तरप्रकरणम्। तच्चाभिक्रमणादीनां प्रयाजादिषु विनियोजकम्। भवति हि अङ्गभावनानामप्यवान्तरा-

पूर्वसिद्ध्यर्थं कथंभावाकाङ्क्षा । अन्यथा वाङ्क्ष्यमस्य दीक्षणीयापूर्वप्रयुक्तिर्न स्यात् । कश्चित्त्वाह । नावान्तरप्रकरणं नाम प्रमाणं सम्भवति । प्रमेयासम्भवात् । प्रतिलब्धभाव्यसम्बन्धा हि भावना कथंभावमपेक्षते । तत्र यावदेकाङ्गभावना प्रयोजनापेक्षा प्रकरणेन फलभावनाङ्गं भवति तावदितरा ऽपि प्रधानभावनयैव सम्बध्यतइति सर्वेषां प्रधानभावनान्वितानां नान्योन्याङ्गाङ्गिभावः सम्भवतीति नावान्तरप्रकरणविनियोज्याङ्गसम्भवः । अभिक्रमणं तु वाक्येनैव प्रयाजादिषु विधीयतइति तदङ्गं नावान्तरप्रकरणादिति । स नूनं वार्त्तिके

"परप्रकरणस्थानामङ्गे श्रुत्यादिभिस्त्रिभिः ।
ज्ञाते पुनश्च तेनैव संदेशेन तदिष्यते" ॥

इत्यस्मिन्नश्रुतपूर्वी । यत्र ह्यङ्गोद्देशेनैव श्रुत्यादिभिः किं चिद्विनियुज्यते तत्रावश्यमङ्गस्य कथंभावापेक्षोत्थापयितव्या । सा च यदि परस्तादपि किं चित्तदुद्देशेनैव विधीयते तावदनुवर्त्ततएव । तयोः संयुक्तयोरङ्गयोर्मध्ये यदङ्गमसंयुक्तं विहितं तत्तदाकाङ्क्षानुवृत्तेः सन्निधिविशेषाच्च तेनैव सम्बध्यते । यो ऽप्यङ्गापूर्वाणामननुष्ठेयत्वान्न स्वारसिकीं कथंभावाकाङ्क्षामिच्छति तेनापि कारणान्तरसमुत्था सा ऽभ्युपेतव्यैव । अन्यथा दीक्षणीयादिष्वतिदेशानवकल्पनात् । तेन प्रयाजाद्युद्देशेन श्रुत्यादिभिः किं चिदङ्गमुक्त्वा मध्ये किं चिदसंयुक्तं विधाय पुनरन्ते प्रयाजाद्युद्देशेनाङ्गे विहिते मध्यस्थस्यासंयुक्तस्याङ्गस्यावान्तरप्रकरणात्प्रयाजाद्यङ्गता भवति । यस्त्वेतन्न मृष्यति तस्य सामिधेनीनां निविद्भिर्व्यवधानाभावेन सत्यपि सन्निधाने बलीयसा प्रकरणेनोपनीतस्य प्रधानाङ्गत्वसिद्धेर्निविद्भिः सामिधेनीनां विच्छेदप्रतिपादनमनर्थकं स्यात् । अथोच्येत उपव्ययतइत्येकपदश्रवणादन्विताभिधानसिद्ध्यर्थमर्थान्तरापेक्षायां सन्निहिताभिः

सामिधेनीभिरन्विताभिधानं भवति सन्निधानाभावे तु गत्यन्तराभावात्प्रकृतेन प्रधानेनान्वयः सम्पद्यतइति । तदयुक्तम् । प्रकृतिप्रत्यययार्थयोरेव मिथस्तत्सिद्धेः प्रत्ययेन हि प्रधानापूर्वमनूद्य तदङ्गत्वेनोपव्यानं विधीयते तद्धि कर्तृसंस्कारत्वात्प्रधानापूर्वविषयमवघातादिवदनुप्रविशति । स्तुतिपदानि च निवीतं मनुष्याणामित्येवमादीनि सन्ति यैरुपव्यानमन्वितमभिधीयतइति नान्विताभिधानसिद्ध्यर्थमर्थान्तरापेक्षा । तस्मादङ्गानामपि भवत्येव कथमिति प्रकारविशेषाकाङ्क्षा तदाह भगवान्भाष्यकारः । भवति हि सामिधेनीरनुब्रूयात्कथमिति विशेषाकाङ्क्षवचनमिति । कश्चैष न्यायो यत्कार्यरूपत्वे सत्यपि निरधिकाराणामपूर्वाणां स्वरसतः कथंभावापेक्षा नास्ति साधिकाराणान्तु विद्यतइति कार्यत्वं हि तदपेक्षायां निमित्तं साधिकारं निरधिकारमिति तु विशेषमात्रं तस्मादस्त्येवाङ्गे ऽङ्गस्याप्यपेक्षा । यद्येवं कथं तर्हि प्रयाजादिष्वव्यक्तचोदितेषु सौमिकधर्म्मानतिदेशः कथं वा दीक्षणीयादिष्वैष्टिकधर्म्मातिदेशः । यथा तत्तथा श्रूयताम् । स्वारसिकी हि निरधिकाराणामाकाङ्क्षा नास्ति कारणान्तरसमुत्था तु नापन्होतुं शक्यते । तत्र दीक्षणीयादिषु प्रयाजादिदर्शनेनेतिकर्त्तव्यताकाङ्क्षा कल्प्यते तस्यां च सत्यामतिदेशसिद्धिः। प्रयाजादिषु तु न किं चिदाकाङ्क्षोत्थापकमस्ति इति नातिदेश इति । अत्राभिधीयते । इदमत्र विकल्पनीयं किं येन प्रयाजादिना ऽऽकाङ्क्षा कल्प्यते तेन तदेव प्रति सा कल्प्यते उत तद्दर्शनादेव तावदविशेषेणेतिकर्त्तव्यताकाङ्क्षा कल्प्यतइति । यदि तावत्पूर्वः कल्पः ततो दैक्षस्य पशोरङ्गत्वेन स्वाभाविकाकाङ्क्षाविरहिणः प्रयाजादिदर्शनेन दर्शपूर्णमासविध्यन्ताकाङ्क्षैव कल्प्यतइति न विकृतित्वं सिद्धं कृत्वा तत्प्रकृतिविशेषविचारो घटते । यदा तावत्स्वरूपमात्रमालोच्यते तदा निराकाङ्क्षत्वान्न

प्रकृतिविशेषचिन्ता यदा तु प्रयाजादिदर्शनेन विकृतित्वं कल्प्यते तदा प्रकृतिविशेषस्यैव निर्णीतत्वान्न चिन्तावसरः । न च पशौ च लिङ्गदर्शनादिसत्र पशोरपूर्वत्वनिराकरणेन पूर्ववत्त्वमेव लिङ्गदर्शनेन साध्यते किमत्र कुतश्चिद्धर्म्मा अतिदिश्यन्ते उत नेत्येतावदेव विचार्य्यतइति वाच्यम् । अष्टमे विशेषातिदेशचिन्ताधिकारात् । न चासौ समाप्ता येन दर्विहोमवत्पूर्ववदपूर्वचिन्ता क्रियेत तस्माद्विशेषातिदेश एव चिन्त्यते । तथा च भाष्यकारो विशेषातिदेशविचारमेव दर्शयति । पशौ किं दार्शपौर्णमासिको विध्यन्त उत सौमिक इति । सिद्धान्ते ऽपि लिङ्गस्य प्रापकत्वमाक्षिप्य चोदनासामान्यादित्याह स च सामान्येन विकृतित्वे सिद्धे ऽवकल्पते नान्यथा । अथैतद्दोषपरिहाराय लिङ्गदर्शनेन तावदितिकर्त्तव्यतामात्राकाङ्क्षा कल्प्यते ततश्चोदनासामान्यादतिदेश इति तर्हि प्रयाजादिष्वभिक्रमणाख्यलिङ्गोपदेशसामर्थ्यादाकाङ्क्षापरिकल्पनादव्यक्तत्वेन सौमिकविध्यन्तप्रसङ्ग इति समानः पर्य्यनुयोगः । तदेतदावाभ्यामेवं परिहर्त्तव्यं न प्रयाजादीनामव्यक्तत्वं यस्य हि तद्धितेन चतुर्थ्या मन्त्रवर्णेन वा देवता नास्ति तदव्यक्तम् । प्रयाजादीनां तु मन्त्रवर्णादिभिर्देवतासंगतेर्नाव्यक्तत्वमिति । यदि तु यस्योत्पत्तिवाक्ये देवता नास्ति तदव्यक्तं तत उपांशुयाजस्याप्यव्यक्तत्वप्रसङ्गः । तस्य हि तद्वच्च देवतायां स्यादिति विचार्य विष्णुर्वा स्याद्धौत्राम्नानादिति मन्त्रवर्णाद्देवतासंगतिं वक्ष्यति । ज्योतिष्टोमस्यापि तर्ह्यैन्द्रवायवं गृह्णातीति तद्धितेनैव देवताऽभिधानान्नाव्यक्तत्वं स्यात् । न यागे देवता तद्धितेन विधीयते किं तु ग्रहणे तस्माददोषः । किं चासंभवादपि न प्रयाजादिषु सौमिकधर्म्मातिदेशः दर्शपूर्णमासयोर्हि साङ्गयोः पूर्वेद्युरुपक्रम्यापरेद्युः समापनं श्रुतं तत्रापि परिस्तरणादि हस्तावनेजनादि च तन्त्रम्

अपरेद्युरेवोपक्रम्य समापनीयम् । तत्र यदि प्रयाजादिषु सौमिकविध्यन्तो दीक्षणीयादिः औदवसानीयान्तः प्रत्येकमतिदिश्येत ततस्तस्मिन्प्रत्येकमनुष्ठीयमाने प्रधानस्य कालोत्कर्षः स्यात् । न च तन्त्रेण प्रसङ्गेन वा सकृदनुष्ठानसम्भवः । कालभेदात्तन्त्रमध्ये विधानाभावाच्च पूर्वं हि प्रयाजाः प्रधानादनुष्ठीयन्ते पश्चादनुयाजाः । ततो ऽपि सूक्तवाकादिव्यवहिताः पत्नीसंयाजाः । न चैवं सति तन्त्रं भवति दीक्षणीयादिष्विष्टिवैष्टिकविध्यन्तस्य । न च यावच्छक्ति कानि चिदङ्गानि विहाय कानि चिदनुतिष्ठेतेति विशेषापरिज्ञानाच्छक्यते ऽभिधातुम् । तस्मादनतिदेशः प्रयाजादिषु सौमिकविध्यन्तस्य तस्मादस्त्येवावान्तरप्रकरणम् । कथं तर्हि विदेवनादीनामभिषेचनीयाङ्गत्वं नेष्यते । चोदकप्राप्तैरेव धर्म्मैराकाङ्क्षापरिपूरणेनाभिषेचनीयस्य प्रागेव पर्यवसानात् । विकृतयो हि क्लृप्तोपकाराकाङ्क्षाः प्रथमं प्राकृतैरेव समीपस्थमङ्गं विहाय संबध्यन्तइति गृहमेधीयाधिकरणे भाष्यकारो वक्ष्यति । एवं निर्ज्ञातपर्यवसानस्यापि विकारस्य समीपस्थाङ्गवशादपर्यवसानं कल्पयितव्यं ततश्च क्रमो भवति । विकृतिष्वपि यत्प्राकृताङ्गमध्ये पठितं यथा आमनहोमस्तस्य प्रकरणेन ग्रहणम् । विदेवनादीनामपि तर्हि प्राकृताङ्गमध्ये माहेन्द्रस्तोत्रकाले ऽनुष्ठीयमानानां प्रकरणेनाभिषेचनीयाङ्गत्वप्रसङ्गः । न तत्रैषामुत्पत्तिः अन्यत्रोत्पन्नानां प्रकरणावगतराजसूयाङ्गभावानामपकर्षः स्तोत्रकाले विहित इति नाभिषेचनीयाङ्गत्वम् । राजसूयभावनायास्तु पवित्रादारभ्य क्षत्रस्य धृतिपर्यन्तो यागगणः स्ववाक्यस्थेन यजिना तन्त्रेणोपादाय करणत्वेन समर्पित इति यत्पवित्रस्य प्राकृतमङ्गं यच्च क्षत्रस्य धृतेस्तत्सर्वं राजसूयस्य प्राकृतमङ्गं तन्मध्यवर्त्तीनि विदेवनादीनि भवन्ति प्रकरणस्य गोचरः । तस्मादवान्तरप्रकरणाभ्युपगमे ऽपि न कश्चिद्दोष इति । द्विविधं प्रक-

रणम् । तच्च भावनार्थानामेवारादुपकारिणां केवलं विनियोजकं न द्रव्यादीनां नापि सन्निपातिनाम् । तेषां हि यथायथं श्रुत्यादिभिरेव विनियोगः प्रकरणं तु सहायमात्रम् । मन्त्राणामपि न स्वरूपेण प्रकरणग्रहणं तज्जन्यस्य तु वाक्यार्थप्रत्ययस्य क्रियारूपस्य तदपि लिङ्गसाहित्येनेति मन्त्राधिकरणे वाक्यार्थप्रत्ययस्त्वकृतार्थ इत्यादिना दर्शितम् ।

संविदन्ति तु ये कार्यमपूर्वं वाक्यगोचरम् ।
न दर्शाद्यङ्गता तेषां प्रयाजादेः प्रसिध्यति ॥ ४ ॥

कार्यभूतं प्रधानमपूर्वं लिङाद्यभिधेयमुपसर्जनीभूतसकलेतरपदार्थकं वाक्येन प्रतिपाद्यतइति ये मन्यन्ते तेषां मते प्रयाजादीनां दर्शाद्यङ्गता न स्यात् कथम् ।

आकाङ्क्षति प्रधानं हि न प्रधानान्तरान्वयम् ।
अङ्गापूर्वस्य येन स्यात्प्रधानापूर्वसंगतिः ॥ ५ ॥

न कार्यमन्यार्थं भवतीति न्यायात् प्रयाजापूर्वं स्वप्रधानभूतं न प्रयोजनान्तरमपेक्षते । अनपेक्षं च सन्निहितेनापि दर्शपूर्णमासापूर्वेण सङ्गन्तुं नार्हति । यत्त्वत्र केन चिदुच्यते साधिकारापूर्वसन्निधिसमाम्नातानि प्रयाजादिवाक्यानि न द्रागिवापूर्वान्तरमवगमयन्ति अवघातादिवदनुवादकत्वसंभवात् । किन्तु यागस्वरूपमेव स्वकारकविशिष्टमुपस्थापयन्ति । तच्चानन्यनिष्ठं स्वयं चाप्रयोजनीभूतं प्रयोजनरूपाधिकारविध्यन्वययोग्यमित्यधिकारवाक्यगत एव लिङ्शब्दस्तेन गुणभूतेनान्वितं स्वार्थमभिधत्ते तेषां च तदङ्गत्वं करणोपकारद्वारं स च संभूय सर्वैरङ्गैर्जन्यते । न च क्षणविशरारूणां तेषां स्वरूपेण संभवः संभवतीत्यवान्तरव्यापाररूपाणामपूर्वाणामवश्याश्रयणीयत्वात् । यो ऽसौ लिङ्शब्दः प्रागनूद्यमानार्थतया शङ्कितः स इदानी-

मपूर्वान्तरग्राहकग्रहणापादितप्रधानापूर्वैदमर्थ्ययागविषयतया वि
हतप्राधान्यमधिकाराङ्गत्वेनैवाभिधत्ते न स्वप्रधानं विषयविनि-
योगविरोधात् । एतदेवापूर्वमभिप्रेत्य भाष्यकारेणोक्तं न चावि-
हितमङ्गं भवतीति विधिशून्यानां कर्म्मणां भङ्गुरत्वान्नाङ्गत्वं सं-
भवतीत्यर्थः । नन्वेवं सति यस्तु पुरुषप्रयत्नः सो ऽनुवाद इत्यपि
भाष्यमस्ति सन्निपातिनि नैमित्तिके जञ्जभ्यमानमन्त्रवचनेन तदु-
क्तं तत्र हि कारकद्वारेणैवाङ्गत्वं विना ऽप्यपूर्वान्तरात्संभवतीत्य-
नुवाद एव लिङ्शब्दः तत्सिद्धं प्रयाजादीनामङ्गत्वमिति ।

तदेतत्प्रक्रियामात्रं श्रद्धालुभ्यो ऽभिरोचते ।
प्रमाणपरतन्त्रेभ्यो नैतद्रोचितुमर्हति ॥ ६ ॥

तथा च

स्वप्रधानं श्रुतं कार्यं तदबाधे विनिश्चिते ।
वाक्यान्तरेण संबन्धो न बाधे नापि संशये ॥ ७ ॥

द्वयोः सद्भावसन्देहात्प्रकृतौ यजमानयोः ।
मा युवं हि स्थ इत्येषा प्रतिपत्प्रकृतिं गमत् ॥ ८ ॥

साधिकारवाक्येषु तावदमी लिङादयो विदितनिरपेक्ष-
कार्याभिधानशक्तयो न समिदादिवाक्येष्वन्यनिष्ठं कार्यमभिधा-
तुमीशते । लक्षणया ऽभिदधतीति चेत् । न लक्षणायां प्रमाण-
मस्ति । विनियुक्तविषयत्वं प्रमाणमिति चेत् । न मिथ्याविनि-
योगस्यैवासंभावनीयत्वात् । न खलु स्वपदावगतप्रधानकार्य्य-
बाधेन ग्राहकग्रहणसंभवः । प्रत्यभिज्ञाशङ्कया न द्रागिवापूर्वा-
न्तरं प्रतीयतइति चेत् । एतदेव तर्हि प्रथमं निरूपयितव्यम्
अनेन तावत्कार्यमभिधीयते तत्किं प्रकृतमेवाधिकारापूर्वमुता-
न्यदिति तत्र यदि कारकद्वारेण तद्विषयानुप्रवेशं संभावयेत् ततः

प्रत्यभिज्ञानसामर्थ्याद्विषयस्य विनियोगमवघातवदनुमन्यते । अथ तु प्रयत्नेन मृगयमाणो न तद्विषयानुप्रवेशद्वारं पश्यति ततः प्रत्यभिज्ञाबाधेन नियोगान्तरमेव प्रधानभूतं समिद्यागविषयमध्यवस्यति । इतरथा श्रुतिबाधप्रसङ्गात् परिहृत्य हि श्रुतिबाधं च ग्राहको गृह्णाति न तद्बाधेनापि विरोधाशङ्कायाम् । अत्र च श्रुत्या प्रथमं तावद् ग्राहकस्य विरोधः शङ्क्यते । विषयानुप्रवेशसंभवे श्रुतिग्राहकयोरविरोधः असंभवे तु श्रुत्या ग्राहकस्य विरोधः स्यात् । लक्षणाप्रसङ्गात् । न चैवं विरोधे शङ्क्यमाने ग्राहको ग्रहीतुमीष्टे मा ग्राहिष्ट ज्योतिष्टोमो यजमानद्वयसंयुक्तां युवं हि स्थ इत्येतां प्रतिपदं तत्रापि हि प्रथमं तावदस्यैव संदेहः। किं कथं चित्प्रकृतावेव यजमानद्वयं संभवति ततश्चाविरोधः श्रुतिप्रकरणयोः अथ वा ऽसंभवाद्विरोध इति तदेवं सति यदि समिधो यजतीत्यत्र प्रधानापूर्वशङ्कया विरोधस्यानिश्चयात्प्रकृतसंबन्ध एव भवति तस्मिंश्च सति तद्बलेनैव लिङ्शब्दस्य लक्षणाश्रयणमित्युच्यते ततो यजमानद्वित्वसंभवाशङ्कया श्रुतिविरोधस्यानिश्चयाद् ग्रहणे प्रतिपदः संजाते तद्बलेनैव द्वित्वश्रुतेर्लक्षणयैकत्वप्रतिपादकत्वं पत्न्यभिप्रायत्वं वा प्रसज्येत । विरोध एव तत्र निश्चितो न शङ्कामात्रमिति चेत् । कथं तर्ह्यधिकरणारम्भः । न हि निर्णीते न्यायेन विचारः संभवति सत्यपि संदेहे पश्चाद्विरोधनिर्णयः प्रतिपदीव समिद्यागे ऽपि भवति । यदि मन्येत न समिदादिषु प्रथमं सन्देहः । किन्तर्हि सन्निधानात्प्रकृतापूर्वमेवेदमिति भ्रान्तिर्भवति ततश्चाविरोधाद् ग्राहकग्रहणमिति । तथा ऽपि पश्चाद्विरोधदर्शनेन तद्व्यावर्त्तते यथा पूर्वपक्षन्यायेन निश्चिते प्रतिपदः प्रकरणग्रहणे सिद्धान्तन्यायेन श्रुतिविरोधप्रतिभासे सति तादर्थ्यं व्यावर्त्तते । किं च यदि नियोगान्तरमवघातादिवदप्रतिपन्नं ततस्तद्वाक्यगामिनामवहन्त्यादि-

शब्दानामिव प्रयाजादिवाक्यगतानामपि यज्यादिशब्दानां प्रधानापूर्वान्वितस्वार्थाभिधायकत्वं किं नाभ्युपगम्यते । एषा हि तत्र युक्तिः । यद्येषां प्रधानापूर्वान्वितस्वार्थाभिधायित्वं स्यात् । तथा सत्युत्पत्तावेवान्यतिरश्चीनतया ऽवगतस्य नियोगान्तराविषयता न स्यात् । कार्यद्वये संबन्धानुपपत्तेः । न ह्येकं वस्तु युगपत् कार्यद्वयसंबन्धि प्रसेतुं शक्यमिति । इदं च प्रतीते नियोगान्तरे शक्यमभिधातुं नाप्रतीते । तेन यदि नियोगान्तरमप्रतिपन्नं ततो विरोधाभावाद्यजिशब्दस्य समिद्वाक्यगतस्य प्रधानापूर्वान्वितस्वार्थाभिधायित्वम् अवहन्त्यादिवत्स्यात् । अथ प्रतिपन्नं ततः श्रुतिविरोधे ग्राहकग्रहणानुपपत्तिरिति सेयमुभयतःपाशा रज्जुरिति । अथ प्रथममप्रतिपन्ने ऽपूर्वान्तरे यजेरेवाधिकारापूर्वान्वितस्वार्थाभिधायित्वमवगतमपि पश्चान्नियोगान्तरावगत्या बाध्यते ततो ग्राहकग्रहणमपि श्रुतिविरोधाद्बाधितव्यम् । तस्मान्न कथं चिदपि प्रयाजादीनामङ्गत्वं संभवति । यदपि च न चाविहितमङ्गं भवतीत्येतदनृतवदनप्रतिषेधमाधिकृत्याभिहितम् । आरादुपकारकविषयकानुवादाभिधानं तु जञ्जभ्यमानमन्त्रवचनाधिकारात्सन्निपातिविषयमिति तत्तावन्मात्रालोचनेनोक्तम् । अन्यथा कथं तदुत्सर्गे कर्म्माणीत्यारादुपकारकमेवाभिप्रेत्य पुरुषप्रयत्नो ऽनुवाद इति वदत्येव भाष्यकार इति नैवं व्याख्यातुं शक्यते । कथं तर्हि व्याख्येयं विनियोगाभिप्रायं विध्यभिधानमितरच्च प्रयोगाभिप्रायम् इत्येवमेतत् व्याख्येयम् । न ह्यसति विधौ समिदादीनामङ्गत्वं सिध्यति । ननु प्रकरणेनैवान्तरेणापि विधिं श्रुत्येव समिदादीनां सोमादीनामिवाङ्गत्वं सिध्यति । यथा सोमेन यजेतेति यजिविध्यतिरेकेण सोमस्य विध्यभावे ऽपि तृतीयया विनियुक्तस्य प्रधानविधिनैव विधानम् । एवं प्रयाजादीनामपि प्रकरणेन दर्शपूर्णमासयोर्विनियोगे सति

विशिष्टप्रधानविधेरेव विशेषणभूतानां प्रयाजादीनां विधिसिद्धे-र्नार्थः पृथग्विधानेनेति चेत् । सत्यं विशिष्टविधिर्विशेषणमास्कन्दति विशेषणत्वमेव तु नत्वं विधानात्सिध्यति । सिध्यति प्रकरणेनेति चेत् । न तस्यैव विध्यधीनत्वात् । साकाङ्क्षस्य हि साकाङ्क्षे विनियोगः प्रकरणार्थः न च विधिविधुराणामङ्गानां प्रयोजनापेक्षा ऽस्ति समानपदोपनीतं धात्वर्थमेव भाव्यं समासाद्य भावनायाः परितुष्टत्वात् । विध्युपहिता तु न तावन्मात्रेण परितुष्यतीति भवति प्रयोजनापेक्षा । सत्यां च तस्यां प्रकरणेन दर्शपूर्णमासयोर्विनियोगादङ्गत्वं प्रयाजादीनां सिध्यति तस्मादङ्गत्वसिद्ध्यर्थमेव समिदादिषु विधिना भवितव्यमिति । एवमङ्गभूतेषु तेषु विशिष्टप्रधानविधिनैव प्रयोगसिद्धेः तस्मिन्नंशेऽङ्गविधिरनुवादो ऽभिधीयते । तस्मादुभयमुपपन्नमिति सर्वमवदातम् । तत्प्रकरणमेव प्रयाजादीनां विनियोजकमिति । क्रमस्तु देशसामान्यलक्षणः स च द्विविधः पाठसादेश्यमनुष्ठानसादेश्यमिति पूर्वं तावद्यत्राङ्गाङ्गिनोः समानदेशे पाठः यथा दब्धिमन्त्रस्योपांशुयाजस्य च उत्तरमपि यत्र समानमनुष्ठानं शेषशेषिणोर्भवति यथा दैक्षस्य पशोः पशुधर्माणां च । द्विविधेनापि सादेश्येन दब्धिमन्त्रस्य पशुधर्माणां चोपांशुयाजे ऽग्नीषोमीये च विनियोगो भवति । समाख्या नाम यौगिकी संज्ञा सा च लौकिकी वैदिकी च यथा होतृचमस इति यथा ऽऽध्वर्यवमिति तया चमसभक्षणे होतुः पदार्थकरणे चाध्वर्योर्विनियोग इति । यस्तु विधिव्यापारमुपादानाभिधानं सप्तमं प्रमाणं विनियोगे मन्यते तस्योत्तरं विनियोजकमेतावदिति । न खलूपादानं नाम शेषप्रमाणं संभवति प्रमेयासंभवात् । यदप्युच्यते तत्क्रतं च प्रोक्षणादेः क्रत्वर्थत्वमिति । तदप्ययुक्तं श्रुत्यैवापूर्वसाधनरूपे विनियोगात् । एतदेव हि तत्साधनरूपशेषत्वं यत्तद्द्वारेण पूर्वशेषत्वम् ।

तथा ऽपि कथं क्रत्वर्थत्वम् उच्यते । व्रीहीणां तण्डुलपिष्टपुरोडाशादियागप्रणालिकया ऽपूर्वसाधनत्वम् । तथाविधांश्चोद्दिश्य विधीयमानं प्रोक्षणं सर्वस्य द्वारद्वारिभावावस्थितस्याङ्गं भवति कथं चोपादानेन क्रत्वर्थत्वं प्रोक्षणादेः यदि मतं नियोगेदमर्थ्यं तावद् ग्राहकग्रहणेनैव प्रोक्षणादेरवगतं तच्च करणतया न संभवति पारिशेष्यात्करणोपकारकत्वेनैव तादर्थ्यं निर्वहतीति नियोग एव तदन्वितः प्रतिपन्नस्तस्य करणोपकारकतां कल्पयन्करणैदमर्थ्यमाक्षिपतीति । यद्येवं प्रकरणमेवेदमभिधानान्तरेणोक्तम् । तस्यापि ह्येतदेव रूपं भवत्पक्षे प्रयाजादीनां ग्राहकग्रहणापादितापूर्वेदमर्थ्यनिर्वाहार्थं करणतदसंभवात्करणोपकारद्वारकल्पनमिति उपकारस्वरूपमेव प्राकरणिकम् । तज्जनकत्वं तु प्रयाजादीनामप्यौपादानिकमेवेति चेत् । तर्हि प्रयाजादेर्विनियोगः प्राकरणिकः स्यात् । न हि प्रकरणकल्पितोपकारजननमात्रेण प्रकरणविनियोगः सिध्यति । सर्वेषामेव सन्निपातिनामनारभ्याधीतानां चाङ्गानां तज्जनकत्वेन प्रकरणविनियोगप्रसङ्गात् । अतः प्राकरणिकमेव प्रोक्षणादेरङ्गत्वम् । नन्वसंयुक्तं प्रकरणेन विनियुज्यते संयुक्तं च प्रोक्षणमिति । नैष दोषः । संयुक्तानामपि द्वारापेक्षत्वात् तन्निबन्धनत्वाच्च करणोपकारद्वारपरिकल्पनस्य प्रयाजादिष्विव । तदेवं प्रमाणशरीराविशेषे ऽपि संयुक्तानां द्वारपरिकल्पकमुपादानम् । असंयुक्तानां च प्रकरणमिति समयमात्रम् । पश्वेकत्वादीनामपि श्रुत्यैव विनियोगो ज्योतिष्टोमादीनामपि फलार्थत्वं वाक्यादिभिरिति प्रागेव चर्चितम् । तस्मादुक्तान्येवाङ्गत्वे प्रमाणानीति ॥

इति न्यायरत्नमालायामङ्गनिर्णये द्वितीयः परिच्छेदः ।

एवं श्रुत्यादिभिरुपनीतेंशत्रये ऽनुष्ठानयोग्या भावना सं-जाता विधीयते। अनुष्ठाप्यतइत्यर्थः। अनुष्ठापकत्वमेव हि विधेः स्वरूपम्। अवगते च फले तत एवानुष्ठानसिद्धेर्नार्थो विधिनेति चेत्। न साधनत्वावगतिमात्रेण प्रवृत्त्यसंभवात्। साधनत्वमात्रं हि यागस्य फलं प्रत्यवगम्यते तर्त्कि दैवनिर्म्मितस्येव निदाघ-समयवर्त्तिमध्यंदिनतपनातपनिपातसंतप्ततनोरिव मेघपुष्पगर्भमेघ-संघस्य संतापस्योत्सादकत्वं कर्म्मणः फलजनकत्वम् उतान्यकृतस्य प्रपादिवद्भोजनादिवद्वा स्वयं कृतस्येति विशेषानवगमान्न प्रपा-दिवद्भोजनादिवद्वा स्वयं कृतस्येति विशेषानवगमान्न प्रवर्त्तेत। विधिस्तु प्रवर्त्तकस्वभावात्कर्त्तुरेवेदं फलं साधयतीति कल्पयतीति भवत्यनुष्ठापकः। विशिष्टानुष्ठानं च विशेषणानुष्ठानमन्तरेणा-नुपपन्नमिति विशेषणेष्वप्यनुष्ठापको ऽर्थाद्भवति। तत्र केषां केन प्रकारेणानुष्ठापको भवतीत्येतच्चतुर्थे चिन्त्यते। तत्र फलांशे तावत्पुरुषस्य स्वयमेव प्रवृत्तत्वान्न विधिरनुष्ठापको भवति। कथं तर्हि लक्ष्यमाणत्वमुभयोरिति साध्यांशस्यापि साधनांशव-च्चोदनालक्षणत्वमुच्यते। नैष दोषः। चोदनाप्रमेयं हि तल्लक्षणम्। तत्र ज्योतिष्टोमादेः प्रमाणान्तरगम्यमानस्यापि यथा फलसाध-कत्वं विधिप्रमाणकमिति तल्लक्षणत्वम्। एवं फलस्यापि तत्सा-ध्यत्वमन्यतो ऽनवगतमिति विधेरेवावगम्यतइति भवति तदपि तल्लक्षणम्। न चैतावता विधेयत्वं न ह्यज्ञातज्ञापनं विधिः। येन तद्विषयतया फलस्य विधेयत्वं स्यात् किन्त्वप्रवृत्तप्रवर्त्तनं तेन यत्र पूर्वमप्रवृत्तः पुरुषो विधिवशात्प्रवर्त्तते तद्विधेयं फले च पूर्वमेव प्रवृत्तिर्मानसी संजाता ज्योतिष्टोमसाध्यत्वावगमे ऽपि तत्र तावत्येव प्रवृत्तिः। न हि कायवचनचेष्टाः फलमवगाहन्ते। साधनत्वे तु तत्त्वतो ज्ञाते सति पूर्वमप्रवृत्त एव प्रवर्त्तते। तस्मा-त्तद्विधेयं न फलमिति। एवमङ्गानामपि दध्यानयनादीनामा-

मिक्षाद्यर्थमेवानुष्ठापनं न वाजिनाद्यर्थतया। प्रतिपत्त्यर्थं च प्रतिपाद्यं द्रव्यं नानुष्ठापयति न हि शेषार्थं शेष्यनुष्ठानं शेष्यर्थं तु शेषानुष्ठानम् । शेषिणो ऽपि यत्रान्यसाधनस्यैवान्यत्र विनियोगः यथा पुरोडाशकपालस्य तुषोपवापे तत्रापि परप्रयुक्तस्यैव साधनत्वान्न स्वयं प्रयोजकत्वम् । किमर्थं तर्हि प्रयाजशेषाभिघारणस्य प्रतिपत्तित्वप्रतिपादनं शेषस्यापि प्रयाजशेषस्य तत्प्रयुक्तस्यैव विनियोगान्नाभिघारणेन प्रयुक्तिसंभवः। सत्यं शेषत्वे ऽपि प्रयाजशेषस्य न द्रव्यप्रयोजकत्वमभिघारणस्य तु प्रयोजकं स्यात् ततश्च वाजपेये प्राजापत्यवपाभिघारणार्थं प्रयाजशेषं धारयितुं पात्रान्तरमुत्पाद्यं स्यात् तन्निवृत्त्यर्थं प्रयाजशेषस्य प्रतिपाद्यत्वं संपाद्यते। ननु प्रतिपत्तिरपि धारणं प्रयुङ्क्तएवान्यथा वैगुण्यप्रसङ्गात् तस्य चान्याय्यत्वात् । अत एव सत्रे साधारणपात्रोत्पादनं तद्वैयवमर्थम् यदि कस्य चिद्यजमानस्य पात्रैः प्रयोगः प्रारभ्यते ततः कदा चित्तेषु प्रयुक्तेषु तस्य यजमानस्य प्रमादसंभवे पात्राणां परिधानाये कर्म्मणि विहिता प्रतिपत्तिर्लुप्येत ततश्च वैगुण्यं स्यादिति ।यदि प्रतिपत्तिर्न धारणस्य प्रयोजिका ततः प्रतिपत्तिलोपमनादृत्य कस्य चिदेकस्य पात्रैः प्रयोगः स्यात् । तस्मादनर्थकं प्रयाजशेषस्य प्रतिपाद्यत्वाभिधानमिति । सत्यमुक्तं श्रुतवता किं त्वत्र प्रयाजशेषस्य क्रतुपशुवपाभिघारणेन प्रतिपत्तिः सिद्धेति न धारणमर्थवत् । हविषां तु प्राधान्ये प्राजापत्यवपानामवैगुण्यार्थं धारणं भवेदिति युक्तमेव प्रतिपत्तित्वाभिधानम् । यदि प्रयोजकाप्रयोजकत्वचिन्ता चतुर्थे कथं तर्हि क्रत्वर्थपुरुषार्थत्वयज्ञाङ्गत्वायज्ञाङ्गत्वापूर्वसदसद्भावनियमविधिव्युत्पादनफलविध्यर्थवादत्वफलवत्त्वकालार्थाङ्गप्रधानार्थत्वसमप्रधानत्वगुणप्रधानत्वादीनि चिन्त्यन्ते प्रयोजकाप्रयोजकत्वसिद्ध्यर्थमेव तत् । तथा हि । क्रत्व-

र्थत्वे गोदोहनादेः क्रतुविधिप्रयोज्यत्वं नान्यथा । तथैकत्वादेर्य-
ज्ञार्थत्वे तत्प्रयुक्तम् । स्विष्टकृत्सपूर्वसद्भावे यागांशस्यापूर्वं प्रयो-
जकम् । एवं तर्हि हविर्विनाशे ऽपि हविरन्तरमुत्पाद्यादृष्टसि-
द्ध्यर्थं स्विष्टकृद्यागः कर्त्तव्यः स्यात् । नैतदेवम् । यद्यप्यपूर्वं
यागस्य प्रयोजकं यागस्तु न द्रव्यस्य प्रयोजकः । एकदेशद्रव्य-
त्वात् तस्माददोषः । एवमर्थे समवैषम्यम् इत्यतः पूर्वं शेषशेषि-
त्वविचारेण प्रयोजकाप्रयोजकत्वं निरूपितम् । अत एवोक्तम् ।
अतिक्रान्तस्तृतीयविषय इति ततस्साक्षादेव लक्षणार्थनिरूपणम् ।
सोमलिप्तानां तु प्रतिपाद्यत्वं कृष्णविषाणाप्रसङ्गेनोक्तम् । तथा
कर्त्तृदेशकालगुणद्रव्यसंस्काराणां दृष्टार्थानामर्थप्राप्तत्वान्न वि-
धानं संभवति देशान्तरादिनिवृत्त्यर्थत्वे ऽपि परिसंख्या स्यात् ।
न चान्यो विधिप्रकारः संभवति तस्मादनुवाद इत्याशङ्क्यास्त्य-
न्यो विधिप्रकारः नियमो नाम यत्पाक्षि[1]कप्राप्तांशपरिपूरणमिति
यावत् । तस्माद्विधिरिति । यदिदं नियमविधिव्युत्पादनं तदपि
दर्शपूर्णमासादिविधीनां नियमेन समादिप्रयोजकत्वसिद्ध्यर्थम् ।
तथा अपापश्लोकश्रवणादीनामर्थवादत्वे पर्णमयीत्वादीनां क्रतु-
विधिप्रयुक्तिः न फलविधित्वे । विश्वजिदादीनामफलत्वे प्रयो-
जकत्वमेव विधेर्दुर्लभं फलवत्त्वे तु तद्भवति । ततः फलगतविशे-
षानुसंधानं प्रागङ्गप्रयोजनसंबन्धविचारात् तथा ऽग्निं चित्वा
सौत्रामण्या यजेतेत्यादीनामङ्गप्रयोजनसंबन्धपरत्वे ऽग्निविधि-
प्रयुक्तिः सौत्रामण्यादीनाम् । कालार्थत्वे दर्शपूर्णमासयोः सोम-
प्रयोजकत्वं च न भवति । तथा जातेष्टेः शेषिविरोधेन निमित्ता-
नन्तर्यबाधमभिधाय शौचकालप्रयोजकत्वमुक्तम् । तदुपोद्घा-
तत्वेन च पुत्रगामिफलप्रतिपादनं पुत्रफलत्वे हि शेषिविरोधः
शक्यते वक्तुं न पितृफलत्व इति ततो ऽङ्गभूतानामपि सौत्रामण्यां

१ यत्पाक्षिकप्राप्तस्य नियतत्वकरणमप्राप्तांश इत्यधिकः पाठो २ पु० दृश्यते ।

स्वकालप्रयोजकत्वमुक्तं तथा ऽनुमन्त्रादीनां विदेवनादीनां च सम-प्राधान्ये सर्वेषां फलमेव प्रयोजकं स्यात् । गुणप्रधानभावे त्वनियो-ज्यानां क्रतुप्रयुक्तत्वमिति । ननु प्रधानेषु विधिरेव प्रयोजको न फलं तत्कथं प्रधानेषु फलं प्रयोजकमङ्गेषु विधिरिति बालिश्यमेकदे-शिवदाचर्यते । नैवास्माभिः प्रधानेषु विधेरप्रयोजकत्वमुच्यते किं तर्हि प्रयुक्तिविशेषचिन्ता क्रियतइति । यथा चातुर्मास्य-प्रयोगविधिर्दध्यानयनप्रयोजको ऽपि किमामिक्षार्थं प्रयुङ्क्ते उत वाजिनार्थमपीति विचार्यते । यदर्थं च प्रयुङ्क्ते तत्प्रयोजकमि-त्युच्यते । आमिक्षा प्रयोजिका न वाजिनमिति तथा ऽत्रापि किं विदेवनादीनां फलं प्रयोजकमुत क्रतुरित्यस्यायमेवार्थः किं फलसिद्ध्यर्थं प्रयुज्यन्ते उत क्रतूपकारसिद्ध्यर्थमिति । एवमुत्त-रत्रापि विदेवनादीनां शेषविचारेण प्रयुक्तिविशेषचिन्तैव क्रि-यते । तथा दधिग्रहस्य नित्यत्वान्नित्यवज्ज्योतिष्टोमादिप्रयुक्तिः वैश्वानरादेस्तु नैमित्तिकत्वान्न नित्यवत्प्रयुक्तिः पितृयज्ञस्यानङ्ग-त्वान्न दर्शपूर्णमासप्रयुक्तिः । तथा स्वरुरशनयोः पशुयूपप्रयुक्त-त्वम् । सांग्रहणीदर्शपूर्णमासज्योतिष्टोमविचारा राजसूयवद्द्रष्टव्या इति । एवं प्रयोजकाप्रयोजकत्वे चिन्तिते सत्येकप्रयोगविधिवि-धेयानां बहूनामङ्गप्रधानानामेककर्तृकाणामवश्यंभाविनि क्रमे सति तद्विशेषः पञ्चमे चिन्त्यते । नन्वयमनारम्भणीय एव क्रम-विचारः क्रमस्याविधेयत्वेनानङ्गत्वात् । अनङ्गलोपे च प्रधान-स्यावैगुण्यात् । कथं पुनः क्रमस्याविधेयत्वम् । तदुच्यते ।

स्वरूपेणाविधेयः सन् विधेयस्याविशेषणम् ।
अभिधाविधुरत्वेन ग्राहकेणावधीरितः ॥ १ ॥
विध्यङ्गभावविधुरो विध्याक्षेपबहिष्कृतः ।
क्रमः केन प्रकारेण वैधानीयकमृच्छति ॥ २ ॥

न तावत् क्रमः स्वरूपेण विधातुं शक्यते। अननुष्ठेयत्वात् न हि स्वतन्त्रः क्रमो ऽनुष्ठातुं शक्यते। द्रव्यादिवदिति चेत्। न अतद्विशेषणत्वात्। अथापि स्यात् यथा द्रव्यादीनां स्वतोऽननुष्ठेयानामप्यनुष्ठेयभावार्थविशेषणतया विधिगोचरत्वम् एवं क्रमस्यापि भविष्यतीति। तन्न। अविधेयविशेषणत्वात्। द्रव्यादयो हि विधेयभूतभावार्थविशेषणभूता युक्तं यद्विधीयन्तइति क्रमस्तु न तथा संघातविशेषणत्वात् तस्य चाविधेयत्वात्। न हि संघातो विधीयते पदार्थास्तु विधीयन्ते न च ते क्रमस्य भूमयः। न ह्येकैकत्र क्रमः संभवति तस्मादविधेय इति। संख्यावदिति चेत् नोपलक्षणत्वात्। तत्रैतत्स्यात् एकादश प्रयाजान्यजतीति यथा संघातवर्त्तिन्यपि संख्या विधीयते तद्वत्क्रमोऽपीति। तन्न उपलक्षणत्वात्संख्यायाः। न हि तत्रैकादशसंख्या विधीयते संख्योपलक्षितास्त्वभ्यासा विधीयन्ते ते च क्रियात्मका एवेति युक्तमेव विधीयन्तइति तस्मात्सर्व एव तार्त्तीयः पाञ्चमिकश्च क्रमो न विधेय इति विवरणकारः। निबन्धकारस्त्वाह भवतु तार्तीयक्रमस्य संख्यायाश्चैकादशादिकाया अभिधानसंभवाद् ग्रहणेन विध्यैदमर्थ्ये सति विध्याक्षिप्तानुष्ठानतया विधेयत्वं न त्वेवं पाञ्चमिकस्य क्रमस्य संभवति। न हि तस्य किंचिदभिधानमस्ति अनभिहितं च न ग्राहको ग्रहीतुमीष्टे। साधिकारस्य विधेः प्रयोजनरूपस्य सन्निधिसमाम्नातैः स्वयमप्रयोजनभूतैः प्रयोजनप्रयोजनिभावेनान्विताभिधानं ग्राहकग्रहणमभिधीयते यश्च नाभिधीयते न तस्यैवंरूपं ग्राहकग्रहणं संभवति तदगृहीतस्य च न विध्यैदमर्थ्ये प्रमाणमस्ति तादर्थ्यशून्यस्य च न विधिरनुष्ठानमाक्षिपति अतदाक्षिप्तानुष्ठानस्य च न विधेयत्वसंभवः। यथा ऽऽहुः। यत्तु तत्सिद्ध्यर्थमुपादीयते तद्विधेयमिति। कथं पुनः क्रमस्याभिधानं नास्ति क्त्वाप्रत्ययो हि पूर्वकालताम-

भिधत्ते अध्वर्युर्गृहपतिं दीक्षयित्वेति । न क्त्वाप्रत्ययः पूर्वकालता-भिधायी मुखं व्यादाय स्वपितीत्यादिषु व्यभिचारात्समानकर्तृ-कत्वमेवाव्यभिचारात् क्त्वार्थः । कथन्तर्हि भुक्त्वेति पूर्वकालता-ऽवगतिः।उच्यते क्त्वाप्रत्ययो हि समानकर्तृकार्थवाचिनोर्द्धात्वोर्य एव पूर्वं प्रयुज्यते तत एव विधीयते ततश्च क्त्वाश्रवणात्पूर्वम-योज्यत्वावगमे सति यथाप्रयोगमर्थावगमो यथाऽवगमं चानुष्ठा-नमित्यनुष्ठानक्रमः प्रतीयते न तु पूर्वकालत्वाभिधानात् स्याच्च तावच्छ्रुतिक्रमे ऽभिधानशङ्का अर्थादिषु तु दूरापास्तैव सा । तस्मादनभिधेयत्वेन क्रमस्यानङ्गत्वात्तद्धानावपि वैगुण्याभावा-दनर्थकः क्रमविचार इति । तत्राहुः ।

"क्रमस्यानङ्गभावे ऽपि नैवानादरणीयता ।
तदभावे विशिष्टस्य प्रयोगस्याप्रसिद्धितः" ॥

सत्यमनङ्गमेव क्रमः तथा ऽपि नानारम्भणीयः क्रमविचारः। अनङ्गस्यापि तस्यादरणीयत्वात् । श्रुत्याद्यवगतक्रमविशेषसमा-लिङ्गितप्रयोगविशेषसाध्यो हि प्रयोगविधिरवसीयते तेन यद्यपि प्रयोगविधिः क्रमस्यानुष्ठानं नाक्षिपति प्रयोगविशेषं त्वाक्षि-पत्येव स च नर्त्ते क्रमविशेषात्सिध्यतीति तदादरः तेनारभ्यं क्रमलक्षणमिति ।

इदन्तु नानुमन्यन्ते युक्तिग्रन्थविरोधतः ।
अननुष्ठेयरूपो ऽपि तद्विशेषणभावतः ॥ ३ ॥
विधेयत्वं कथंकारं क्रमो न प्रतिपद्यते ।
अभिधाविधुरो ऽप्येष कथं चिद्बुद्धिमागतः ॥ ४ ॥
आकाङ्क्षायोग्यतायुक्तः पितृयज्ञादिकर्त्तृवत् ।
ग्राहकग्रहणं गच्छेत्तद्ध्यन्यत्रापि कारणम् ॥ ५ ॥

वदेत्स्मृतिप्रयोगाभ्यां क्त्वाश्रुतिः पूर्वकालताम् ।
प्रयोगनियमाभावात्प्रतिपत्तिश्च नान्यथा ॥ ६ ॥
श्रुतिलक्षणमित्येतद्विधत्ते क्रममित्यपि ।
न सूत्रं न च भाष्यं स्यात्तस्मादेतददर्शनम् ॥ ७ ॥

यत्तावत्स्वरूपेण क्रमो न विधेय इति तदनुमन्यामहे विधेयरूपप्रयोगविशेषणत्वेन तु विधेयत्वं निवारयितुं न शक्यते कालादिवत् । यथा हि कालः प्रयोगानुबन्धितया विधीयते तद्वत्क्रमो ऽपि । यत्तु संघातविशेषणत्वान्न विधेयविशेषणमिति । तदनुपपन्नम् । पदार्थविशेषणत्वात् । न हि संघातः क्रमस्य भाजनमवगम्यते न हि भवति क्रमेण संघात इति । भवति तु पदार्थाः क्रमेणानुष्ठीयन्तइति यत्त्वेकैकत्र नावगम्यतइति । नैष दोषः । संयोगवत्सद्वितीयपदार्थाश्रयत्वात् तथा ऽवगमात् । यद्वा नायं सद्वितीयपदार्थाश्रयः । एकैकत्र तु समातयोगिको दीर्घत्वादिवद्वर्त्तते । पौर्वापर्यं हि क्रमः न द्वयोः पूर्वत्वं नापि परत्वम् । एकापेक्षया त्वितरस्य पूर्वत्वं तदपेक्षया चेतरस्य परत्वमवगम्यते । तस्मात्सर्वथा न संघाताश्रयः किं तु पदार्थाश्रयः पदार्थाश्रयत्वे च तद्विधिनैव दध्यादिवद्विधीयतइति । यत्त्वनभिहितत्वान्नास्य ग्राहकग्रहणं भवतीति । तदप्ययुक्तम् । किमत्राभिधानेन आकाङ्क्षासंनिधियोग्यत्वानि ह्यन्विताभिधानोपलक्षणं नाभिधानं मा विलोपि विश्वजिदादौ नियोज्यान्विताभिधानम् । आकाङ्क्षितश्च प्रयोगविधेर्नानापदार्थानेकस्मिन् कर्त्तरि निक्षिपतः क्रमविशेषः सन्निधापितश्चासौ श्रुत्यादिभिर्योग्यश्चेति किमर्थमनेनान्वितं स्वार्थमभिधातुं प्रधानवाक्यगतो लिङ्शब्दः कापुरुषवदभिधानमुत्कोचमपेक्षते । यस्यापि चान्याभिधानमस्ति प्रयाजादेस्तदपि न स्वशब्देन प्रधानापूर्वान्वितमभिधीयते किं तु

प्रधानवाक्यगत एव लिङ्शब्दस्तदन्वितं स्वार्थमभिधत्ते स्वशब्दस्तु तत्सन्निधापनमात्रेऽपियोगीति ते दर्शनं सन्निधापनं च विना ऽप्यभिधानेन क्रमस्यापि विद्यतएवेति भवत्यसौ ग्राहकग्रहणगोचरः । तद्यथा पितृयज्ञे विश्वजिति चानभिहितस्यापि कर्त्तुरङ्गत्वम् एवं क्रमस्यापि भविष्यति । अव्यापकश्चायं हेतुरनभिहित इति । अध्वर्युर्गृहपतिं दीक्षयित्वेत्येवमादौ क्त्वाप्रत्ययेन पूर्वकालस्याभिहितत्वात् । यत्तु व्यभिचारित्वान्न पूर्वकालत्वमर्थ इति । तन्न । न व्यभिचारादशब्दार्थत्वं भवतीति । मा भूत् ज्वलनवचनस्याग्निशब्दस्य माणवके ऽपि प्रयोगादतदर्थत्वम् । मा च भूत् यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यतइत्यादिषु भिन्नकर्त्तृके ऽपि प्रयोगादलंखल्वपपदाद्धात्वर्थमात्रे ऽपि प्रयोगात्समानकर्त्तृकत्वमप्यतदर्थः । स्यान्मतं न व्यभिचारादशब्दार्थत्वं ब्रूमः किं त्वनन्यलभ्यः शब्दार्थ इति स्थितिः । समानकर्त्तृकत्वं च तथा । न हि तस्यानभिहितस्यान्यतः कुतश्चिदवगतिः संभवति पूर्वकालत्वप्रतिपत्तिस्तु प्रयोगनियमादप्युपपद्यते समानकर्त्तृकार्थवाचिनो हि पूर्वं प्रयुज्यमानाद्धातोः क्त्वाप्रत्ययो लोके प्रयुज्यते तस्मात्पूर्वकालप्रतिपत्तेरन्यथा ऽपि सिद्धत्वान्न शब्दार्थत्वमिति । नैतद्युक्तम् । प्रयोगनियमाभावात् । भवति हि गच्छति भुक्त्वेत्यपि लोके प्रयोगः श्रुतिस्मृतीतिहासादिषु चानेकशो हृदयमाच्छिन्दत् जातवेदो मरुतो ऽद्भिस्तमयित्वा प्राणायामं चरेत्स्नात्वा न्यवर्त्तत मृगं हत्वेत्यादीनि बहून्युदाहरणानि । तस्मान्न प्रयोगनियम इत्यनन्यलभ्यत्वात्पूर्वकालत्वं क्त्वाऽभिधेयमिति सिद्धमव्यापकत्वं हेतोः । सूत्रकारश्च श्रुतिलक्षणमानुपूर्व्यमिति स्पष्टमेव विधेयत्वं दर्शयति । भाष्यकारो ऽपि दीक्षाक्रमं विधत्ते स क्रमो विधीयतइत्यादिभिस्तत्र तत्र क्रमस्य विधेयत्वमाघोषयति । तस्मान्न्यायतो ग्रन्थतश्च क्रमस्याविधेयत्वं

न घटते ग्राहकग्रहणापादितविध्यैदमर्थ्यस्य लिङ्गाच्च प्रतिलब्ध-प्रयोगावच्छेदद्वारस्योपादानपरिकल्पितकरणोपकारसाधनत्वस्य संख्यावत्क्रमस्य न किं चिदनङ्गत्वे कारणमस्ति यदविधेय इत्युच्यते । किं च ।

चोदनालक्षणत्वं च क्रमस्य कथमीदृशः ।
स्वरूपं हि न तद्गम्यं साध्यसाधनते न च ॥ ८ ॥
न लिङ्गमात्रं संख्यावल्लिङ्गिना ऽनवधारणात् ।
तथा सत्यपि लिङ्गं चेद् द्रव्याद्यपि तथा भवेत् ॥ ९ ॥

कथं चेदृगनूदितस्याविधेयस्य क्रमस्य चोदनालक्षणत्वम् । न हि तस्य स्वरूपं चोदनागम्यम् अपूर्ववत् प्रमाणान्तरगम्य-त्वात् । नापि दध्यादिवदपूर्वसाधनत्वम् । अनभ्युपगमात् । नापि साध्यत्वमधिकारवदस्य चोदना बोधयतीति न तल्लक्षण-त्वम् । अतल्लक्षणं च न विचारमर्हतीत्यनारम्भणीयं क्रमलक्षणं स्यात् । तत्रैतत्स्यात् यथा सप्तदश प्राजापत्यान्पशूनालभतइत्य-त्राविधेया ऽपि संख्या विधेयभूतकर्म्मोपलक्षणत्वेन चोदनार्थतां नातिवर्त्तते तथा क्रमो ऽपि प्रयोगविधिविधेयप्रयोगविशेषोपल-क्षणत्वेन चोदनालक्षणः स्यादिति । नैतत्सारं लक्ष्यानवधार-णात्संख्या हि स्वसमवाययोग्यानि पृथक्कर्म्माण्युपस्थापयन्ती भवत्युपलक्षणं क्रमस्तु न कथं चित्प्रयोगविशेषमुपस्थापयति । न ह्येतेषु कर्म्मसु कृतेषु द्वयं संख्या संपद्यतइतिवदस्मिन्प्रयोगे ऽनुष्ठिते ऽयं क्रमस्संपद्यतइति शक्यं निरूपयितुम् । यद्यपि क चित्प्रयोगविशेषे क्रमविशेषः कश्चिदवस्थितः तथा ऽपि नासा-वनुष्ठानात्प्रागवगन्तुं शक्यते अस्मिन्नयं क्रमो नास्मिन्निति । तत्रैतदेवापतति अनेन क्रमेणानुष्ठातव्यमिति । ततश्च क्रमविशे-षविशिष्टस्य विधेयत्वादविधानाभिधानं प्रलापः । तदेवं सत्यपि

यदि क्रमस्याविधेयत्वमुच्यते ततः सोमेन यजेतेत्यादिष्वपि सोमसाध्यस्य यागस्यैव विधानं न सोमस्य सोमस्तु यागविशेषोपलक्षणमिति शक्यं व्यवस्थातुं तस्यापि चाऽऽकृतिविशेषोपलक्षणत्वेनाविधेयत्वान्न किंचिद्विधेयमवशिष्यते कृतिव्यतिरिक्तमिति सुनिरूपितमत्रभवता भवता । अथ विशेषणत्वे संभवत्युपलक्षणत्वमन्याय्यमिति यागविधानं तत्क्रमे ऽपि समानमन्यत्र स्वसमयापस्माराद् । किं च क्रमविशेषपरिगृहीतप्रयोगावच्छिन्नः प्रयोगविधिरिति वदता प्रयुक्तानां क्रमश्चिन्त्यत इति प्रयोगविध्युत्तरकालं क्रमनिरूपणं वदन्नवधीरितः स्यादिति। अपि च ।

वचसो ऽध्वर्युरित्यादेर्विधेयं किंनिरूपितम् ।
कर्त्ता चोदकतः सिध्येदसिद्ध्यन्वचसा ऽपि न ॥१०॥

यदि क्रमो न विधीयते कस्तर्ह्यध्वर्युर्गृहपतिं दीक्षयित्वेत्यस्य विधेर्विषयः । दीक्षा तावत्सर्वेषां यजमानत्वाच्चोदकेनैव प्राप्ता । अध्वर्युरपि कर्त्ता तेनैव प्राप्नोति यदि क्रमो न विधीयेत निर्विषयमेव वाक्यं स्यात् । अत्राहुः । अध्वर्युविधावपि नियम एवेति । अस्यार्थः । सत्रे हि ये यजमानास्तऋत्विज इत्यार्त्विज्ये यजमानविधानादृत्विजस्तावन्निवृत्ताः यजमानैरेव सर्वमार्त्विज्यं कर्त्तव्यम् । तत्र येनैव केन चिदाध्वर्यवं कुर्वता अध्वर्युव्यपदेशो लब्धस्तेनैवान्यदप्याध्वर्यवमनुष्ठेयमिति नास्ति प्रमाणम् । एवं च सर्वत्र सर्वेषां कर्तृत्वमनियमेनोपप्लवतइत्यध्वर्युर्गृहपतिं दीक्षयित्वेत्यनेन गृहपतिसंज्ञकस्य दीक्षायामध्वर्युः कर्त्ता नियम्यतइति । तदिदमयुक्तम् । यदि चोदकेन कर्तृविशेषो दीक्षायां न लभ्यते ततो वचनेनापि न लब्धुं शक्यते तद्वर्त्तिनां पदानामज्ञायमानार्थत्वात् । सर्वे अध्वर्य्वादिशब्दाः सर्वेषु पुरुषेषु वर्त्त-

न्ते तत्र को ऽध्वर्युः कस्य गृहपतिसंज्ञकस्य दीक्षायां कर्त्ता नियम्यते के वा निवर्त्तन्ते सर्वे हि पुरुषाः शक्यन्ते ऽभिधातुमध्वर्य्युशब्देन, न चैवं सत्त्रेनेन कर्त्तृविशेषो नियन्तुं शक्यते । स्यादेतत् । गृहपत्यादिचतुष्टयमेको दीक्षयतीत्येतावद्विधीयते स चाध्वर्युकार्यदीक्षाकरणात्तच्छब्देनाभिधीयतइति । भवेत्तावदेवमपि कथं चित्काशकुशावलम्बनं यदि ब्रह्मादयो निर्द्धारयितुं शक्यन्ते तेषु त्वनिर्द्धार्यमाणेषु केषामेको दीक्षयितेत्युच्यते । एवं प्रतिस्थात्रादिषु नियम्येषु ब्राह्मणाच्छंस्यादिषु नियमविषयेषु द्रष्टव्यम् । तेन यदि तावच्चोदकप्राप्तानां नानापदार्थानां बहुषु यजमानेषु कर्त्तृषु अव्यवस्थयोपप्लुतेषु व्यवस्थाऽपेक्षायां प्रकृतौ या व्यवस्था दृष्टा सैवाङ्गीकर्त्तव्या कथं चिद्व्यवस्थासम्भवे ऽव्यवस्थायोगात् । समाख्ययैव तु प्रकृतौ व्यवस्था। न हि समाख्या स्वयमेव कर्त्तृनियमस्य विधायिका प्रयोगवचनस्तु शब्दो बहूनामर्थानां बहुभिरनुष्ठाने विदधद्व्यवस्थापेक्षः सन्समाख्यया कथं चिदवगतां व्यवस्थामाश्रयति । एवं च सत्रप्रयोगवचनो ऽपि तदपेक्षस्सन् प्रकृतावेकेन ये पदार्थाः कृताः तानिहाप्येककर्त्तृकान्विदधाति ततः प्राप्तत्वान्न दीक्षायामध्वर्य्युर्विधातव्यः । अथ न व्यवस्था तथा ऽप्यध्वर्य्युशब्दस्य पुरुषविशेषप्रतिपादकत्वमनुपपन्नमित्युभयथा ऽपि न कर्त्तृविधिः सम्भवतीति क्रमस्यैव विधेयत्वमवश्यमङ्गीकर्त्तव्यम् । तस्माच्छ्रुत्याद्यवगतक्रमविशेषविशिष्टस्य प्रयोगस्य विधानात्क्रमस्यापि विधेयत्वमङ्गत्वं च सिद्धम् । आह च

"क्रमो ऽपि शेष एवैकप्रयोगवचनाश्रयः" इति ।

किमिदानीं प्रयोगविधिविधेयः क्रमः ओमित्युच्यते । कथमविनियुक्तस्य प्रयोगविधिना विधानम् । अस्यापि श्रुत्यादिभिर्विनियोगाददोषः । यथा श्रुतिलिङ्गादिभिर्विनियुक्ताः

पदार्थाः प्रयोगविधिना विधीयन्ते तथा श्रुत्यादिभिः क्रमः । इयांस्तु विशेषः अन्ये कर्म्मस्वरूपानुबन्धाः क्रमस्तु देशादिवत्प्रयोगानुबन्ध इति । न हि तार्त्तीयैरेव सर्वं विनियोक्तव्यमिति नियमः तानि तु पदार्थैदमर्थ्ये, क्रमैदमर्थ्ये तु पाञ्चमिकान्येव श्रुत्यादीनि प्रमाणम् । यद्यैषामपि तार्त्तीयेष्वेवान्तर्भावः शक्यते दर्शयितुमिति न किं चिदनुपपन्नम् । तत्र श्रुतिक्रमो नामायं यत्र क्रमपरं वचनं तद्विशिष्टपरं वा । यथा ऽध्वर्युर्गृहपतिं दीक्षयित्वा, ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्, वषट्कर्त्तुः प्रथमभक्ष, इति । अर्थक्रमो ऽयं यः प्रयोजनवशेन निर्णीयते यथा पाकहोमयोः । विधायकवाक्यस्थो मन्त्रवाक्यस्थो वा यः पदार्थेष्वाश्रीयते स पाठक्रमः यथा प्रयाजादीनामाग्नेयादीनां च । यस्तु सह प्रयुज्यमानेषु सन्निपातिनामावृत्त्या ऽनुष्ठाने कर्त्तव्ये प्रथमक्रम एव द्वितीयादिष्वपि प्रयोगवचनावगताङ्गसाहित्याबाधायाश्रीयते स प्रवृत्तिक्रमः । यथा प्राजापत्येषु उपाकरणक्रम एव नियोजनादिष्वपि प्रयोगवचनाद्भवति । यस्तु प्रकृतौ नानादेशावगतानां पदार्थानां विकृतावेकस्य देशे सर्वेषामनुष्ठाने वचनात्कर्त्तव्ये सति यस्य देशे ऽनुष्ठीयन्ते तस्य प्रकृत्यवगतस्थानाबाधेनागन्तुभिः क्रमः समाश्रीयते स काण्डक्रमः । यथा साद्यस्क्रे सवनीयस्थाने पशुषु सहालभ्यमानेषु तस्याश्विनग्रहानन्तर्यं न बाध्यते । मुख्यक्रमस्तु यः प्रधानक्रमः सो ऽङ्गेष्वपि प्रयोगवचनावगताङ्गप्रधानसाहित्याबाधार्थमाश्रीयते यथा सारस्वतौ भवत इत्येकवाक्यचोदितयोः स्त्रीपुंसदेवत्ययोः कर्म्मणोर्याज्यानुवाक्याक्रमेणावगतानुष्ठानयोस्ततोरङ्गेष्वपि प्रधानक्रम एव भवति । सर्वेषामेव क्रमाणां प्रयोगविधिविधेयत्वे सत्यपि मुख्यप्रवृत्तिक्रमयोः प्रामाण्यमपि प्रयोगविध्यवगतसाहित्यनिमित्तमित्यनेन विशेषेण "प्रयोजकवशौ चेष्टौ मुख्यप्रावृत्तिकक्रमावि"-

त्युक्तम् । श्रुत्यर्थपठनमुख्यप्रवृत्तीनां समवाये पारदौर्बल्यम् । पाठे ऽपि मन्त्रपाठाद्ब्राह्मणपाठो दुर्बलः । चोदकाश्रयाच्च क्रमात् विकृतिषु प्रयोगवचनाश्रयो दुर्बलः क्रमः । तत्र श्रुत्यर्थाभ्यां पाठस्य दौर्बल्यं क्रमकोपाधिकरणे ऽभिहितम् । श्रुत्यर्थयोस्तु नैव विरोधः सम्भवति यथाश्रुत्येव प्रयोजनकल्पनात् । यदि हि हुत्वा पचेदिति श्रूयेत ततः पाकस्य दृष्टार्थतां परिकल्प्य येन केन चिद् द्रव्येण हूयेत । तथा पाठे ऽपि मन्त्रगताद्ब्राह्मणगतस्य दुर्बलत्वं मन्त्रतस्तु विरोधे स्यादित्युक्तम् । ततस्तु मुख्यक्रमस्य प्रकृतौ तु स्वशब्दत्वादित्यत्र दौर्बल्यमुक्तम् । ततो ऽपि प्रवृत्तिक्रमस्यावदानाभिघारणासादनेष्वित्यत्र । चोदकाश्रयाच्च प्रयोगवचनाश्रयस्य दुर्बलता तद्वचनात्तु विकृतौ यथाप्रधानं स्यादित्यत्रोक्ता । एवं बलाबलविभक्तैः श्रुत्यादिभिः समर्पितेन क्रमविशेषेण विशिष्टः प्रयोगः प्रयोगविधिना विधीयते । ननु चतुर्थे ऽपि प्रयोगविधिव्यापार एव चिन्तितः । अत्रापि स एवेति कथं लक्षणभेदः । सत्यमुभयत्रापि प्रयोगविधिविचार एव किन्तु तत्र केषामङ्गानां किमर्थं प्रयोजको भवतीति प्रयोज्यविशेषविचारः कृत इह तु किंक्रमविशिष्टं प्रयोगं विधत्तइति प्रयोविशेषविचार इति लक्षणभेदः ।

तदेवं पञ्चलक्षण्या कार्यवर्गे निरूपिते ।
को ऽनेनाधिक्रियेतेति षष्ठे ऽध्याये निरूप्यते ॥११॥
निरूपिते ह्यनुष्ठेये शक्यं शक्तिनिरूपणम् ।
तस्यां निरूपितायां तु तदधीना ऽधिकारधीः ॥१२॥

न ह्यनवगते ऽनुष्ठेये तच्छक्तिरवगन्तुं शक्या । तया चाधिकारनिरूपणमिति भवत्यनुष्ठेयप्रतिपादकस्याध्यायपञ्चकस्याधिकारविचारहेतुत्वम् । न चैकस्यैवाध्यायस्य हेतुत्वम् । तत्सं-

घातस्याप्येककार्यप्रतिपादकस्य पूर्वषट्कस्येवोत्तरषट्कं प्रति तदुपपत्तेः । एकस्याप्यध्यायस्य नानानयसंघातात्मकस्यैककार्योपधानादेवैकत्वम् । तदध्यायपञ्चकस्याप्यनुष्ठेयप्रतिपादनादैक्यमापादितस्याधिकारहेतुत्वमुपपन्नम् । तत्र प्रथमं तावदुपोद्घातत्वेनाधिकारसद्भावः प्रतिपाद्यते । सति हि तस्मिन्कस्यायमिति विचारस्सम्भवति नान्यथेति । तत्र स्वर्ग्गकामो यजेतेति भावना भाव्याकाङ्क्षिणी समानपदोपादानलक्षणया श्रुत्योपनीतमनन्योपसर्जनं च धात्वर्थमेव पदान्तरोपनीतपुरुषविशेषणीभूतस्वर्ग्गप्रहाणेन भाव्यत्वेन स्वीकरोति श्रुतेर्वाक्याद्बलीयस्त्वात् स्वर्ग्गादिद्रव्येण यागं कुर्यादिति वाक्यार्थः । कामशब्दश्च कर्म्म कुर्वाणस्य तत्साधने तत्सिद्ध्यर्थं कामना भवत्येवेत्यनुवाद इति श्रुतिलिङ्गाभ्यां वाक्यबाधेन यागस्य प्रधानत्वान्न किं चिदनेन फलं साध्यतइति नास्त्येवाधिकार इत्युक्त्वा विधिश्रुतिबलेन सिद्धान्तः कथितः । विधिर्हि समानपदोपात्ताद्धात्वर्थाद्भावनायाः सन्निकृष्टः प्रथममेव तामवरुध्य पुरुषार्थाय नयति प्रवर्त्तनात्मकत्वादपुरुषार्थफले च व्यापारे पुरुषस्य प्रवर्त्तयितुमशक्यत्वात्तेन प्रवर्त्तनात्मकविध्यन्वयादेव समीहितरूपे भाव्ये ऽपेक्षिते तद्विशेषमात्रं वाक्यादवगम्यते तस्मिंश्चावगते समानपदोपात्तो धात्वर्थः प्रत्यासत्तेः करणतया स्वीक्रियते द्रव्यादि त्वितिकर्त्तव्यतया । आह ।

विधेर्भावनया योगः पर्व यद्यंशसंगतेः ।
पश्चात्संबध्यमानानां ततो न स्याद्विधेयता ॥१३॥
अथ सर्वांशसंपूर्णा भावना विधिगोचरः ।
विधिहीना ततो न स्यात्पुरुषार्थफला क्रिया ॥१४॥

यदि तावदंशत्रयान्वयात्प्रागेव केवला भावना विधीयते ततो विशिष्टभावनाविध्यधीनविधीनामंशानां पश्चाद्भावनाऽन्वये सत्यपि केवलाया एव विधिसंस्पर्शान्न विधेयत्वं स्यात् । अथ तु नांशत्रयान्वयात्प्राक् भावनाया विध्यन्वयः ततो विधिविधुरा सती धात्वर्थमेव प्रत्यासत्तेर्भाव्यमवलम्बतइति न पुरुषार्थस्य भाव्यत्वं सिध्येदिति । नैतदेवम् ।

विधिभावनयोः श्रुत्या संगतिः पूर्वमीयते ।
अयोग्यत्वात्तदा त्वेषा निर्वृतिं नैव विन्दति ॥ १५ ॥
सङ्गतिप्रतिपत्तेश्च तदेवैवं प्रतीयते ।
यादृशैः परिपूर्णेयं भावना विधिसङ्गतिम् ॥१६॥
लभेत तादृशैरंशैः पूरणीयेति तद्भवेत् ।
पुरुषार्थस्य भाव्यत्वमंशानां च विधेयता ॥१७॥

प्रथमन्तावदेकशब्दोपात्तयोर्विधिभावनयोः श्रुत्या सम्बन्धोऽभिधीयते तस्यां त्ववस्थायां भावनायाः केवलाया अननुष्ठेयत्वात्प्रतीताऽपि सङ्गतिर्नैव निष्पद्यते । अनिष्पन्नायामपि च तस्यां तत्प्रतिपत्त्या तदेवं पुरुषो निरूपयति अस्यास्तावद्विध्यन्वयेन भवितव्यम् । ततो यादृग्भिरंशैस्संयुक्तेयं विध्यन्वयं भजते तादृग्भिः पूरयितव्या । न चापुरुषार्थफला तदन्वयमर्हति तस्मात्पुरुषार्थफलेयमध्यवसाय तद्विशेषमपेक्षमाणः समानपदस्थं धात्वर्थमपुरुषार्थत्वादुल्लङ्घ्य पदान्तरोक्तमपेक्षते तत्र स्वर्गकामादिशब्देन तद्विशेषस्य प्रतिपत्तेस्तेन सह भावना सङ्गच्छते तदन्विता च करणापेक्षा सती प्रत्यासत्तिवशाद्भावार्थाधिकरणन्यायेन समानपदोपात्तं धात्वर्थं करणतया स्वीकरोति ततः कथंभावापेक्षायां श्रुत्याद्यवगतान्यङ्गानीत्थंभावेन गृह्णाति तत-

स्सर्वांशविशिष्टा भावना विधीयते। तदेवं प्रथममेव विध्यन्वयप्रतीतेः पुरुषार्थस्य भाव्यत्वं सिध्यति। प्रतीतस्यापि च विध्यन्वयस्यांशत्रयसम्बन्धोत्तरकालमेव निर्वृत्तेरंशानामपि विधेयत्वं सिध्यति। अतो न कश्चिद्दोष इति।

ननूत्पत्त्यादिभेदेन चातुर्विध्यं विधेः कथम्।
प्रयोगविधिरेवैको भवतैवं प्रकीर्त्तितः ॥१८॥

श्रुत्यादिभिरुपनीतेंऽशत्रये पश्चाद्विधिरिति वदता प्रयोगविधिरेवैको विधिरित्युक्तं भवति। चतुर्विधं च तं समाचक्षते।

उत्पत्तिविधिनामैको यो द्वितीये विचार्यते।
विनियोगविधिस्त्वन्यो यस्तृतीये विचार्यते ॥१९॥
चतुर्थे पञ्चमे चैव प्रयोगविधिचिन्तनम्।
अधिकारविधिस्त्वन्यो यः षष्ठाध्यायगोचरः ॥२०॥

तस्मादैकध्याभिधानमनुपपन्नमिति। उच्यते।

उत्पत्त्यादित्रयाणां च विध्यन्वयबलाद्गतेः।
स्वरूपेण प्रयोक्तृत्वाच्चातुर्विध्यं विधेर्मतम् ॥२१॥

अप्रवृत्तप्रवर्त्तकस्वरूपस्य विधेर्यदा तत्सिद्ध्यर्थं कर्म्मस्वरूपपरत्वं भवति तदा विध्यन्वयप्रतिपत्तिवशादेव तद्विषयस्य कर्म्मणः प्रमाणान्तराप्राप्तिपरिकल्पनात् उत्पादकत्वसिद्धिः तद्वशेनैव च तद्विषयस्य फलसाधनत्वं फलवदुपकारकत्वं वा कल्प्यतइति विनियोजकत्वम्। फलसाधने च कर्म्मणि पुरुषस्याधिकारः स्वामित्वं सिध्यतीत्यधिकारोऽपि विधिप्रमेय एव। स्वरूपेणैव च प्रयोजकत्वमिति युक्तं प्रमेयचातुर्विध्याद्विधेश्चातुर्विध्यं विधिशब्दो हि प्रवर्त्तकैकरसं विध्यात्मानमभिधत्ते तद-

न्वयानुपपत्त्यैवेतरत्रयं कल्पयतीति प्रमेयचतुष्टयसिद्धिः । न तु स्वरूपेणैव चातुर्विध्यम् । आह च ।

"विधात्री च तृतीयोक्ता प्रयोगो यन्निबन्धन" इति ।

चतुष्टये ऽपि चैकस्मिन् क चित्किं चिद्विवक्षितम् ।
एकं[1] द्वयं त्रयं वा ऽपि क चिच्चापि चतुष्टयम् ॥२२॥

अग्निहोत्रं जुहोतीत्युत्पत्त्यैकपरत्वं समिधो यजतीत्युत्पत्तिविनियोगपरत्वम् असति विधौ प्रकरणविनियोगासिद्धेरिति प्रागेव गतम्। ज्योतिष्टोमेन स्वर्गकामो यजेतेति विनियोगाधिकारप्रयोगपरत्वम् । उत्पत्तेः सोमेन यजेतेत्यनेन सिद्धत्वात् । उद्भिदा यजेत पशुकाम इति चतुष्टयपरत्वम् । एकस्याप्यन्यतो ऽसिद्धेः यथा च विनियोजकत्वे ऽपि विधेः श्रुत्यादीनां विनियोजकत्वं सिध्यति तथा प्रागेवाभिहितम् । प्रकृतमनुसरामः । तदेवं विधिबलेन पुरुषार्थस्य भाव्यत्वे ऽवधारिते तद्विशेषापेक्षायां कामसम्बन्धावगतप्राधान्यस्य स्वर्गादेर्भाव्यत्वं पुरुषोपसर्ज्जनस्यापि भवति न पूर्वपक्षइव साधनत्वम् । न हि पूर्वपक्षे ऽपि स्वर्गकामशब्दः पुरुषपरः किं तु स्वर्गाख्यस्य द्रव्यस्य क्रियासाधनत्वप्रतिपत्तिपरः । कथं पुनः पुरुषवचनशब्दस्योभाभ्यामपि वादिप्रतिवादिभ्यां तत्परत्वमवधार्यते । उच्यते । पूर्वपक्षवादी तावदेवं मन्यते क्रियासामर्थ्यादेव तावद् गुणभूतः पुरुषः प्राप्तः तत्र स्वर्गकामशब्देन न कश्चित्पुरुषविशेषो राजशब्देनेव व्रीह्यादिशब्देनेव वा द्रव्यविशेषः समर्प्यते य एव हि स्वर्गकामः स एवास्वर्गकामो ऽपि भवति । यदा तत्काम इति कालोपलक्षणत्वे वा स एव दोषः । तस्मान्न स्वर्गकामनाविशिष्टस्य पुरुष-

---

[1] एवमिति पुस्तकान्तरपाठः ।

स्यात्र शेषत्वेनान्वयः । तत्र विशेष्यांशस्य प्राप्तत्वाद्विशेषणपरत्वं लोहितोष्णीषादिवद्भवति । तत्रापि स्वर्गकामनायाः शेषत्वेनोपदेशे अदृष्टार्थता स्यात् । न हि स्वर्गकामनायाः कर्म्मणि दृष्टोपकारः संभवति । गौरवं च स्वर्गविशिष्टस्य कामस्याङ्गत्वोपदेशे विधेः स्यात् । स्वर्गस्य तु द्रव्यरूपस्य कर्म्मसाधनत्वेन दृष्टार्थत्वात्तन्मात्रस्य चाङ्गत्वविधाने लाघवात् द्रव्योपदेश एवायम् । कर्तृवचनस्त्वणूप्रत्ययः सह कामयतिना ऽनुवाद इति। सिद्धान्तस्तु विधिबलेनैव व्यापारस्य भावनायाः पुरुषार्थत्वमवगम्यते न ह्यस्वार्थे कर्म्मणि कश्चित्प्रेक्षावान्प्रवर्त्तते । तादर्थ्यं च तदपेक्षितोपकारसाधनत्वात् । तेन विधित एवापेक्षितोपकारसाधनद्वारेण पुरुषार्थत्वे भावनायाः समधिगते सत्युपकारविशेषापेक्षायां स्वर्गकामशब्देन पूर्वोक्तन्यायावधारितानुपपन्नपुरुषविशेषप्रतिपादकभावेन विशिष्टफलापेक्षिणः पुरुषस्य शेषित्वमभिधीयमानं विशेषणभूतस्वर्गाख्योपकारविशेषप्रतिपत्तिपरं भवति । तत एव स्वर्गकामशब्दः पक्षद्वये ऽपि न पुरुषपरः किं तु स्वर्गपरः । गुणप्रधानभावे तु विवादः । अत एवोक्तं किं स्वर्गो गुणतः कर्म्म प्रधानतः उत कर्म्म गुणतः स्वर्गः प्रधानत इति । किमिदानीं शेषित्वेन फलकामस्यान्वयः । बाढम् । कथं तर्हि राजा राजसूयेन स्वाराज्यकामो यजेतेत्यादिषु राजादिशब्देन शेषप्रतिपादकेन कामशब्दस्य सामानाधिकरण्यम् । उच्यते । उभयोरपि कर्तृपरत्वात् । कर्तृत्वेन हि राज्ञ इव फलकामस्यान्वयः समस्त्येव । स त्वन्वयः कर्म्मणा पुरुषस्योपकारः कथं भवतीत्येवमर्थः मलिनेन स्नातव्यं क्षुधितेनाशितव्यमितिवत् । यत्र हि तृतीयाश्रुत्या विस्पष्टे ऽपि कर्तृत्वे ऽभिहिते शेषित्वमेव मलिनादेर्भवति तत्र स्वर्गकामादेः फलसमभिव्याहारकल्प्यकर्तृत्वस्य न भवतीति कुत एतत् । न खलु कर्तृत्वान्वयः शेषिभा-

वस्य परिपन्थी सर्वकारकाणां शेषित्वसंभवः प्रयाजशेषादीनां प्रागेव दर्शितो यतः। यद्येवं कथं तर्हि द्वितीया शेषिविभक्तिः तृतीयादयस्तु शेषविभक्तय इति विशेषसिद्धिः। उच्यते। साध्यसाधनभावप्रतिपादनादुपपन्नो विशेषः। द्वितीया हि साध्यभावं प्रतिपादयति साध्यत्वं च शेषित्वप्रत्यासन्नम्। न ह्यसाध्यस्य शेषित्वं संभवति तेन तदभिधायिन्या द्वितीयया तदवगतिर्युक्तैव। तृतीयादयस्तु शेषभावप्रत्यासन्नसाधनत्वाभिधानात्तत्प्रमाणतयोच्यन्ते यत्र तु तत्प्रतिपादितसाधनभावस्यैव शेषित्वं भवति तत्र साध्यत्वमशब्दाभिहितमपि कल्पयितव्यमिति विशेषसिद्धिः। तेन कर्त्तृत्वान्वितयो राजस्वाराज्यकामयोर्विधिबलेन स्वाराज्यकामस्य शेषित्वं राज्ञस्तु द्रव्यकर्म्मसंयोगन्यायेन साधनत्वानुगुण्यात्तच्छेषत्वमेव भवति। यो ऽपि कैश्चिन्नियोज्यत्वेनान्वयः फलकामस्येष्यते सो ऽपि विविच्यमानः शेषित्वान्वय एव यथोक्तो भवति। इतरथा तु न कर्त्तृत्वान्वयाविशेषात्। तथा हि।

नियोज्यो नाम यः कार्यमात्मीयत्वेन बुध्यते।
तदीयत्वं च कार्यस्य तत्कृतिव्याप्यतात्मकम् ॥२३॥
यत्कृत्या व्याप्यते यच्च ध्रुवं तत्कर्तृकं हि तत्।
तत्कर्त्तृत्वनियोज्यत्वे शेषशेषित्वकारिते ॥ २४ ॥

स्वर्गकामस्य कर्त्तृत्वान्वयं पूर्वपक्षीकृत्य नियोज्यत्वेनान्वयः सिद्धान्तीक्रियतइति यस्य दर्शनं सो ऽपि शेषशेषिभावव्यतिरेकेणान्वयस्य भेदं वक्तुं न क्षमते। तथा हि। यो ममेदं कार्यमिति बुध्यते स नियोज्यः ततश्च स्वर्गकामो यजेतेत्यनेन स्वर्गकामस्येदं कार्यमिति प्रतिपादयितव्यम्। स्वर्गकामकृतिव्याप्यमित्यर्थः। तथा

हि सत्यसौ ममेदं कार्यमिति बुध्यते यच्च यस्य कृत्या व्याप्यते
तत्तत्कर्त्तृकमेव यथा भावार्थः । तस्माद्राजस्वाराज्यकामयोः
कर्त्तृत्वेनान्वयात्स्वाराज्यकामस्य नियोज्यत्वं राज्ञस्तु कर्त्तृत्व-
मित्ययं विशेष एवं समर्थयितव्यः । कर्त्तृत्वे ऽपि स्वाराज्यका-
मस्य शेषित्वं कार्यं प्रति राज्ञस्तु शेषत्वमिति । ननु बोद्धृ-
त्वेन नियोज्यत्वं न शेषित्वेन किमिदानीं कामशब्दः
कामिनः कार्यं विषयावच्छिन्नं प्रति बोद्धृत्वमभिधत्ते स्वर्ग-
कामबोद्धृकं यागावच्छिन्नं कार्यमिति । यद्येवं बोद्धृ-
त्वव्यतिरेकेण कामिनः कार्यान्वयाभावाद्यजेतेत्यनेन यो ऽर्थो
ऽभिहितस्तमेव केवलं बुध्येत कार्यमेतदिति न तु ममेदं
कार्यमिति ममशब्दाभिधेयस्य सम्बन्धस्य नियोगेन सहात्मनः
कस्य चिदप्यभावात् । ततश्चानियोज्यत्वमेव । न हि यः का-
र्यमिति बुध्यते स नियोज्यः किं तु यो ममेदं कार्यमिति बुध्य-
ते । न च प्रवृत्तिः सिद्ध्येत् । न हि कार्यमित्येव कश्चित्प्रवर्त्तते
अपि तर्हि ममेदं कार्यमिति । अनर्थकश्च नियोज्यप्रतिपादकः
शब्दः स्यात् अन्तरेणापि तच्छब्दमाख्यातार्थं व्युत्पन्नः स्वर्ग-
कामो बुध्यतएव । तत्र परिसंख्या स्यात् । स्वर्गकाम एव व्यु-
त्पन्नो बुध्येत नान्य इति सा चाशक्या परिसंख्यायमाने ऽपि
व्युत्पन्नानां बोधस्यानिवार्यत्वात् । पितृयज्ञादौ च सर्वेषामेव
व्युत्पन्नानां बोद्धृत्वलक्षणनियोज्यत्वसद्भावान्न तदध्याहारः
स्यात् । तस्मात्स्वर्गकामस्य ममेदं कार्यमिति एवंविधबोद्धृत्व-
लक्षणनियोज्यत्वमिच्छता ऽवश्यमस्येदं कार्यमित्येवमेव वचनेन
प्रतिपादयितव्यमिति वक्तव्यम् । तथा च कर्त्तृत्वेनैवान्वयप्रस-
ङ्गः । यद्युच्येत सत्यमयमेवान्वयः तथा ऽपि तु न कर्त्तृत्वनियो-
ज्यत्वसङ्करः विषयभेदात्कर्त्तृत्वं हि भावार्थे नियोगे न नियो-
ज्यत्वमिति ।

तदयुक्तं न भावार्थव्यतिरेकेण किं चन ।
कार्यं प्रसिद्धमद्यापि नियोज्यत्वे स्थिते हि तत् ॥२५॥

एतदधिकरणसिद्ध एव हि नियोज्यान्वयः क्रियातिरिक्त-कार्याभिधानकल्पनाबीजम् । अतः प्राक् न तत्सिद्धिरिति न विषयभेदादसङ्करः शक्यते ऽभिधातुम् । लोके च तदभावात् देवदत्त गामानयेत्यादिषु सम्बोधनविभक्तिसद्भावे ऽपि देवदत्ता-दीनां नियोज्यत्वं न स्यात् । तस्मात्कार्य्यं प्रति शेषित्वमेव नियोज्यत्वं च कर्त्तृत्वमित्येव वाच्यम् । यस्तु ब्रूते—

शेषशेषित्वभेदेन सत्यं कर्त्तृनियोज्यते ।
कृतिं प्रति त्वसौ भेदः कार्य्ये तु गुणता द्वयोः ॥२६॥

यद्यपि कर्त्तृत्वनियोज्यत्वयोः शेषशेषित्वभेदादेव विशेष-स्तथा ऽपि न नियोगं प्रति नियोज्यस्य शेषिता तस्य सर्वप्र-धानत्वात् । यथा ऽऽह "नियोगसिद्धौ सर्वं तदनुगुणमिति केन नेष्यत"इति । किं तर्हि कृतिं प्रति शेषित्वं नियोज्यत्वम् । तां च प्रति शेषत्वं कर्त्तृत्वमिति तेनात्मार्थकृतिव्याप्यं कार्यं बु-ध्यमानो ऽपि नियोज्य इत्युच्यते न तु कार्यमेवात्मार्थं तेन स्व-र्गकामो यजेतेत्यस्य को ऽर्थः यागावच्छिन्नं स्वर्गकामार्थकृति-व्याप्यं कार्यमित्यर्थः । तेन कार्यं प्रत्युभयोः कर्त्तृनियोज्ययोः शेषत्वे सत्येव कृतिं प्रति शेषशेषिभावादसङ्कर इति । सो ऽपि वृथैव क्लिश्यति तथा हि ।

कृतिर्हि कार्यशेषत्वान्नान्यशेषत्वमश्नुते ।
कार्ये तच्छेषभूते ऽस्यास्तद्द्वारेण भवेदिदम् ॥२७॥

न खलु नियोगशेषभूता अभिधानत एवावगम्यमाना कृतिः पुरुषशेषभावमनुभवितुमर्हति । अन्यार्थस्यान्यार्थता ऽनवकल्प-नात् । यदि तु तत्कार्यं पुरुषशेषो भवेत् ततस्तद्द्वारेण कृतेरपि

संस्काराणामिव कारकद्वारेणापूर्वशेषता पुरुषशेषत्वं भवेन्नान्यथा । नन्वसत्यपि नियोगस्य पुरुषशेषत्वे फलस्य तच्छेषत्वात्तस्यापि तथैव कृत्या व्याप्यत्वात्तद्वारेण कृतेः पुरुषशेषता भविष्यतीति । का वार्त्ता नैमित्तिकनिषेधाधिकारयोः । न हि तत्र फलान्तरमस्ति यद्वारेण कृतेः पुरुषशेषता भवेत् । अस्ति च तत्रापि निमित्तवान्निषिध्यमानक्रियाप्रवृत्तश्च नियोज्यः स कथमात्मार्थकृतिव्याप्यं कार्यं जानीयात् । तस्मान्नियोगरूपस्याधिकार्यस्य पुरुषार्थत्वमवश्यमभ्युपेयम् । युक्तं चैतत् । न ह्यस्त्यार्थे कश्चिदपि ममेदं कार्यमित्यवगन्तुमर्हति । यदि नैवं फलस्यापि तर्हि न पुरुषार्थता सिध्येत् तस्यापि हि ममेदं कार्यमित्येतादृश्येवावगतिः । तस्मादकामेनापि कार्यमेव प्रति पुरुषस्य शेषित्वं नियोज्यत्वं शेषत्वं च कर्त्तृत्वमित्येव विवेको भणितव्यः । एवं च सम्बोधनविभक्तिर्नियोज्ये प्रमाणमित्ययुक्तम् । अग्नीदग्नीन्विहरेत्यादिष्वग्नीदादीनां कृतिं कार्यं वा प्रति शेषित्वाभावादशेषिणश्चानियोज्यत्वात् । आह ।

विध्यर्थे कार्यरूपे स्याच्छेषित्वेन नियोज्यता ।
प्रवर्त्तनात्मकत्वे तु प्रवर्त्यस्य नियोज्यता ॥२८॥

प्रवर्त्तनारसो ह्यहमिदं कुर्यामित्येवंविधान्तःसंकल्पमूलात्मा विधिरिति भवतां सिद्धान्तः । स च प्रवर्त्यं भाव्यमिव भावना अपेक्षते प्रवर्त्यश्च नियोज्यः तत्र स्वर्गकामशब्दः किं भावनापेक्षितं भाव्यं समर्पयेत् आहो स्विद्विध्यपेक्षितं नियोज्यम् उभयपरत्वानुपपत्तेर्वैरूप्यापातादन्यतरेणान्यतरसिद्धेः । न हि स्वर्गफले कर्म्मण्यतदर्थी नियोज्यः संभवतीति फलेन नियोज्यसिद्धिः स्वर्गकामस्य चान्यफले कर्म्मणि नियोज्यत्वायोगान्नियोज्यविशेषणफलसिद्धिः । तत्र स्वर्गकामशब्दस्य पुरुषवचनत्वान्नियोज्यपरतैव युक्तेति । उच्यते ।

विधेरपेक्षितस्सत्यं नियोज्यो न त्वसौ तदा ।

अवधारयितुं शक्यः फलस्य त्वस्ति योग्यता ॥२९॥

यद्यपि फलवन्नियोज्यो ऽपेक्षितस्तथा ऽपि नासावनुष्ठेय-वर्गावधारणात्प्रागवधारयितुं शक्यते । न हि फलकाममात्रस्य नियोज्यत्वम् । कस्य तर्हि अनुष्ठानशक्तियुक्तस्य । सा चा-नुष्ठेयावगमाधीननिरूपणा । अङ्गप्रधानयुक्तैव च क्रिया ऽनु-ष्ठेया तस्याश्च यथा विधिरंशत्रयसम्बन्धोत्तरकालमेव भवति न प्रथमम् अयोग्यत्वात् तथा नियोज्यो ऽपि । फलं तु प्रागे-वांशान्तरसम्बन्धादवगन्तुं शक्यतइति तत्परमेवेदम् । अवगते च तस्मिन्नंशान्तरे चावधारिते सर्वविशेषणविशिष्टायां भावना-यां तत्फलकामं तदनुष्ठानसमर्थं पुरुषं विदधद्विधिर्नियुङ्क्ते । आह च "अङ्गप्रधानवत्यां च भावनायां युगपत्पुरुषनियोग" इति । किं च नियोज्यान्वये ऽपि न पुरुषपरत्वं कामशब्दस्य किं तु फलविशेषपरत्वमेव । तथा हि विधित एवावगम्यते अस्ति हि कश्चिदिह व्यापारे नियोज्यः स चासौ योग्यस्य व्यापा-रस्य शेषी न ह्यस्वार्थे व्यापारे कश्चिन्नियोक्तुं शक्यते स एव शेषी यो ऽस्य भाव्यं फलविशेषं भोक्तुमभिलषतीत्येवमवगते फलविशेषमात्रे चानवगते तत्परत्वमेव स्वर्गकामशब्दस्य भवति । तत्र किं नियोज्यत्वेन स्वार्थमभिदधत्तत्परः उत शेषित्वेनेति चिन्तायामशक्यावगमनियोज्यपरित्यागेन शक्यप्रतिपत्तिशेषित्व-प्रतिपादनमेव वरम् । न हि नियोज्यत्ववच्छेषित्वं शक्तिविशिष्ट-स्य अनुष्ठानोपयोगिनी हि सा न शेषित्वोपयोगिनी अनुष्ठातुरेव शेषित्वादशक्तानामनधिकारो राजसूयइवाराज्ञः । न हि तत्र राज-त्वमधिकारांशपाति तद्वच्छक्तेरप्यधिकाररूपशेषित्वाननुप्रवेशाच्छ-क्यतएवाङ्गनिरूपणस्य पुरस्तादेव शेषित्वं निरूपयितुमिति शेषित्वे-नैव स्वर्गकामस्यान्वयः। स च फलविशेषप्रतीतिपर इति तस्मा-

त्स्वर्गादेः फलत्वेनान्वयात्तत्साधने कर्म्मणि पुरुषस्य सिद्धो ऽधिकार इति तद्विशेषनिरूपणमारब्धव्यम् । तत्र प्रधानवाक्ये ऽविशेषेण सर्वेषामधिकारावगमात्तदनुसारेणाङ्गानां विनियोगा-द्यो यच्छक्नोति कर्तुं स तत् कुर्यादिति । तद्यथा ।

द्रवसंहतमांसानामवदाने ऽवधारिते ।
स्रुवेणावद्यतीत्येतत्सामर्थ्याद् द्रवगोचरम् ॥ ३० ॥

तथा स्वर्गकामशब्देन सर्वेषामधिकारे ऽवगते सत्यङ्गविध-यस्समर्थगोचरा भवन्ति तस्मात्तिर्य्यगादीनामप्यधिकार इत्युक्ते ऽभिधीयते । नित्यवदङ्गानामन्वयावगमात्पाक्षिकत्वे तद्बाधप्रस-ङ्गादङ्गोपेतस्यैव फलसाधनत्वं नान्यादृशस्य । नन्वेकार्थत्वादङ्गा-नां व्रीहियववद्विकल्पे सति येन केन चिदङ्गेनापि युक्तं प्रधानं फलसाधनं स्यात् । मैवं वोचः । न ह्येकार्थत्वमात्रं विकल्पे हेतुः किं तर्हि निरपेक्षाणामेकोपकारसाधनत्वं न च समिदादी-नामेकार्थत्वं परस्परनिरपेक्षैस्समिदादिविधिभिः पृथगेवावान्त-रापूर्वाख्योपकारपरिकल्पनात् । यथा ऽऽह भाष्यकारः । "न च यत्समित्सम्बन्धेन क्रियते तत्तनूनपात्सम्बन्धेने"ति । ननु च सर्वैरंशैरेक उपकारः क्रियतइति दर्शनं तत्कथमुपकारभेदा-भ्युपगमः । सत्यमेक उपकारः न तु तत्र नैरपेक्ष्यं यदि हि पूर्व-प्रसिद्धमुपकारमुद्दिश्य तत्साधनत्वेन समिदादयो विधीयेरँस्तत-स्सर्वेषां नैरपेक्ष्येण तत्साधनत्वावगमाद्विकल्पः स्यान्न त्वेतदस्ति तादर्थ्यमात्रेणाङ्गेषु प्रधानान्वितेषु पश्चादुपकारकल्पनादिति प्रागेवावेदितम् । तेनाष्टदोषदुष्टविकल्पपरिहारार्थं समुदिताङ्ग-विशिष्टप्रधानभावनाविधानात्सहैव सर्वेषामेकोपकारसाधनत्वेना-ग्नेयादीनामिव फलसाधनत्वं समिदादीनामवगम्यते येन यत्रै-कार्थ्यं न तत्र नैरपेक्ष्यं यत्र नैरपेक्ष्यं न तत्रैकार्थ्यमिति न

विकल्पसंभव इति । व्रीहियवयोस्तु पुरोडाशप्रकृतित्वादेककार्ययोर्वाक्यद्वयेन निरपेक्षयोरवगमाद्युक्तो विकल्पः । तस्मात्साङ्गस्यैव फलसाधनत्वादनुष्ठानसमर्थस्यैवाधिकारः । यत्तु प्रधानवाक्ये सर्वेषामधिकारावगमात्तदनुरोधेनाङ्गानां समर्थविषयत्वमिति । तदयुक्तम् विरोधाभावात् । न हि प्रधानवाक्येन सर्वेषामधिकारो निश्चितः सामान्येन त्वसाववगम्यते तत्रासति विशेषप्रमाणे सर्वेषां स्यात् । अङ्गानुरोधात्तु विशेषावगमात्र सर्वेषामसौ भवति । यत्र तु प्रधानवाक्यविरोधे नैमित्तिकाधिकारे तत्र यथाशक्त्यङ्गोपसंहारो भवत्येवेति दर्शितं यथा शक्तिनिर्णये । तस्मात्तिर्य्यगादीनां शूद्राणामनाहिताग्नीनामसमाधेयाङ्गवैकल्यानां राजसूयादिषु च ब्राह्मणादीनामनधिकारः । अवदानं तु द्रवादीनां विशेषरूपेणैव तत्र विहितमिति न वस्तुवशेन सङ्कोचनम् । तस्मात् ।

यथाऽधिकारमङ्गानां विनियोगो न वर्ण्यते ।
यथाऽङ्गविनियोगं स्यादधिकारस्य वर्णनम् ॥३१ ॥

इति न्यायरत्नमालायां तृतीयः परिच्छेदः ॥

एवं तावदौपदेशिकाङ्गसम्बन्धप्रकारस्सप्रमाणकः पूर्वाध्यायषट्कगोचरः प्रदर्शितः। इदानीमातिदेशिकाङ्गसम्बन्धविधा सप्रमाणोत्तरषट्कप्रतिपाद्या ऽभिधीयते । द्विविधं हि शब्दजातमुपदेशात्मकमतिदेशात्मकं च। इत्थमिदं कर्त्तव्यमित्युपदेशः, तद्वदिदं कर्त्तव्यमित्यतिदेशः । तत्रानुपदिष्टधर्म्मकेष्वैन्द्राग्नादिषु अतिदेशेन तत्प्राप्तिस्सविशेषा सप्तमादिषु चिन्त्यते । तत्र प्रथमं तावदुपोद्घातत्वेन व्यवस्था धर्म्माणां प्रतिपाद्यते। तस्यां हि सत्यामतिदेशविचारः कर्त्तव्यो नान्यथेति । तत्र दर्शपूर्णमासादिकरणपठिताः प्रयाजादयः सर्वयागेष्वेवोपदेशेन सम्बन्धं लभन्ते । कथम् । इतिकर्त्तव्यता हि करणानुग्राहिणी तेनैव सम्बन्धमर्हति । न च तद्विधीयमानं फलं प्रतीतिकर्त्तव्यतया संगन्तुं क्षमते वैरूप्यापत्तेः । तस्माद्यागे फलं प्रति विहिते सत्यनुमितेन वाक्येन यागमनूद्य धर्म्मा विधीयन्ते । ततश्चाविशेषात्सर्वेष्वेव यागेषु विहिता भवन्ति । ननु प्रकरणाम्नानानुमितेन वाक्येन प्रकृतस्यैव यागस्यानुवादात्कथं पारिप्लवत्वम् । नैष दोषः। प्रकरणाम्नानादपि यजिशब्दस्यैव प्रधानानुवादकस्य परिकल्पनात् । तेन च स्वशक्त्या सर्वयागानामनुवादात् । यद्दर्शपूर्णमासाभ्यां यजेतेत्येवं कल्पने ऽप्युद्दिश्यमानस्य विशेषणविवक्षाऽसम्भवात् सर्वार्था धर्म्मा इति पूर्वः पक्षः । सिद्धान्तस्तु भावनैव प्रत्ययार्थः करणेतिकर्त्तव्यताविशिष्टा विधीयते । तस्याश्च सहभाव्यरूपेणापूर्वेण शब्दान्तरादिभिर्भेदः साधितः । तत्रैकस्यामितिकर्त्तव्यताविशिष्टायां विधीयमानायामन्यस्याः कुतस्तत्प्राप्तिः । विधीयमानैव भावना त्रिभिरंशैरवैरूप्येण सम्बध्यते । इदमनेनेत्थं कुर्यादिति तस्यां तु विशिष्टायां विहितायां पश्चादरुणैकहायनीन्यायेनांशानां परस्परं सम्बन्धः । यथोक्तम् ।

"एकभावनयोपात्तास्त्रयो ऽप्यंशाः परस्परम्।
उपकार्योपकारित्वं पश्चादनुभवन्ति ते" इति॥

यद्यपि करणानुग्राहिण्येवेतिकर्त्तव्यता तथा ऽपि न तेन साक्षात्सम्बध्यते न हि भवतीत्थं याग इति किं त्वित्थं कुर्यादिति। तस्माद्भावनासम्बन्धाद्भाव्यरूपापूर्वविशेषप्रयुक्तमङ्गजातं न पारिप्लवमिति यद्यपि यजिप्रयुक्तं तथा ऽपि प्रकृतयागानुवादेन विधानान्न पारिप्लवं स्यात्। सामान्यवचनो ऽप्यधिकारवशाद्विशेषे वर्त्तते तस्माद्यजिप्रयुक्तत्वपक्षे ऽपि न पारिप्लवत्वम्। तथा च नवमाद्ये भाष्यकारो वक्ष्यति। किं प्रतिप्रकरणं नियता धर्म्मा उत सर्वे सर्वत्रेति। तदपूर्वप्रयुक्तत्वे यजिप्रयुक्तत्वे च सिध्यति। यद्येवं किमिति तर्ह्यपूर्वप्रयुक्तत्वमत्र साधितम्। यजिप्रयुक्तत्वे ऽपि तद्विशेषप्रयुक्तत्वाच्छक्यतएव व्यवस्थापयितुम्। तत्त्वेन तूत्तरं विवक्षता अपूर्वभावनया सम्बन्धः कथित इत्यदोषः। युक्तं तावद्भाव्यनिष्कर्षेण संबध्यमानं धर्म्मजातं भाव्यप्रयुक्तमिति भाव्यं तु नापूर्वं स्वर्गं भावयेदिति ब्रूयुः। भावना च फलस्योच्यतइति तत्र तत्र भाष्यकारवचनात्। स्वर्गकामाधिकरणे ऽपि यागस्य कर्त्तव्यतोच्यते कामस्य वेति भाव्यविशेषविचारं दर्शयन् सिद्धान्ते कामस्यैव भाव्यतेति दर्शयति। विश्वजिदधिकरणे च पूर्वपक्षे न चापूर्वस्य कर्त्तव्यतामाह फलकर्त्तव्यतायां हि सत्यां तदवगम्यतइति वदन् फलभाव्यतोत्तरकालमपूर्वकल्पनं दर्शयति। सिद्धान्ते ऽपि फलविशेषापेक्षां दर्शयन्न व्यापारस्य कर्त्तव्यतोच्यते कस्य तर्हि व्यापारेणान्यस्य कस्येति भवति तदानीं साकाङ्क्षमित्याह। तत्कथमिह यजेर्गुणभावः श्रूयते। दर्शपूर्णमासाख्येन यागसमुदायेनान्यं कुर्यादिति यत्र कर्त्तव्यतया चोद्यते न यजिः अपूर्वं तदित्याह। तस्माद् व्याख्येयमेतत्। किमिति व्याख्यातं स्वयमेव भाष्यकारेण।

ननु फलमत्र वाक्ये श्रूयते स्वर्गकामो यजेतेति तत्कर्त्तव्यं स्यादिति चोदयित्वा सत्यं श्रूयते न तु तद्यजिना क्रियते विनष्टे यजौ तद्भवति अपूर्वन्तु तेन क्रियते तस्मान्न तस्य कर्त्तव्यतोच्यतइति परिहृतम्। अस्यार्थः। न साक्षाद्यजिर्विनशरारुत्वात्फलं साधयति किं तु अपूर्वप्रणालिकया। तेनापूर्वे कृते तेनैव फलं भविष्यतीत्यवधारणात्तत्सिद्ध्यर्थं तत्कर्त्तव्यं भवति तेन भाव्यप्रयुक्तमङ्गजातम्। आन्तरालिकभाव्ये ऽपूर्वे वाङ्नियमवदवान्तरापूर्वे पर्यवस्यतीति एतदेव पुनश्चोद्यपूर्वकं प्रकटितम्। यश्च यजेः प्रत्यक्षः फले गुणभावः स नानाद्रत्या पूर्वं संभवतीति प्राणालिको विज्ञायतइति। एतेन नवमाद्यभाष्यमपि भावप्रत्यार्थे न हीतिकर्त्तव्यता ऽऽकाङ्क्ष्यते कर्त्तव्यं कथमिति न यजिः कीदृश इति तस्माद्यत्कर्त्तव्यं तस्येतिकर्त्तव्यतया संबन्धो ऽपूर्वं च तदित्येतद्व्याख्यातं कर्त्तव्यमिति भाव्यनिष्ठं व्यापारं विधियुक्तं प्रत्ययार्थं दर्शयति। तस्माद्यत्कर्त्तव्यमिति यत्तस्य व्यापारस्य भाव्यं तदर्थमितिकर्त्तव्यताजातमित्यर्थः। अपूर्वं च तदिति फलस्य भाव्यत्वं साक्षादसंभवदपूर्वे संक्रान्तमतस्तदेव साक्षाद्भाव्यमित्यपूर्वप्रयुक्तमित्यर्थः। यदि पुनरनेन भाष्येणापूर्वस्य प्रत्ययवाच्यत्वमुच्यते ततो विश्वजिदधिकरणे व्यापारेणान्यस्य कर्त्तव्यतोच्यते कस्येति भवति साकाङ्क्षं तत्राध्याहारो ऽवकल्पतइति न युज्यते। यदा ह्यपूर्वाख्यस्य भाव्यविशेषस्य स्वशब्देनैवाभिधानं तदा कस्य भाव्यत्वमित्याकाङ्क्षा न जायेत यत्र तद्विशेषाध्याहारो भवेत्। यदा तु भाव्यनिष्ठो व्यापारः सविधिकः कर्त्तव्यमिति भाव्यविशेषापेक्षानिमित्तो ऽध्याहारः। एवमन्यत्रापि यागे वा कर्त्तव्यतोच्यते कामे वेति न तावदपूर्वं कर्त्तव्यमित्युक्त्वा ननु च फलं कर्त्तव्यं स्यादित्यनेन तदेवोपपाद्यते नापूर्वस्य भाव्यविशेषशब्दार्थत्वम्। तस्मादेवमाद्यनालोचनेन प्रत्ययार्थत्वमपूर्व-

स्य भाष्यकारेणोक्तमिति जल्पतामुपेक्षैवोत्तरमिति । किमर्थं पुनः प्रत्यक्षप्रतिपन्नभाव्यभावफलपरित्यागेनानुमानिकभाव्यभावस्यापूर्वस्य प्रयोजकत्वमङ्गीक्रियते । एतदपि भाष्यकारेणैव फले यजेः प्रत्यक्षो गुणभावः आनुमानिको ऽपूर्वइति चोदयित्वा प्रत्यक्षो ऽपि नानादृष्टापूर्वं सम्भवतीति प्राणालिको विज्ञायते । न चैतावता प्रत्यक्षश्रुतयागकरणत्वहानिः । यतः प्रणाल्या ऽपि येन क्रियते तत्करणं भवति यथा गोमयैः पचन्ति तुषपक्का भवन्तीति अनेन परिहृतम् । कथमनेनैतत्परिहृतम् । उच्यते । प्रत्यक्षो ऽपि यागस्य फलसाधनभावः क्षणिकस्य न साक्षात्सम्भवतीत्यानुमानिकापूर्वप्रणाल्या समाश्रीयते अनुमिते चापूर्वे न फलापूर्वयोः कश्चिद्विशेषः द्वयोरपि भाव्यत्वस्यावगतत्वात् । अनिर्ज्ञातोपायत्वाच्च । नात्र कश्चिद्धेतुरस्ति यदव्यवहितभाव्यमपूर्वमुल्लङ्घ्य फलं यावदितिकर्त्तव्यता गच्छेत् । एतेनाज्यौषधसान्नाय्यधर्म्माणां वाङ्नियमादीनां चावान्तरापूर्वप्रयुक्तिर्व्याख्याता । अतः सिद्धमवान्तरापूर्वभावनासम्बन्धाद् व्यवस्थिता एव धर्म्मा न पारिप्लवा इति । तेनानुपदिष्टधर्म्मकेष्वैन्द्राग्नादिष्वतिदेशेन धर्म्माः सिध्यन्तीत्येतत्साधनार्थं सप्तमादिकमारब्धव्यम् । तत्र सप्तमे प्रत्यक्षवचनेन नामधेयेन च सापवादो ऽतिदेशः कृत्स्नः साध्यः । आनुमानिकवचनेनातिदेशो ऽपि सामान्येन । तद्विशेषस्त्वष्टमे चिन्तितः । नवमे त्वतिदिष्टानां पदार्थानां दशमाद्यसाध्यं कार्य्यप्राधान्यं सिद्धं कृत्वा प्रयोगविशेषविचार ऊहाख्यः क्रियते यद्यपि चोहशब्दस्तर्कमात्रवचनः तथा ऽप्यस्मिन् शास्त्रे ऽन्यथा ऽवगतानां पदार्थानामन्यथाभावविषयो यस्तर्कः स ऊहशब्देनोच्यते । यद्यपि चात्रोपदेश एव चिन्त्यते । किं प्रकृतौ हन्तिपिषिप्रयुक्तं प्रोक्षणम् उतापूर्वप्रयुक्तम् । प्रवोवाजीयाप्रयुक्तं प्राथम्यप्रयुक्तं वा

त्रित्वम् । सवित्रादिशब्दाः समवेताभिधायिनो न वा यज्ञपति-शब्दः स्वार्थः परार्थो वा । अग्निस्वरूपप्रयुक्तं मन्त्रोच्चारणं देवताविशेषप्रयुक्तं वेति । तथा विकृतावप्यर्थान्तराणां नीवारनखावपनपरिधिमध्वशनादीनां पञ्चधा प्राकृतव्रीह्यादिकार्य्योपपत्तिरुपदेशार्थ एव तथा ऽप्यष्टमानन्तरमेवास्य सङ्गतिः । न हि प्रकृतिमात्रालोचने प्रयुक्तिविशेषजिज्ञासा जायते कारणाभावात् । यदा तु विकृतावतिदिष्टा धर्म्मास्तदा कथमत्रैते प्रयोक्तव्या इति चिन्ता जायते तदुपायत्वेन च किंप्रयुक्ता एते प्रकृताविति जिज्ञासा तेनोपदेशविचारो ऽप्यतिदिष्टेष्वेव विशेषं फलतीति विशेषातिदेशानन्तरमारब्धः । तदुपोद्घाततया चापूर्वप्रयुक्तत्वं सप्तमाद्यसाधितं स्मारितम् । अथ वा ऽत्रैवैतत् साध्यते धर्म्मव्यवस्था तु यजिविशेषप्रयुक्तत्वे ऽप्युपपद्यतइत्युक्तम् । ऊहस्तु नापूर्वप्रयुक्तत्वमन्तरेण सिध्यतीति इह तत्साध्यते तत्र तु यजिमात्रप्रयुक्तत्वनिराकरणपरेण सता ऽत्रस्थमपूर्वप्रयुक्तत्वमुक्तम् । अथ वा तत्रारादुपकारिणाम् । इह सन्निपातिनां तत्प्रयुक्तत्वमभिधीयते । तत्र तु चोद्यनिराकरणमात्रार्थं सन्निपातिपरामर्शः । निमित्तमात्रं वा तत्र अत्र तु प्रयोजकं विचारितमित्यपुनरुक्तत्वम् । दशमाद्यसाध्यं चोपकारपुरोधानं पदार्थानामूहसिद्ध्यर्थमपेक्षितव्यम् । अन्यथा तदसम्भवात् । यदा ह्यनादृतोपकाराः पदार्थाः प्रकृताविव विकृतौ सम्बध्यन्ते तदा तद्वदेव यथाऽवस्थितानामेवाङ्गानां दृष्टमदृष्टं वा प्रयोजनं परिकल्प्य लक्षणया वा ऽविकृतानामेव प्रयोगः स्यात् । यदा तु यथा प्रकृतावुपकृतं तथा विकृतावित्युपकारः पूर्वं प्राप्तस्तथाविधश्चोपकारस्तैरेव पदार्थैर्ज्ञातोत्पत्तिरिति तत्सिद्ध्यर्थं तेषामतिदेशः पश्चाद्भवति । तदा येन यथोपकृतं तेन तथैवोपकर्त्तव्यमिति विकृतावप्यारादुपकारकाणां परमापूर्वोत्पत्तावदृष्टोपकारसाधन-

त्वं सन्निपातिनामपि स्वकारके दृष्टमदृष्टं वा कुर्वतां यागसाम-र्थ्यजननद्वारेणोत्पत्त्यपूर्वसाधनत्वम् । मन्त्राणामपि देवतादिप्रकाशनद्वारेणोपकारकत्वमिति तत्सिद्ध्यर्थम् ऊहः सन्निपातिनां मन्त्रसामसंस्काराणां सिद्धो भवति । न हि व्रीहिषु क्रियमाणं प्रोक्षणं नैवारचरोः प्राकृतमुपकारं साधयतीत्यूहितव्यम् । एवं साम्नामप्यृगन्तरसंचारे द्रष्टव्यम् । मन्त्राणामपि देवतान्तरद्रव्यान्तरवत्सां विकृतावविकृतानां प्रकृतिवदुपकारकत्वं न संभवतीति प्रातिपदिकलिङ्गवचनानामेकैकस्य द्वयोर्द्वयोर्वा समस्तानां वा ऽन्यथाभावात्तथाऽवस्थितानामेव वा ऽभ्यासादष्टधा ऽधिकार ऊहः सिध्यति । तदूहस्यापि कार्यप्राधान्यमपेक्षितव्यमिति द्वयो-रप्यूहबाधयोस्साधारणं मध्ये समारब्धमिति वेदितव्यम् । दशमे बाधाभ्युच्चयद्वारेण विकृतिषु पदार्थेयत्ता चिन्त्यते । कथं पुन-र्वचनप्राप्तस्य बाधो ऽध्यवसीयते । यथा चैतत्तथा वक्ष्यामः । प्रथमं तावदिदं तत्सिद्ध्यर्थं चिन्त्यते किं प्राकृतमङ्गजातमनादृतोपकारं स्वरूपेणैव विकृतावतिदिश्यते सौर्येण कुर्यात् कथम् । आग्नेयस्य स्वकार्यसाधने यः प्रकारः स सौर्यस्य स्यादित्यति-दिश्यते ततस्तत्सिद्ध्युपायत्वेनावान्तरापूर्वाणि प्रयाजादिज-न्यानि प्रोक्षणजन्यं चादृष्टं जातिद्रव्यगुणावघातादिजन्यं च नियमादृष्टानुविद्धं दृष्टमतिदिश्यते ततस्तत्साधनभूताः पदार्थाः तेषां च तथाविधानामेव प्रतीत्युपायतया वचनान्यतिदिश्यन्त-इति । तत्र पूर्वः पक्षः प्रकृतिवत्सर्वमेवाङ्गकाण्डं विकृतेरपि वाक्यशेषो भवति तेन तेषु सर्वेषु विहितेषु प्रकृतिवद्यथासम्भवं दृष्टमदृष्टं वा प्रयोजनं कल्प्यतइति नास्ति बाधः । यद्यपि न शास्त्रातिदेशः तथा ऽपि पदार्था एवातिदिश्यन्ते नोपकारः प्रकृतावुपकारस्य पदार्थपूर्वकत्वाद्विकृतावपि तत्पूर्विकैव तस्य प्रतीतिः । तत्र प्रथमप्रतिपन्नपदार्थातिक्रमेण न युक्तं जघन्यप्रति-

पन्न उपकारो ऽतिदिश्यतइति । तस्मात्पदार्थानामेव कार्य्य-निरपेक्षाणामतिदिष्टानामिहैव दृष्टादृष्टप्रयोजनकल्पनान्नास्ति बाध इति प्राप्ते ऽभिधीयते ।

प्रकारस्यातिदेशः स्यात्पूर्वं यस्मादपेक्षितः ।
ततो ऽवान्तरकार्याणामङ्गानां वचसां क्रमात् ॥१॥

यद्यपि प्रकृतावुपकारः शास्त्रपदार्थपूर्वक एव तथा ऽपि विकृतावतिदेशावस्थायां सर्वेषां शास्त्रपदार्थकार्याणां क्लृप्तत्वाविशेषे ऽपि कथंभावापेक्षा विकृतिभावनाप्रकारमेव प्रथमं स्वीकरोति न हि तस्याः शास्त्राणि पदार्था वा स्वरूपेणापेक्षिताः किं तु प्रकारः प्राकृतः स एव तावदङ्गीक्रियते स च पदार्थविशिष्टावान्तरकार्यविशिष्टो ऽतिदिष्टः सन् विशेषणानि चार्थात्प्रापयति तेन तत्सिद्ध्यर्थमवान्तरकार्याणि तदर्थं चाङ्गानि ततः शास्त्राणि । यद्यपि प्रथमावगताः पदार्थास्तथैवालोचयितव्यास्तथा ऽप्यनपेक्षितत्वात्पदार्थानुपेक्ष्य प्रकारमेव विकृतिर्गृह्णाति । तस्मात्तत्पुरस्सर एवातिदेशः तदतिदेशेन चार्थात्प्राप्यमाणेषु पदार्थेषु व्रीहीणां प्रत्यक्षश्रुतकृष्णलचरौ निवृत्तिः वितुषीकरणस्य च तेष्वसंभवान्निवृत्तिः तन्निवृत्तौ च तद्द्वारस्यावघातस्य निवृत्तिरिति तदतिरिक्तविशेषणयुक्तस्यैवोपकारस्यातिदेश इति ॥

प्रकृतस्योपकारस्य विकृतावुपदेशतः ।
अन्वयं कश्चिदाचष्टे पितृयज्ञे नियोज्यवत् ॥ २ ॥

उपदेशो हि ग्रन्थसन्दर्भः स चार्थान्तरान्वितं विध्यर्थं कार्यतया प्रतिपादयति । स तावत्तथाभूत एव औपदेशिकस्तेनापि यदपर्यवस्यता ऽऽक्षिप्यते तदप्यौपदेशिकमेव यथा पिण्डपितृयज्ञे नियोज्यः । यथा च प्रकृतावुपकारः तेन विकृतावपि

विध्यर्थकल्पितस्योपकारस्य भवत्यौपदेशिकत्वमिति कश्चित् तन्न युक्तम्।

उपकारकभेदात्स्यादुपकारविशेषधीः।
पूर्वमेव त्वपेक्षा स्यात्पदार्थेष्वपि सा समा ॥३॥

उपकारकपदार्थविशेषाधीनसिद्धिरुपकारविशेषो नानवधारितेषु तेषु विशेषरूपेण निरूपयितुं शक्यते। भवितव्यं हि केन चिदुपकारविशेषेणेत्यपेक्षामात्रमेव प्रथमं सिद्ध्यति। तच्च पदार्थेष्वपि भवितव्यमुपकारजनकैः पदार्थभेदैरित्यपेक्षासम्भवात्तुल्यमेव। अथोच्येत न विधिर्विशेषरूपेण पदार्थानाक्षेप्तुं प्रभवतीति वाक्यान्तरादिभिरतिदेशेन वा यागदानादिपदार्थभेदसमर्प्पणमपेक्षते। उपकारं तु विशेषरूपेणैवाक्षिपति। अयमेव हि तस्य विशेषाक्षेपः यदस्ति कश्चिदुपकार इति। न ह्यसौ पदार्थवद्यमसाविति निरूप्येत तद्विधित एव कल्पितो ऽसावौपदेशिक इति। तथा ऽपि कथं प्राकृतस्योपकारविशेषस्यौपदेशिकत्वं तस्य हि नान्तरेण चोदकं विधिराक्षेपाय प्रभवति। सत्यं तथा ऽप्युपकारविशेषकल्पनायेशानो ऽपि लाघवात्प्राकृतं गृह्णाति तेन विध्याक्षेपस्यापि विशेषस्य नियममात्रं चोदकादिति।

अत्राह। ननु चैवं सति दृष्टार्थानामवघातादीनां द्रव्यगुणादीनां च विधित एवानियमेनाक्षेपसंभवादतिदेशेन च नियममात्रालाभाद्व्रीह्यादीनामपि विकृतावुपदेशादेव संगतिः प्रसज्येत। अथ विधिना यत्साक्षादाक्षिप्यते तदौपदेशिकं यथा चोपकारः। तत्सिद्ध्यर्थं तु यत्पश्चादाक्षिप्यते द्रव्यादि न तदौपदेशिकमिति परिभाष्यते तथा सति विश्वजिद्यागस्य स्वर्गफलसाधनत्वं नौपदेशिकं स्यात्। विधिपरिकल्पितविशिष्टनियो-

ज्ञसम्बन्धकल्पितत्वात् । तस्मान्नोपकारस्योपदेशः सहवै तु पदार्थैरुपकारस्यातिदेश एव प्रमाणम् । तद्भावो ह्यतिदेशः । तेन यत्साक्षात्प्रणाल्या वा प्राप्यते तदातिदेशिकं तन्निरपेक्षमेव तु ग्रन्थसंदर्भमात्रेण श्रुत्यर्थाभ्यां प्रमितमौपदेशिकमिति विवेकः । यदप्युच्यते उपदिष्टस्याप्युपकारस्यान्यदीयस्यान्यत्रातिदेशादतिदिष्टत्वमप्यस्ति तेनोपदेशातिदेशयोरेकत्रैव युगपत्सम्भवान्नैतो प्रतिपक्षभूतौ शब्दप्रमाणभेदौ अत एव नोपदेशातिदेशाश्रितौ षट्कौ किं तूपदेशकार्यान्वितौ कार्यमिति च पदार्थजन्यस्योपकारस्याभिधानं न नियोगस्य । अत एवोपादानाभिधानो विध्याक्षेपः पूर्वषट्के चिन्तितः विध्याक्षेप्यत्वादुत्पत्त्यादीनाम् । तन्त्रावापादि तु प्रकृतावप्युपकारप्रमेयमित्युत्तरषट्के निरूपितम् । अन्यथा ऽतिदेशविषयत्वे सति प्रयाजादीनामाग्नेयादिषु तन्त्रेणावृत्त्या वा ऽनुष्ठानमित्यादिविचारो नात्र संबध्येत तस्मान्नोपदेशातिदेशाश्रितं षट्कद्वयमपि तूपदेशकार्याश्रितमिति । तदप्युपकारस्योक्तेन न्यायेनौपदेशिकत्वासम्भवान्निरस्तम् । तथा हि उपदेशातिदेशावेव प्रमाणे तदाश्रितं च षट्कद्वयं भवति तथा सति कथमुपदिष्टार्थविषया तन्त्रावापादिचिन्ता । अन्यथा वा कथं सप्तमाष्टमयोर्वचननामधेयचोदनालिङ्गैरुपकारस्योपदेशप्रमेयस्य चिन्ता । सा हि विध्याक्षेपविषयत्वाच्चातुर्थिकी स्यात् पदार्थप्राप्तिसिद्ध्यर्थमिति ब्रूमः न ह्यसत्यामुपकारस्य प्राप्तौ तद्वशेन पदार्थानां प्राप्तिर्वर्णयितुं शक्यते । तेनोपोद्घातस्तद्विचारः पारिप्लवत्वनिराकरणवदिति । अस्मत्पक्षे ऽपि प्रासङ्गिकस्तन्त्रावापादिविचारः । दशमे हि पदार्थैयत्तायां निरूपितायां परिमाणप्रसङ्गेन तन्त्रावापप्रसङ्गाः प्रयोगपरिमाणरूपाश्चिन्त्यन्ते । उपदिष्टातिदिष्टपदार्थसाधारण्याच्च उभयोत्तरकालमेव तन्त्राद्यारम्भः । यद्यपि प्रयोगविशेषविचारात्मकत्वाच्चतुर्थपञ्चमसमीपे

ऽप्यारम्भसम्भवः तथा ऽपि परिमाणविचारात्मकत्वादत्राप्यारम्भः सम्भवतीति पर्यनुयोगाविशेषादत्राप्यारम्भः । यथा भवन्मते कार्यपदार्थयोरुपदेशकार्यप्रमेयत्वादुभयविचारात्मकयोस्सप्तमाष्टमयोरन्यतरांशेन चतुर्थोत्तरषट्कान्तर्भावादन्यतरत्रारम्भे कर्त्तव्ये सत्वविशेषादुत्तरषट्क एवारम्भः तथा ऽस्माकमपि तन्त्रादेरिति न दोषः । यच्चोपकारप्राप्तेः पश्चात्पदार्थाङ्गीकरणं तदपि व्यर्थं विशिष्टोपकारप्राप्त्यैवार्थात्पदार्थप्राप्तेः । न चेह सामान्यशास्त्रात्परतो विशेषशास्त्राणि कल्प्यन्ते । सर्वपदार्थसाधारणोपकारशास्त्रतः पश्चान्न पदार्थविशेषाणां शास्त्राणि सम्भवन्तीति । तत्सिद्धं कार्यद्वारेण पदार्थानां प्राप्तौ कार्याभावे बाध इति । एवं च यद्वचनप्राप्तस्य बाधो न युक्त इति तत्परिहृतं वचनस्यैव कार्यद्वारेण पदार्थान् प्रापयतस्तदभावे प्रापकत्वव्याघातात् । एतादृशं हि वचनं यथा ऽऽग्नेय उपकृतस्तथा सौर्यो ऽपीति । किं तद्येनोपकर्त्तव्यं समिदाद्यवान्तरकार्यम् । तदपि तैरेव समिदादिभिर्यथाप्रकृत्येव जनयितव्यमिति । एवं च सामान्यतः प्राप्तिमवगम्य तदनन्तरं पदार्थान्स्वरूपेणालोचयति अनेन कथमुपकृतमनेन कथमुपकृतमिति । तत्रावघातस्य दृष्टप्रयोजनद्वारेणोपकारकत्वं प्रकृतावालोच्य कृष्णलेषु तथाभावासम्भवात् पूर्वसंजातस्य सामान्यज्ञानस्य बाधं मन्यते । एवं प्रत्याम्नाने ऽपि कार्यद्वारेण पदार्थेषु प्राप्यमाणेषु बर्हिःकार्ये हविरासादने पूर्वं प्राप्तेः तत्साधनापेक्षायां यावच्चोदकेन कुशा न प्राप्यन्ते तावदेव प्रत्यक्षेण वाक्येन तदुद्देशेन शराणां विधानात्कुशबाधः । तथा प्रतिषेधे सामान्यरूपस्य चोदकस्य विषयविशेषादुत्कालनं "नार्षेयं वृणीतइति" । तस्माल्लुप्तार्थप्रत्याम्नातप्रतिषिद्धाङ्गेभ्यस्समुत्काल्यान्याङ्गेष्वेव चोदको व्यवस्थाप्यतइति सिद्धो बाधः ।

लुप्तार्थस्यापि हन्त्यादेः कृष्णलादिषु शेषता ।
अस्ति नास्ति त्वनुष्ठानमिति केचित्प्रचक्षते ॥४॥
प्राप्तबाधत्वसिद्ध्यर्थमन्यथा तन्न सिद्ध्यति ।
प्राप्तौ निवार्यमाणायां श्रुतिलिङ्गादिवद्भवेत् ॥५॥

तार्त्तीयो ह्यप्राप्तबाधः दाशमिकस्तु प्राप्तबाध इति स्थितिः। तत्र यदि चोदक एव लुप्तार्थानां नाश्रीयेत ततो हन्त्यादीनां प्राप्त्यभावात्प्राप्तबाधवाचोयुक्तिरयुक्ता स्यात् । श्रुतिलिङ्गादि-वदप्राप्तबाध एव स्यात् । तस्माच्चोदकेन सर्वमेव प्राकृतमङ्गजातं प्राप्यते सत्यामेव तु प्राप्तौ कृष्णलादिषु हन्त्यादेः प्रयोजना-भावादननुष्ठानलक्षणो बाधो भवति । तथा शरमयं बर्हिरित्य-त्रापि चोदकावगताबाधिताङ्गभावानां दर्भाणां प्रत्यक्षावगतशर-निराकाङ्क्षेण प्रयोगवचनेनानुपसंग्रहात्तल्लक्षण एव बाधः । तथा नार्षेयं वृणीतइत्यत्रापि प्रतिषेधस्यैव प्रयोगाविधिसंग्रहाद्वरणस्य प्राप्तस्याप्यशक्यत्वादननुष्ठानम् । तस्मान्न कुतश्चिदपि चोदको निवार्यतइति सर्वमेव तेन प्रापितमपि प्रयोगविधिसंग्रहाभावा-द्बाध्यतइत्युच्यते । युक्तं चैतत् । न हि प्रतिस्वं पदार्थानां चोदको ऽस्ति यदेकवर्जमितरत्प्राप्यते । उपकारसूत्रे हि प्राकृतं पदार्थरत्नजातं प्रोतं सर्वमेव तस्मिन्नाकृष्यमाणे समाकृष्यते तद-नाकर्षणे वा न किं चिदपि । तदुक्तम् । तद्वर्जं तु वचनप्राप्तेः चोदनार्थकार्त्स्न्यादिति । किमिदानीं प्रमत्तगीतमिदं भाष्यं नास्ति लुप्तार्थानां चोदकवचनमिति । तस्मान्न लुप्तप्राकृतप्रयोजनं चोदकश्चोदयतीति च । तथा बाधो नाम यदेवमिदमिति विज्ञानं निश्चितं कारणान्तरेण मिथ्येति विकल्प्यतइति च । नेति ब्रूमः । मिथ्यात्वं तावदनुष्ठानाभिप्रायं व्यवहारविसंवादादेव हि सर्व-संविदां मिथ्यात्वं न त्वयाथार्थ्यात् । न ह्ययथार्थं नाम संवेदनं

सम्भवतीत्युक्तम् । यत्प्रत्यक्षं न तद्व्यभिचरति यद्व्यभिचरति न तत्प्रत्यक्षमित्यत्र शुक्तिकारजतादिष्वग्रहणाभिधानात् । तद्वदेव तर्ह्यग्रहणमस्तु । न । ग्रहणकारणसद्भावात् । युक्तं हि चक्षुरादीनां प्राप्यकारित्वादसन्निहितरजतप्राप्त्यसंभवादग्रहणम् । अत्र तु चोदकस्य ग्रहणकारणस्य सम्भवान्नाग्रहणसम्भवः । कथं तर्हि बाधः । उक्तं व्यवहारविसंवादादिति । तदेव तु न युक्तमिति पश्यामः । अग्रहणनिबन्धनो हि व्यवहारो ग्रहणेनाग्रहणे निवृत्ते परावर्त्तेतइति युक्तं ग्रहणे तु सति कस्तन्निबन्धनं व्यवहारं परावर्त्तयेत् । उच्यते । अङ्गत्वमात्रं चोदकेनावगम्यते न च तावन्मात्रेणानुष्ठानम् । प्रयोगविध्युपसंग्रहनिमित्तत्वाच्चस्य तेन च लुप्तार्थानामनुपसंग्रहाद्भवत्येवात्रापि व्यवहारविसंवादः ।

अन्यथा ज्ञानमप्यत्र चोदकान्नोपजायते ।
दुष्टकारणजं तत्स्याददुष्टश्चेह चोदकः ॥ ६ ॥

येषामप्ययथार्थं विज्ञानं मृगतोयादिविषयमुत्पन्नमेव ज्ञानान्तरेणार्थतत्त्वोपदर्शनेन मिथ्या क्रियतइति मतं तेऽपि मिथ्याज्ञानस्य दुष्टकारणजत्वाच्चोदकस्यादुष्टत्वाच्चज्जनितं यत्पदार्थप्राप्तिज्ञानम् ।

नार्थलोपादिना तस्य मिथ्यात्वं वदितुं क्षमाः ।
अननुष्ठानमेवात्र बाधोऽङ्गानां सतामपि ॥ ७ ॥

तेन चोदकप्राप्तानामपि तत्फलस्यानुष्ठानस्याभावान्नास्ति चोदकवचनं न चोदकश्चोदयतीति च फलद्वारेण व्याख्यातमिति । अत्र ब्रूमः ।

चोदकेन पदार्थानां विकृतौ संगतिः कथम् ।
किं कार्यनिरपेक्षाणां तद्द्वारेणाथ वा भवेत् ॥ ८ ॥

संगतौ निरपेक्षाणां कल्पयित्वा प्रयोजनम् ।
प्रकृतौ वा प्रयोगः स्याद्विकृतौ बाधनं कुतः ॥ ९ ॥
बाधो ऽधिकरणस्य स्यात्तादृशी संगतिर्यदि ।
कार्यद्वारेण चेत्प्राप्तिस्तल्लोपे वा कथं भवेत् ॥ १० ॥

यो हि चोदकप्राप्तानामबाधिताङ्गभावानामेवाङ्गानामननुष्ठानं बाधमातिष्ठते स विकल्प्य प्रष्टव्यः किं प्राकृतकार्यनिरपेक्षस्यैव हन्त्यादेः कृष्णलादिषु चोदकेनाङ्गत्वप्राप्तिः अथ वा तद्द्वारेणेति। स चेद्ब्रूयात्तन्नैरपेक्ष्येणैव विकृत्या संगतिरिति । प्रतिब्रूयादेनम्। तथा सति चोदकावगताङ्गभावानां तदुपपत्त्यर्थं दृष्टमदृष्टं वा प्रयोजनं परिकल्प्य प्रकृताविव विकृतावपि कृष्णलादौ हन्त्यादीनां प्रयोगात् नाननुष्ठानलक्षणबाधसिद्धिः । दशमाद्याधिकरणबाधश्च कार्यनिरपेक्षाणां प्राप्तौ प्रसज्येत । स चेदेतद्दोषपरिहारार्थं द्वितीयं पक्षमवलम्ब्य ब्रूयात्कार्यद्वारेणैवाङ्गानां प्राप्तिर्न स्वतन्त्राणामिति प्रतिब्रूयादेनं न तर्हि कृष्णलेषु हन्तेः प्राप्तिः संभवति द्वाराभावात् यत्र हि यस्य द्वारं नास्ति स तत्र तेनैव द्वारेण प्रविशतीति कुत एतत् । नो खल्वार्द्रतया ज्वलनमकुर्वन्ति काष्ठानि तद्द्वारेणौदनसिद्धेस्साधनभावमनुभवितुं प्रभवन्ति । तत्र प्राकृतेन द्वारेण कृष्णलापूर्वस्य हन्तिरङ्गमिति वचनमशक्यार्थविधित्वादप्रमाणं स्यादिति । तत्रैतत्स्यात् ।

उपकारस्तु सर्वाङ्गजन्यः पूर्वं प्रादिश्यते ।
ततो ऽवान्तरकार्याणां नाङ्गानामतिदेशनम् ॥ ११ ॥

न ब्रूमः कार्यानपेक्षः पदार्थातिदेश इति सर्वाङ्गजन्य उपकारः पूर्वमतिदिश्यतएव तदनन्तरं तु नावान्तरकार्याणामतिदेशः । किं त्वङ्गानामेव स चोपकारः कृष्णलेष्वपि विद्यतएव

तत्सिद्ध्युपायत्वेनैव पदार्थानामतिदेशाभ्यासप्राप्तिः। एवमुप-कारपृष्ठेन पदार्थानामङ्गभावे ऽपूर्वं प्रत्यवगते तदुपकारजनकत्वं तेषां प्रकृतावेव ज्ञातप्रकारमिति न प्रकारान्तरकल्पनावसरः। न चावघातस्यात्र तथा तज्जनकत्वं सम्भवतीत्यननुष्ठानम्। तस्मादुभयमप्युपपन्नं प्राप्तिरनुष्ठानं चेति। अधिकरणमप्युपका-रानपेक्षपदार्थप्राप्त्यनभ्युपगमादक्षतमिति॥

तदेतदपि पूर्वोक्तदूषणं नातिवर्त्तते।
शेषभावे प्रतीते हि द्वारकार्यानपेक्षया॥ १२॥
प्राकृतस्योपकारस्य प्रकारान्तरमास्थितः।
हन्त्यादिहेतुतां गच्छेदपूर्वाङ्गवदेव नः॥ १३॥

यद्यपि परमोपकारपुरस्सर एवाङ्गानामतिदेशः तथा ऽप्य-वान्तरकार्यनिरपेक्षाणामेवाङ्गभावावगमात्तस्य च करणोपकार-साधनमन्तरेणाघटनात्तस्य च प्रकृत्यवगतेन मार्गेणासम्भवात्प्र-कारान्तरेणापि तत्साधनत्वमवघातादीनामपूर्वाणामिवामनहोमा-दीनामङ्गानां परिकल्प्यानुष्ठानं स्यात्। किं च उपकारजन-कापेक्षया ऽपि पदार्थानां पृथगतिदेशं भवानिच्छति तेषां च न प्रथममुपकारेणान्वयः न ह्युपकाराभिधायी शब्दो ऽस्ति यः पदार्थैरन्वितमुपकारमभिदध्यात्। न च पदार्थवाचिनो ऽपि शब्दा विकृतौ सन्ति ये पदार्थानुपकारान्वितानभिदध्युः। तेनापूर्वस्यैव स्वशब्देन पदार्थप्रयोजनतया ऽन्वितस्याभिधाना-त्तत्सिद्धये कल्पयित्वा ऽपि द्वारमनुष्ठानं स्यात्। एवं च यद्य-प्युपकारानन्तरमवान्तरकार्याणि ततः पदार्थाः प्राप्यन्ते तथा ऽपि तेषामशब्दतया मिथस्सम्बन्धाभावादपूर्वेणैव तादर्थ्यान्व-यात्तत्सद्धाराणामपि तत्कल्पनया स्यादेवानुष्ठानम्। यद्युच्येत

नावश्यंभाव्युपकारसाधनत्वमङ्गानां तेनोपकारसाधनत्वं न कल्पयितव्यमिति । प्रकृतौ तर्हि कथमुपकारकल्पना । अपेक्षितत्वात् । प्रधानस्य ह्युपकारापेक्षा तेन प्रकृतौ शेषाणां तज्जनकत्वं कल्प्यते । विकृतौ त्वलुप्तार्थाङ्गजातजनितेनैवोपकारेण प्रधानस्य नैराकाङ्क्ष्यान्नास्त्युपकारकत्वपरिकल्पनं लुप्तार्थानामिति । नैतत्सारम् । न ह्यनुपकारिणामप्यङ्गत्वे सत्येव प्रधानापेक्षानिबन्धनं तज्जनकत्वपरिकल्पनं तर्हि लब्धप्राकृतोपकारासु विकृतिषु तदपेक्षाभावादपूर्वाणामपि आमनहोमादीनामवघातादिवत्तज्जनकत्वपरिकल्पनाहेत्वभावादनुपकारकत्वेन नानुष्ठानं सिद्ध्येत् । अथ तेषां वचनानर्थक्यभयादनुष्ठानं चोदकस्य तु नानर्थक्यमङ्गान्तरेष्वपि कृतार्थत्वादित्युच्यते तदयुक्तम् । अत्राप्यानर्थक्यात् । न हि सर्वपदार्थसाधारणोपकारप्राप्त्यैवार्थात्पदार्थप्राप्तिरभिमता पुनरपि शास्त्रेणैव पदार्थानां विधेरिष्टत्वात्तेषां च सामान्यरूपाभावात्प्रत्येकमतिदेशादवघातस्यापि शास्त्रमननुष्ठानेऽनर्थकं स्यात् । अतस्तस्यानतिदेशो वा ऽनुष्ठानं वा नान्या गतिरस्ति । काममनर्थकं भवतु नैतावता ऽनवगतो ऽर्थः शक्यते कल्पयितुं न ह्यत्र किंचिदुपकारजनकत्वे प्रमाणमस्ति । नन्वङ्गत्वानुपपत्तिरेव प्रमाणं न ह्यनुपकारिणस्तद्भवति हन्तेस्तु प्रकृतिवद्वचनादन्यथोपकारकत्वं न सम्भवति ।[1] तस्मादननुष्ठानमिति चेत् तदुक्तोत्तरम् । प्रकृतिवदङ्गत्वमवघातस्य कृष्णलेषु विदधद्वचनमप्रमाणं स्यादिति । किं च प्राप्तबाधे कुशानामलुप्तार्थानां किमित्यनुष्ठानं प्रत्याम्नानादिति चेत् न । तेनाप्यङ्गत्वानवलोपात् तेनाबाधिताङ्गभावयोः कुशशरयोर्विकल्पेनानुष्ठानमैकार्थ्यात्स्यान्न बाधः । नन्वतुल्यबलयोरुपदेशातिदेशयोः

---

१ तथोपकारकत्वं चार्थलोपान्न संभवति इत्यधिकः २ पु. पाठः ।

कथं विकल्पः । किं वोपदेशेनातिदेशो बाध्यतामित्युच्यते । ओमिति चेत् । न तर्हि कुशानामङ्गत्वमस्ति तत्प्रमाणस्यातिदेशस्य बाधितत्वात् । अथ नातिदेशस्य बाधो नापि विकल्पः । अथ किं समुच्चयः सो ऽपि न । ऐकार्थ्यात् । कथं तर्ह्युक्तं प्रयोगवचनेनानुपसंग्रहादननुष्ठानामिति । तदेव तु न युक्तमङ्गत्वाबाधादिति ब्रूमः । कः खल्वङ्गभूतयोरुपकारसाधनयोः कुशशरयोर्विशेषः येन द्वितीयस्यामिव शरेषु कापुरुषस्य विधेरनुरागो भवेत् । अयमस्ति विशेषः शराणां प्रत्यक्षवचनं प्रमाणम् इतरेषामनुमानमिति । नायं विशेषः प्रत्यक्षेणाप्यनुमानस्याबाधितत्वात् । प्रमाणयोर्हि प्राबल्यदौर्बल्याभ्यामन्यतरस्य प्रमेयापहारान्मिथ्यात्वं भवति प्रमेयानपहारे तु द्वयोरप्यर्थयोः कार्यसाधनत्वाविशेषादविशिष्टं कार्यनिमित्तमनुष्ठानमिति । विधिर्हि साध्यभूतः साधनेष्वनुष्ठानमाक्षिपति साधनत्वं च द्वयोरपि कुशशरयोरङ्गत्वाविशेषाद् द्वारसंभवाच्चाविशिष्टमिति नानुष्ठानाक्षेपे कश्चिद्विशेषः । तस्मादुभयस्यानुष्ठानान्नास्त्यननुष्ठानलक्षणो बाधः । तथा नार्थेयं वृणीतइत्यत्र प्रतिषेधपक्षे विकल्पमभ्युपेत्य तत्परिहाराय पर्युदास एव चोदकस्याश्रितः । यद्युच्यते ऽनारभ्य विधेः सामान्यरूपस्योपदेशात्मकस्य तत्र पर्युदासो ऽभिहितः नातिदेशस्येति । कथं तर्हि प्रदेशग्रहणम् । न्यायविरोधादनादरणीयमिति चेत् । अहो बत महामोहसमाश्रयणं भवतः यदात्मीयमज्ञानमृषावारोपयति न ह्यङ्गत्वाबाधे सत्युपदिष्टमतिदिष्टमित्यनेन कश्चिद्विशेष इत्युक्तम् । यदि चानपहृतयोरपि प्रमेययोरिदं प्रबलप्रमितमिदं दुर्बलप्रमितमित्यनेन विशेषेणानुष्ठानाननुष्ठाने भवतः ततो दूराद्वह्निमध्यक्षयन्नाराच्चानुमिमानो ऽनुमितं हित्वा पाकार्थी दूरस्थमुपधावेत् । तथा यजतिषु येयजामहं करोतीत्यस्य सामान्यविधेर्नानुयाजेषु येयजामहं करो-

तीत्यतो विशेषप्रतिषेधादाहवनीयशास्त्रस्येव विशेषशास्त्रात्पदविधायिनो दुर्बलत्वात्प्रतिषेधे सत्यप्यननुष्ठानं येयजामहस्यानुयाजेषु शक्यते वक्तुमित्यनर्थकं पर्युदासप्रतिपादनं स्यात् । तस्मान्न कथं चिदपि प्राप्त्यबाधे सत्यननुष्ठानं संभवतीति प्राप्तिरेव बाधयितव्या । यत्त्वेवं सति प्राप्तबाधाभिधानमनुपपन्नं तार्त्तीयदाशमिकयोरविशेषादिति । अत्राभिधीयते ।

साधारणस्य शास्त्रस्य विशेषविषयादिना ।
संकोचः क्लृप्तरूपस्य प्राप्तबाधो ऽभिधीयते ॥१४॥
कल्प्यस्य शास्त्रस्य तु कल्पनं यन्निरुध्यते मूलनिकृन्तनेन ।
क्लृप्तेन शीघ्रेण फलापहारादप्राप्तबाधं तमुदाहरन्ति॥१५॥

यत्र क्लृप्तस्यैव शास्त्रस्य सामान्यद्वारेण विशेषानुपसर्पतः क चिद्विशेषयागा[1]दिना प्राप्तिरपोद्यते तत्र प्राप्तबाधः । यथा प्राकृतवैकृतसामान्यविशेषनित्यनैमित्तिकक्रत्वर्थपुरुषार्थपौर्वापर्याल्पभूयस्त्वसावकाशनिरवकाशाङ्गप्रधानतद्धर्म्मबाधेषु । प्राकृता हि धर्म्मा न प्रातिस्विकेन रूपेण चोदकेन विकृतौ प्राप्यन्ते इदमिदं कर्त्तव्यमिति । कथं तर्हि यथा प्रकृता स्वकार्यं साधितं तथा विकृता ऽपीति । तथाभावश्च तैरेव पदार्थैस्तथा संबध्यमानैः संपादयितुं शक्यते नान्यथेति । तेषां तत्साधनत्वसामान्यरूपेण प्राप्तिरविशेषेण प्रतीयते । सेयं प्रतीतिरविशेषेणोपजाता सती पश्चात्तत्तत्पदार्थविशेषनिरूपणावसरे हन्त्यादेस्तथा साधनभावासम्भवपर्यालोचनेन भ्रान्तीक्रियते । न चैतावता शास्त्रस्याप्रामाण्यं तस्य विषयविशेषपरिशेषमात्रपरिकल्पनात् । विशेषादर्शनेन हि सामान्यमात्रालोचनात्सर्वविषयत्वं शास्त्रस्य भ्रान्त्या ऽवगम्यते । तद्दर्शनात्तु नायमस्य विषयो ऽन्यविषयमेव

१ विशेषविषयादिनेति २ पु. पा. ।

तु शास्त्रं सामान्यमात्रपर्यालोचनादोषादेतद्विषयत्वेन भ्रान्त्या ऽध्यवसितमिति मन्यते तेनार्थलोपात्प्रत्याम्नानात्प्रतिषेधाच्च चोदकसंकोचः। तथा आहवनीयविधायिनः सामान्यशास्त्रस्य पदविधायिना विशेषशास्त्रेण होमान्तरविषयत्वकल्पनम्। पाञ्चदश्यस्य नित्यस्याविशेषविहितस्य वैश्यविषयेण नैमित्तिकेन साप्तदश्येन वर्णान्तरविषयत्वम्। साप्तदश्यस्यापि क्रत्वर्थस्य पुरुषार्थेनैकविंशाद्यनुवचनेन प्रतिष्ठाकामव्यतिरिक्तवैश्यविषयत्वम्। न चात्र सामान्यविशेषभाव उभयोरपि सामान्यत्वात्। एकविंशत्यनुवचनं हि प्रतिष्ठाकामवर्णत्रयसाधारणं साप्तदश्यमपि प्रतिष्ठाकामातत्कामवैश्यसाधारणं प्रतिष्ठाकामे तु वैश्ये द्वयोस्सन्निपाते सति पुरुषार्थानुवचनेन क्रत्वर्थस्य प्रत्यासन्नफलेनान्याहशस्य बाधः। तथा पौर्वापर्ये ऽपि चोद्गातृप्रतिहर्त्रपच्छेदयोः सामान्यविशेषभेदाभावात्पौर्वापर्य्यवशादेव मिथो बाधः। तत्रैवं शास्त्रार्थो भवति पश्चाद्भाव्युद्गात्रपच्छेदविधुरप्रतिहर्त्रपच्छेदवतः क्रतोः सर्ववेदसदानमङ्गमिति एवमुद्गात्रपच्छेदे ऽपि द्रष्टव्यम्। तथा पञ्चदशरात्रे प्रथमे ऽहन्यग्निष्टुन्नामधेये एकाहाग्निष्टुद्धर्म्मेषु प्राप्तेषु सुब्रह्मण्या ऽऽग्नेयी प्राप्ता उत्तरेषां चतुर्दशानामन्हामैन्द्री तत्राल्पवैगुण्येनापि गतौ सत्यां भूयोवैगुण्यमन्याय्यमिति भूयस्त्वेन प्रथमावगता ऽप्याग्नेयी बाध्यते। तेनाग्निष्टुन्नामधेयं सुब्रह्मण्याग्नेयीव्यतिरिक्ताङ्गातिदेशपरं भवति। तथा यत्किं चित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्तीत्यस्य यावत्या वाचा कामयेत तावत्या वाचा दीक्षणीयायामनुब्रूयादित्यनेन दीक्षणीयादिप्रधानेषु स्वरान्तरविधानादन्यविषयत्वम्। न चास्य सामान्यात्मता यत्किंचिच्छब्दस्य प्रकृतविशेषाभिधायित्वात्। तेन सावकाशनिरवकाशत्वेनात्र बाधः। तथोपांशु यजुषेति विहितं यजुरङ्गमुपांशुत्वं निगदेषु प्रधानभूतपर-

प्रत्यायनकार्यविरोधाद्बाध्यते तेन यजुःषूपांशुत्वविधानं निगद-व्यतिरिक्तयजुर्विषयं भवति । तथा य इष्ट्या पशुना सोमेन वा यजेत सो ऽमावास्यायां पौर्णमास्यां वेत्यनेनेष्टिषु पशौ सोमे च पर्वणि प्राप्ते सत्येकादिदीक्षापक्षे सुत्यादीक्षणीययोरुभयोरपि पर्वसंपादनासंभवादन्यतरस्य बाधे कर्त्तव्ये सति प्रधानस्यावै-गुण्याद्दीक्षणीयायां पर्वबाधः तेनेष्टिषु पर्वविधानं प्रधानकाला-विरोधिविषयं भवति । तदेवं सर्वत्र विद्यमानस्य प्रापकस्य शास्त्रस्याविशेषेण प्रापकत्वे प्राप्ते क चिद्विशेषे यः प्रापकत्वाप-वादः स प्राप्तबाधः । यत्र तु कल्पनीयस्यालब्धात्मकस्य शास्त्रस्य कल्पनाभिमुखस्य शीघ्रेण तद्विषयापहारात्कल्पनामूलं निकृत्य तन्निरोधः क्रियते तत्राप्राप्तबाधो यथा श्रुतिलिङ्गादिषु । न ह्यैन्द्र्येन्द्रमुपतिष्ठतइति शास्त्रमस्ति यस्य प्राप्तस्यैन्द्र्या गार्हप-त्यमुपतिष्ठतइत्यनेन बाधः स्यान्न हि लिङ्गमात्रं स्वत एव प्रमाणं तत्कल्पिता तु श्रुतिरत्र प्रमाणं तत्कल्पनायामपि न तन्मात्रं प्रमाणं किं तु ।

मन्त्राकाङ्क्षासनाथं तत्प्रमाणं श्रुतिकल्पने ।
तां चान्यत्र नियोगेन प्रत्यक्षा कृन्तति श्रुतिः ॥ १६ ॥

तेन प्रत्यक्षेण शास्त्रेण साकाङ्क्षमन्त्रलिङ्गकल्प्यश्रुतिविषयं मन्त्रमपहृत्य गार्हपत्योपस्थाने विनियुज्य मन्त्रं निराकाङ्क्षीकुर्वता कल्पनामूलभूता ऽऽकाङ्क्षा निराकृतेति न तदधीनात्मलाभा श्रुतिरुन्मज्जितुं क्षमते । एवमन्यत्राप्यप्राप्तबाधो द्रष्टव्यः । तदु-पपन्नः प्राप्ताप्राप्तबाधविवेकः । प्रत्युतैकदेशिमतएव प्राप्तबाधा-नुपपत्तिः । न हि तस्य किं चित्प्राप्तं बाध्यते अङ्गत्वं हि प्राप्तं न तद्बाध्यते यत्त्वनुष्ठानं बाध्यते न तत्प्राप्तमिति न प्राप्तबाध-संभवस्तस्माद्यथोक्तमेव न्याय्यम् । यत्तु कृत्स्नप्रापी चोदको न किं चिद्वर्जयितुमर्हतीति । सत्यमयमेवास्य स्वभावः स तु स्व-

भावः प्रबलेन हेतुना प्रतिबध्यते सामान्यशास्त्रस्येव विशेषशास्त्रेण तद्वर्जन्तु वचनप्रामेर्न चोदकार्थकार्त्स्न्यादिस्त्यपि स्वभावत एव कतिपयविषयत्वमाशङ्क्य निराकृतमिति वेदितव्यम् । यद्यपि चात्र न कारणदोषेण मिथ्यात्वं सामान्यशास्त्रज्ञानस्योपलक्षयितुं शक्यते तथा ऽपि बाधकेन प्रत्ययान्तरेण तदुपलक्षणं भवति द्वयमपि हि तदुपलक्षणत्वेनोक्तं "यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः सो ऽसमीचीनः प्रत्यय" इति । तत्र वैदिकेषु सम्भवात् बाधकप्रत्यय एव तदुपलक्षणं न करणदोषज्ञानमसम्भवात् । आह च । "यत्तु कारणदोषज्ञानं द्वितीयमुपलक्षणमुक्तं तल्लोकविषयत्वान्न वेदे सम्भवतीति नोपन्यस्तमि"ति । कथं पुनरदुष्टेन करणेन मिथ्याज्ञानं जन्यते न हि बाधकेन मिथ्याज्ञानं जायते जातस्य तु मिथ्यासतस्तत्त्वमसौ ज्ञापयति । तज्जन्म तु कारणदोषादेव । सत्यमेव तत् । अत्रापि हि कारणदोषो विद्यतएव यद्यप्यसावपौरुषेयस्य वेदस्य न स्वगतः कश्चिद्दोषो विद्यते तथा ऽपि प्रतिपत्तुरेव सामान्यापहृतबुद्धित्वादपवादानिरूपणाच्च न्यायाभासेभ्यः प्रसरन्मिथ्याज्ञानं जायते । अत एव सम्यक् न्यायनिरूपणार्थं मीमांसाशास्त्रमर्थवद्भवति न चायं दोषो बाधकात्प्रागङ्गुल्यवष्टम्भादिव निरूपयितुं शक्यतइति बाधकैकोपलक्षणीयत्वं मिथ्यात्वस्याभिहितमिति सर्वमवदातम् । तत्सिद्धं यदेवमिदमिति निश्चितं ज्ञानं कारणान्तरेण मिथ्येति कथ्यते नास्ति लुप्तार्थानां चोदकवचनम् । लुप्तप्राकृतप्रयोजनं न चोदकश्चोदयतीत्यादिभाष्याविनाशात् । अपि तु वाक्यशेषः स्यादिति च सूत्राविनाशाल्लुप्तार्थप्रत्याम्नातप्रतिषिद्धेभ्यो ऽङ्गेभ्यश्चोदकस्य समुत्कालनम् ।

कृष्णलादिषु हन्त्यादेरनङ्गत्वं तथा क्रिया ।
नियमादृष्टसिद्धिस्तु नियमान्न स्वरूपतः ॥१७॥

तत्रैतत्स्यात् । यद्यपि कृष्णलेषु हन्तिर्दृष्टार्थं न प्राप्यते तथा ऽपि नियमादृष्टसिद्ध्यर्थं किन्न प्राप्यतइति । तन्न । तत्र तस्यासम्भवात् । एवं हि तत्कल्प्यते अवघातेनैव निष्पाद्यमानास्तण्डुला अपूर्वं साधयन्तीति न चैवमिह सम्भवतीति । अप्रयोजकत्वाच्च । न ह्यवघातस्य नियमादृष्टं प्रयोजकं दृष्टप्रयोजनेनैव तावत्स्वरूपे प्राप्ते नियममात्रं तेन प्रयुज्यते । तेन यद्यपि चरुषु पेषणमप्रतिषिद्धं पिष्टस्यापि चरुत्वाविघातात् तथा ऽपि प्रयोजनाभावात्पेषणस्वरूपस्याप्राप्तेस्तदधीनत्वाच्च नियमप्रयुक्तेरननुष्ठानम् । सत्यपि च प्रयोजने प्रयोजकाभावात्पुरोडाशकपालादेश्चर्वादिषु बाध इति । एतेन चित्रेष्ट्यां तण्डुलेषु प्राकृतस्य व्रीहियवप्रकृतिद्रव्यनियमस्य बाधो व्याख्यातः । तथा हि ।

प्राप्ते प्रकृत्युपादाने नियमो ऽत्र विधीयते ।
लौकिका एव तु ग्राह्यास्तण्डुलाः प्रकृतिर्न तु ॥१८॥

न हि प्रकृतौ व्रैहेयेण हविषा यजेतेति शास्त्रमस्ति यदतिदेशात्तण्डुलानामपि तन्मयत्वं स्यात् । यागं प्रति व्रीहिभिर्यजेतेति व्रीहीणां करणत्वं श्रूयते कर्तृव्यापारगोचरश्च करणं भवति । यथा ऽऽहुः ।

"करणं खलु सर्वत्र कर्तृव्यापारगोचर" इति ।

तेन व्रीहीनुपादाय तैर्यष्टव्यमिति । करणत्वं च तेषामुत्पत्तिशिष्टपुरोडाशावरुद्धे यागे तत्प्रकृतित्वेन सम्भवतीत्येष शास्त्रार्थो व्रीहीनुपादाय तैर्हविः संपाद्य यजेतेति । अत्र च हविः संपाद्य यजेतेत्यनूद्य व्रीहिभिरित्येतावन्मात्रं विधीयते । एवं च सत्यार्थिकं हविषस्तन्मयत्वं न श्रौतम् । न चैवं तण्डुलेषु संभवति न हि तत्र प्रकृत्युपादानेन हविस्संपादनीयं प्राप्तं यत् व्रीहिभिरिति नियम्येत लोकसिद्धानेव तण्डुलानुपादाय यष्टुं शक्य-

त्वात् । ननु प्रकृतावपि लौकिकमेव पुरोडाशमादाय यागस्य कर्त्तुं शक्यत्वात्कथं प्रकृत्युपादानेन हविस्संपादनप्राप्तिरिति चेत् । तदुच्यते ।

हविःश्रपणसाध्यं हि पुरोडाशाख्यमिष्यते ।

स्वयंकर्त्तृकता तस्य श्रपणस्य विधीयते ॥१९॥

पुरोडाशरूपं हि हविर्नान्तरेण श्रपणं सिध्यति तत्किं लौकिकमेवोपादेयं स्वयमेव वा प्रकृत्युपादानेन संपादयितव्यमिति यद्यप्युत्पत्तिवाक्यादनियमः प्राप्तः अष्टाकपालेन यजेतेत्यस्योभयथा ऽप्युपपत्तेस्तथा ऽपि कपालेषु श्रपयतीति वचनान्नान्येन श्रपितं गृह्णातीति स्वयंकर्त्तृकत्वमेव त्वस्य विधेयं सर्वमन्यदुत्पत्तिवाक्यसामर्थ्यसिद्धम् । कपालान्युत्पत्तिवाक्यसिद्धानि श्रपणमपि सामर्थ्यान्नाश्रपितस्य पुरोडाशत्वमस्तीति श्रपितद्रव्यविशेषवचनत्वात्पुरोडाशचर्वादिशब्दानाम् । ततः स्वयंकर्त्तृकतैवात्र विधेया । यथा ऽऽह भगवान् भाष्यकारः । "कपालेषु श्रपयतीति वचनान्नान्येन श्रपितं गृह्णातीति तद्बलेन प्रकृत्युपादानं प्राप्नोती"ति न ह्यन्यथा स्वयं श्रपयितुं शक्यते एवं प्रकृतिद्रव्योपादाने प्राप्ते किमवस्थं किंरूपं च द्रव्यमुपादेयमित्याकाङ्क्षायां व्रीहिशब्देन सतुषजातिविशेषवाचिना तन्नियमात्पिष्टतण्डुलावस्थयोर्नीवारादीनां च निवृत्तिः । यदि त्वनेनैव शास्त्रेण प्रकृतिमुपादाय हविस्संपादयेत्तच्च व्रीहिभिरिति विधीयते ततो गौरवम् । कपालेषु श्रपयतीति च विधेरानर्थक्यं सत्यां गतौ स्यात् तच्चान्याय्यं तेन यत्र श्रपणं तत्र तस्य स्वयंकर्त्तृकत्वं यत्र च तत्तत्र प्रकृत्युपादानप्राप्तिः यत्र चासौ तत्र व्रीहिनियमः । तण्डुलेषु तु श्रपणस्यार्थलोपान्निवृत्तिः । निवृत्ते च तस्मिंस्तत्र स्वयंकर्त्तृकत्वस्य कुतः प्राप्तिः कुतस्तरां च प्रकृत्यु-

पादानं कुतस्तमां च व्रीहिनियम इति न तेषु व्रीहिनियमसंभवः। नन्ववघातसामर्थ्यात्तण्डुलेष्वपि प्रकृत्युपादानं स्यात् । नेत्याह । न हि व्रीहीनवहन्तीत्येतदवघातस्य स्वयंकर्तृकत्वसिद्ध्यर्थमप्राप्तत्वाद्व्रीह्युद्देशेनावघातो विधीयतइति न तद्वशेन प्रकृतिद्रव्यप्राप्तिः शक्यते वदितुम् । न चासौ श्रपणवन्नियमेन प्राप्नोति यत्तदनुवादेन स्वयंकर्तृकता विधीयेत स्वयमेवावहन्यान्नान्येनावहतान् गृह्णीयादिति नखनिर्लुञ्चनादिभ्यो ऽपि वितुषीकरणसम्भवात् । एतेन पेषणं व्याख्यातम् । तस्यापि नियमेनाप्राप्तेः अवघातेनापि हि विक्लिन्नास्तण्डुलाश्चूर्णीभवन्ति । तदेवं क्रमः प्रथमं तावत्पुरोडाशो विनियुज्यते ततस्तस्य यथाकथंचिदुपादाने प्राप्ते श्रपणविधिवशात्प्रकृत्युपादानेन स्वयं संपादनं ततः प्रकृतिविशेषापेक्षायां व्रीहिभिर्यजेतेत्यनेनानन्तरतत्प्रकृतिपिष्टव्युदासेन पिष्टव्यवहिततण्डुलव्युदासेन व्यवहिततरनीवारादिव्युदासेन च व्रीहयो विधीयन्ते ततस्तैः कथं हविरुत्पाद्यमित्यपेक्षायामवघातपेषणादिविधानम् । तण्डुलेषु त्वर्थलोपात् श्रपणनिवृत्तौ तन्मूलप्रकृत्युपादानव्रीहिनियमावघातादीनां क्रमेण निवृत्तिरिति लोकसिद्धा एव यत्किंचिज्जातीयकावरकादिवर्जमुपादेयाः यत्र त्वपुरोडाशे ऽपि श्रपणेनार्थश्चरुधानामन्थलाजपृथुकयवाग्वादिषु तत्र भवत्येव व्रीहिनियमो ऽवघातादयश्च संस्कारा इति सूक्ष्ममिदं न्यायरत्नं भाष्यवार्त्तिकपरिचयोपचितचेतोलोचनसंस्कारैर्विवेक्तुं शक्यते न स्थूलदृष्टिभिरिति । श्लोकावप्यत्र वार्त्तिककारीया गायन्ति ।

"तण्डुलेभ्यो ऽर्थलोपेन श्रपणं चेन्निवर्त्तते ।
श्रपणस्य निवृत्तस्य स्वयंकर्तृकता कथम् ॥
तदधीनमुपादानं प्रकृतेः स्यात्कथंतराम् ।
तद्वशो व्रीहिनियमस्तदभावे कथंतमामि"ति ॥

तदेवं प्राकृतानामर्थलोपादिना बाधाद्वैकृतकार्यापत्तिशून्यानामामनहोमादीनामभ्युच्चयाभिधानाच्च प्रयोगेयत्ता दशमे चिन्तितेति ॥

इति श्रीन्यायरत्नमालायामङ्गनिर्णये चतुर्थः परिच्छेदः ॥४॥

एकादशे तु प्रयोगपरिमाणं तन्त्रावापद्वारेण चिन्त्यते। तन्त्रं नाम साधारणमङ्गाद्यनुष्ठानं यथाऽऽग्नेयादिषु प्रयाजादीनाम्। तत्र प्रथमं तावदाग्नेयादीनां फलतन्त्रत्वं प्रतिपाद्यते। किं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येतत्फलमाग्नेयादीनां तन्त्रमुत पृथगिति, किमन्योन्यनिरपेक्षाणां फलसाधनत्वमुत सहितानामित्यर्थः। यत्त्वत्र भाष्यकारेण पुरुषपरत्वादिनिराकरणं कृतं कामशब्दस्य तदिहासूत्रितमपि सूत्रितविचारोपोद्घातत्वेन भावार्थाधिकरणोपोद्घातभूतप्रतिपदाधिकरणवत्कृतमिति वेदितव्यम्। निमित्तपरत्वं तु प्रयोगे पुरुषश्रुतेरित्यत्र प्रसङ्गात्सूत्रकारेणैव निराकृतमिह भाष्यकारेण स्मारितम्। इदं च पुरुषपरत्वादिनिराकरणं स्वर्गकामाधिकरणस्याप्युपोद्घातत्वात्तत्रैवास्माभिरनागतप्रत्यवेक्षणेन प्रदर्शितम्। निमित्तपरत्वमप्यनाकाङ्क्षितत्वादयुक्तम्। आकाङ्क्षितत्वात्तु फलमेवानेन प्रतिपाद्यतइति युक्तम्।

पुरुषस्य नियोज्यस्य ये विदुः प्रतिपादनम्।
कामशब्देन भाष्येण तएतेन निराकृताः ॥१॥

कार्य्यस्य फलानपेक्षत्वात्तदपेक्षितो नियोज्य एव स्वर्गकामादिशब्दैः प्रतिपाद्यतइति ये मन्यन्ते तेषां पुरुषपरत्वनिराकरणपरभाष्यविरोधः न ह्यनेन कर्तृवचनत्वमेव निराक्रियते। ननु पुरुषस्यायं वक्तेत्यादिना पुरुषपरत्वमात्रनिराकरणात्।

निमित्तपरता चैवं श्रुत्यबाधात्प्रसज्यते।
लिङ्गबाधस्तथा हि स्यादन्यथा श्रुतिबाधनम् ॥२॥

यदि च नियोज्यपरः स्वर्गकामशब्दः स्यात्ततः स्वर्गकामनाविशिष्टस्य गृहादिदाहविशिष्टस्येव पुरुषस्य नियोज्यत्वात्तद्वदेव कामना निमित्तं स्यान्न फलत्वं स्वर्गस्य सिध्येत्।

स्यादेतत्। दाहादयो हि निष्पन्ना युक्तं यन्निमित्तीभवन्तीति स्वर्गस्त्वनिष्पन्नो न निमित्तं भवितुमर्हतीति फलतयैव नियोज्यविशेषणमिति । तन्न । अनिष्पन्नस्य निष्पन्ननियोज्यविशेषणत्वायोगान्न ह्यसति विशेषणे तद्विशिष्टस्य नियोज्यस्य सिद्धिरवकल्पते। असिद्धेन च कथं नियोगः साध्यते तेन तत्सिद्धिमङ्गीकुर्वता ऽवश्यमेव फलविषया कामना तद्विशेषणमभ्युपगन्तव्यं सा च सिद्धत्वाच्छक्नोत्येव परस्त्रीकामः प्रायश्चित्तं कुर्यादितिवन्निमित्तत्वेनैव नियोज्यमवच्छेत्तुम्। एवं च सति सर्वलोकावगतक्रियाकार्याभिधानं लिङ्श्रुतेरबाधितं भवति । कामस्वभावबाधो न युक्त इति चेत् न । श्रुतिप्राबल्यात् । तत्रैतत्स्यात् । यद्यपि निमित्तत्वेनापि कामान्वयः संभवति तथाऽपि फलत्वेनैव विशेषणत्वमङ्गीकर्त्तुं युक्तं कामनास्वभावभङ्गाप्रसङ्गात् । कामाना हि स्वभावत एव काम्यमानप्रधाना। निमित्तत्वे च सति तत्प्राधान्यं हीयेतेति फलत्वमेव युक्तमिति। तन्न। श्रुतेर्लिङ्गाद्बलीयस्त्वात् । कामनास्वभावो हि लिङ्गम्। तस्य च निमित्तपरत्वे बाधः फलपरत्वे तु लिङ्श्रुतेर्बाधः सा हि लोके क्रियारूपकार्य्याभिधायित्वेनावगता सती तत उत्तार्य फलपरत्वे सत्यर्थान्तरं नेतव्या स्यात्। तत्र लिङ्गानुग्रहेण श्रुतिं बाधित्वा फलपरत्वमभ्युपेयतामुत श्रुत्यनुसाराल्लिङ्गबाधेन निमित्तपरत्वमिति संदेहे श्रुत्यनुग्रहो न्याय्यः। फलपरत्वे हि तस्य कालान्तरभावित्वात्तत्साधनत्वं क्षणभङ्गुरस्य कर्म्मणस्साक्षान्न संभवति। न च फलापूर्वद्वारेणोत्पत्त्यपूर्वद्वारेणेव परमापूर्वसाधनस्यापि कर्म्मणः फलसाधनत्वं संभवति अतत्समवेतस्यातत्कालीनस्य चापूर्वस्य तच्छक्तित्वतद्व्यापारत्वायोगात्। शक्तिव्यापारयोरेव फलसाधनत्वनिर्वाहकत्वात् । अन्यद्वारेण किलान्यस्य साधनत्वं काष्ठादेरिव ज्वलनादिद्वारेणानुभवस्य वा संस्कारद्वा-

रस्मृतिपाकसाधनत्वं न संभवतीत्यसाधकं कर्म्म स्यात्। साधन-साधनं तु स्यात् न च किल साधनं फलं लिप्समानेन साधने साक्षात्प्रवर्त्तितुमशक्नुवता व्रीहिकामेनेव कर्षणं कार्यतया ऽव-गन्तुं शक्यमित्यनया स्वतन्त्रया लोकविरुद्धया प्रक्रियया लिङ्-श्रुतेर्लोकप्रसिद्धक्रियाकार्याभिधानपरित्यागेनालौकिकापूर्वाख्य-कार्याभिधायित्वं कल्पनीयमिति श्रुतिबाधप्रसङ्गान्निमित्तपरत्व-मेव ज्यायः । नन्वेवं सति प्रयोजकत्वं विधेः कल्प्यमिति गौरवं स्यात् । नैष दोषः श्रुत्यनुग्रहार्थं निमित्तपरत्वाभ्युपगमेन तत्क-ल्पनस्य न्याय्यत्वात् । न चैतदतीव कल्पनीयं सामान्येनैव कार्यस्य स्वसाधनप्रयोजकत्वं लोकत एव सिद्धं धूमस्येवाग्न्य-नुबन्धित्वं रूपस्येव चाक्षुषत्वम् । अतश्च कार्यविशेषवत् पूर्वा-नवगते ऽवगम्यमाने ऽपि तस्य प्रयोजकत्वमग्न्यनुबन्धित्वादि-वन्निर्ज्ञातचरमेवानुसंधीयते न त्वपूर्वं किं चित्कल्पयितव्यम् । सामान्येनावगतमप्यस्मिन्विशेषे ऽनवगतमेव कल्प्यमिति चेत् । नेदं तावदनुमानस्यावगतगोचरत्वसमयं विस्मरता न भाषितुं युक्तम् । अपि चैतावन्मात्रं कामाधिकारे ऽपि फलस्य कल्पनी-यमेव । नो खलु फलविशेषस्य स्वर्गादेर्ज्योतिष्टोमादिप्रयोज-कत्वं लोकसिद्धम् । न च फलस्यातदात्मनः कार्याद्विशेषतः प्रयोजकत्वं लोकसिद्धं येन न तत्कल्पनीयम् । किं च । फल-मपि न फलतया प्रयोजकं किं तु कार्यतया सा चाफलरूप-स्यापि कार्यस्याविशिष्टेति न किं चिद्गौरवम् । किं च ।

फलस्य विध्यधीनस्य तावन्मात्रनिरीक्षणात् ।
नैव कामाधिकरे ऽपि प्रयुक्तिः साधने ऽङ्गवत् ॥ ३ ॥

यदि हि नैमित्तिकाधिकारवत्कामाधिकारे ऽपि विधेः प्रयोजकत्वं न स्यात् ततः शक्येतापि वक्तुं प्रयोजकत्वं मा.

कल्पीति कामाधिकारत्वं परिकल्प्यतइति न त्वेतदस्ति कामाधिकारे ऽपि विधिरेव साधनानुष्ठानमङ्गानुष्ठानवत् प्रयुङ्क्ते न फलं तस्य कालान्तरभाविनस्तत्कालावस्थायिविध्यर्थमात्रसाध्यस्य तत्सिद्धिमात्रप्रतीक्षत्वात्। न हि तत्साक्षात्कर्म्मणा सिध्यति यतस्तदनुष्ठापयेत्। विधिस्तु तेनैव साध्यमानो युक्तं यत्तदनुष्ठापयतीति। सद्वारमेव विधिवत्फलमपि प्रयोजकमिति चेत् न द्वारासंभवात्। अथापि स्यात् यथा हि विधिरुत्पत्त्यपूर्वद्वारेण प्रधानानामङ्गानां च प्रयोजको भवति। न हि तेषामुत्पत्त्यपूर्वं साक्षात्साध्यमपि प्रयोजकमकार्यत्वात्। न ह्युत्पत्त्यपूर्वं कार्यं किं तु तेन परमापूर्वम् अकार्यं च न प्रयोजकमिति परमापूर्वमेव सद्वाराणां कर्म्मणां प्रयोजकं तद्वत्कामाधिकारे फलमप्यपूर्वद्वारेण साधनं प्रयुङ्क्ते इति। तच्च नैवम्। द्वारासंभवात्। यदि ह्युत्पत्त्यपूर्ववत् परमापूर्वमपि स्वातन्त्र्येण प्रयोजकं भवितुमशक्तं ततस्तद्वदेव प्रयोजकस्य फलस्य द्वारीभवेत्। तत्तु स्वयमेव प्राधान्येन कार्यमव्यवहितं च फलापेक्षया प्रथमप्रतीतं च किमिति व्यवहितचरमप्रतीतफलप्रयुक्तिं प्रतीक्षते औपाधिकं हि फलस्य साध्यत्वं तेन प्रतिपन्ननियोगविशिष्टनियोज्यसंबन्धाधीनत्वात् युक्तमेव चरमप्रतिपन्नत्वम्। ननु काम्येषु फलकरणीभूतस्य विषयत्वात्फलसाध्यत्वपुरस्सरमेव नियोगसाध्यत्वम्। नूनं भवान्यथाशक्ति निर्णये ऽपि न सम्यगालोचितपूर्वी। तत्र हि नियोगसाध्यत्वानिरपेक्षस्य फलस्य कर्म्मसाध्यत्वे निरूप्यमाणे अपूर्वाभिधानप्राधान्यप्रहाणादिदूषणगणः प्रदर्शित एव। तेन नियोगः स्वयमेव प्रयुक्तिसामर्थ्यादव्यवधानाच्च न फलस्य कर्म्म प्रयुञ्जानस्य द्वारीभवितुमर्हति। अतत्प्रयुक्तत्वाच्च। उत्पत्त्यपूर्वाणि हि स्वयमकार्यरूपाणि परमापूर्वसिद्ध्युपायत्वेन प्रयुक्तकार्यत्वानि युक्तं यत्परमापूर्वस्य क-

र्म्मप्रयोजकस्य द्वारं भवन्तीति परमापूर्वं तावत्कार्यं तच्च नर्ते ऽवान्तरापूर्वेभ्यः सिद्ध्यतीति तान्यपि कर्त्तव्यानि । तानि च कर्म्माधीनसिद्धीनीति कर्म्मापि कर्त्तव्यमित्यनेन हि क्रमेणापूर्वं साधनानुष्ठापकं भवति । न चैवं फलकर्त्तव्यत्वाधीनमपूर्वकर्त्तव्यत्वं तस्य स्वयमेव कार्यत्वात् । यच्च यस्य न प्रयोजकं तत्तद्वारेणान्यस्य प्रयोजकं भवतीति कुत एतत् । तत्सिद्धं कामाधिकारे ऽपि विधेरेव प्रयोजकत्वं न नैमित्तिककामाधिकारयोः कश्चित्प्रयुक्तिकल्पनाविशेष इति । प्रत्युत ।

कामाधिकारे ऽभ्यधिकं त्रयं स्यादपूर्वरूपं फलसाधनत्वम् ।
यागस्य तत्साधनता च कल्प्या प्रयोजकत्वं तु समानमेव ४

प्रयुक्तिकल्पना तावत्पक्षद्वये ऽपि फलापूर्वयोरुभयत्र वा ऽपूर्वस्याविशिष्टैव कामाधिकारे त्वप्रसिद्धमपूर्वरूपं तस्य फलसाधनत्वं यागस्य तत्साधनत्वं च कल्प्यमिति विशेषः । अथापि नाम कामाधिकारे न प्रयुक्तिकल्पना तथा ऽप्यपूर्वस्वरूपं धर्म्मि तस्य च फलसाधनत्वं यागस्य तत्साधनता कल्प्या । नैमित्तिकत्वे तु ।

क्रियारूपस्य कार्य्यस्य सिद्धरूपस्य धर्म्मिणः ।
प्रयोजकत्वमात्रं स्यात्तन्नैमित्तिकता वरम् ॥ ५ ॥

लोकसिद्धार्थत्यागाच्च श्रुतिबाधः स्थित एव । तस्माच्छ्रुत्यबाधात्कल्पनालाघवाच्च नैमित्तिकत्वमेव युक्तं न कामाधिकारत्वमिति । कथं पुनर्यच्छब्दादिविरहिणो निमित्तत्वम् । न वयं श्रौतं निमित्तत्वं ब्रूमः । किं तु जज्ञभ्यमानवत्कामनाविशिष्टस्य नियोज्यत्वादर्थान्निमित्तत्वं कामनायाः कल्प्यते ।

किं च यच्छब्दवाच्यत्वं न निमित्तस्य विद्यते।
उद्देश्यत्वं ततः सिद्ध्येदिह तत्सिद्धमन्यतः ॥६॥

यच्छब्दो ह्युद्देश्यत्वमात्रं प्रतिपादयति न निमित्तत्वम्। अनुपादेयविशेषणविशिष्टस्योद्दिष्टस्य नियोज्यत्वेन गृहदाहादिमतो ऽन्वयाद्विशेषणभूतस्य दाहस्यार्थिकं निमित्तत्वमुच्यते तच्च फलकामस्यापि नियोज्यस्योद्दिष्टत्वात्तत्कामनाया अप्यविशिष्टमिति युक्तं निमित्तत्वम्। बहुशश्च यच्छब्दादि श्रूयते यः प्रजाकामः पशुकामः स्याद्यदि कामयेत वर्षुकः पर्ज्जन्यः स्यादित्यादिष्विति न निमित्तपरत्वे कश्चिद्विशेषः। ननु नित्यानि दर्शपूर्णमासादिकर्म्माणि न तानि नैमित्तिकानि भवितुं प्रभवन्ति यदि तावन्नियमेन क्रियेरंस्ततो नैमित्तिकविध्यानर्थक्यम्। अथ तद्वशेन निमित्ते सत्यनुष्ठानं ततो यावज्जीवविधेरानर्थक्यम्। तस्मात्कामाधिकार एव युक्त इति। नेत्युच्यते। यदि ह्युभयपक्षसाधारणं वाक्यं स्यात्ततो ऽस्मिन् पक्षे ऽर्थवत्त्वं समाश्रीयेत अत्र तु श्रुत्यबाधनादियुक्तिकदम्बकेन निमित्तपरत्वमेवावसीयते। यदि तथा सत्यानर्थक्यमन्यतरस्य भवति भवतु न ह्यानर्थक्यं नाम श्रुतिप्रमाणवर्गे ऽन्तर्भवति यस्यार्थवत्त्वमवगम्यते तस्य तदेव यस्य त्वानर्थक्यमेव गम्यते तस्यापि तदेव ज्यायः। आवृत्तिर्वा प्रयोगस्य दाक्षायणयज्ञवदर्थवत्त्वायास्तु न त्वर्थान्तरकल्पना शक्यते कर्त्तुम्। अथ वा नैमित्तिकस्यैवानुष्ठानस्य यावज्जीवकालाभ्यासो यावज्जीववाक्येन लक्षणया विधीयते सा हि लौकिकी लिङ्शब्दस्य त्वर्थान्तरकल्पना इहैव। अतो न कामाधिकारत्वं युक्तम्। आश्रीयतां वा सूत्रभाष्यारूढं वार्त्तिककारीयं दर्शनं यागाद्यवच्छिन्ना भावना विध्युपेता पुरुषाभिलषितभाव्यापेक्षिणी वाक्येन स्वर्गादिकं भाव्यतया स्वीक-

रोति न निमित्ततया तस्यानपेक्षितत्वादिति। तत्र हि यागादेः करणत्वं कल्पितापूर्वद्वारेण सम्भवति काष्ठकर्षणादीनामिव ज्वलनविलेखनादिद्वारेण व्रीहिपाकादिसाधनत्वम् आग्नेयादिषट्कस्यैवोत्पत्त्यपूर्वद्वारेण परमापूर्वसाधनत्वम् अवगोरणादेर्वा शतयातनादिसाधनत्वमिति सर्वं सुस्थितं भवति॥

सौर्यादिषु निमित्तत्वं कामनायाः प्रसज्यते।
न हि तत्र वचः किं चिदानर्थक्यमुपाश्नुते॥ ७॥

भवतु वा दर्शपूर्णमासादिषु यावज्जीवश्रुतिसद्भावात्फलपरत्वं येषु तु सौर्यादिषु नित्यत्वश्रुतिर्नास्ति तत्र किमानर्थक्यपरिहारार्थं फलपरत्वमङ्गीक्रियते। अथायमभिप्रायः।

दर्शादावेव वाच्यत्वमपूर्वस्यावधारितम्।
मा भाजि कामनालिङ्गमित्यन्यत्रापि संश्रितम्॥ ८॥

यावज्जीवश्रुत्यानर्थक्यपरिहारार्थमेव तावद्दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिषु फलपरत्वे कामशब्दस्यावधारिते सत्यतत्साधने कामिनः कार्यावगमानुपपत्तेः कर्म्मणश्च क्षणभङ्गुरस्य तत्साधनभावासम्भवात्तदतिरिक्तमेव स्थास्नु कार्यं लिङ्शब्दः प्रतिपादयतीत्यवगते सौर्यादिष्वपि लिङ्श्रुतेः कर्म्मणि तदतिरिक्ते वा पक्षपाताभावात्कामस्वभावाभङ्गार्थं फलपरत्वमेव युक्तमिति। नेति वदामः।

अभिधानश्रुतिर्यद्यप्येवं लिङ्गं न बाधते।
समानपदरूपा तु श्रुतिरस्यापि बाधिनी॥ ९॥

यद्यपि लिङ्शब्दस्य लोके क्रियायां प्रयोगाद्दर्शपूर्णमासादिवाक्येषु चापूर्वे प्रयोगादुभयानुगतकार्यसामान्यवाचिनः क्रियातिरिक्ते ऽपि कार्यविशेषे नास्त्यभिधानव्याघातः तथा

ऽपि सामान्यस्य विशेषापेक्षायां समानपदोपादानलक्षणया श्रुत्या प्रकृत्युपात्तो भावार्थ एव विशेषत्वेन सम्बध्यमानो न पदान्तरोपात्तनियोज्यविशेषणीभूतकामनास्वभावाख्यलिङ्गवशेन निवारयितुं शक्यते उच्चरन्नेव हि प्रत्ययः स्वार्थं कार्यसामान्यं प्रकृत्यर्थानुरक्तमेवाभिधत्ते । यथोक्तम् "प्रातिपदिकादुच्चरन्ती द्वितीयाविभक्तिः प्रातिपदिकार्थो विशेषक इत्याहे"ति । तेनाभिधानाविशेषे ऽपि पदश्रुतिविरोधादेव लिङ्गबाधः । तदिदमुपहसन्ति प्राभाकराः । ते किल मन्यन्ते ।

अपूर्वस्याभिधेयत्वे क्रिया लाक्षणिकी भवेत् ।
अनेकार्थत्वदोषात्तु न द्वयोरभिधेयता ॥१०॥

यदा हि फलकामिनियोज्यसमभिव्याहारात्क्रियातिरिक्तमपूर्वं लिङाद्यभिधेयमास्थितं तदा न क्रियाया अपि तदभिधेयत्वं सुकल्पमनेकार्थत्वस्यान्याय्यत्वात् क्रियाप्रतीतेश्च लक्षणया ऽप्युपपत्तेः । अपूर्वकार्यता हि क्रियाकार्यत्वाविनाभूता शब्देनावगता तदुपस्थापयतीति नाभिधेयत्वसम्भवः । न च सौर्यादिषु लक्षणाकारणमस्तीत्यपूर्वमेव तत्तद्गतैर्लिङादिभिरभिधीयते । अतो न युक्तः कामनास्वभावभङ्गेन निमित्तपरत्वाभ्युपगमः । इदं तु तेषामभिमानमात्रमिति प्रामाणिका न श्रद्दधति तथा हि ।

अनेकार्थत्वमन्याय्यं शक्त्यनेकत्वदोषतः ।
एकयैवोभयोः सिद्धौ प्रतीतेरभिधेयता ॥११॥

न तावल्लौकिका गामानयेत्यादिषु लिङो लक्षणया वृत्तिं मन्यन्ते किं तु मुख्यतयैव । तत्र यदि क्रियाकार्ये मुख्यया वृत्त्या ऽभिधीयमाने शक्त्यन्तरकल्पना ऽऽपतेत् ततो लाक्षणिकत्वमभ्युपगम्येत न त्वेतदस्ति एकयैव कार्यमात्राभिधान-

शक्त्योभयत्र मुख्यत्वोपपत्तेः। अनेकार्थत्वं ह्यनेकशक्तिकल्पनादोषादन्याय्यं न स्वरूपेण मा दूषि नानाविधनित्यकाम्यप्राकृतवैकृतनिषेधापूर्वाणां तदभिधेयत्वम्। अतो यथा तेषां कार्य्यस्वरूपैकोपलक्षणयोगात्तदभिधेयत्वं भवति एवं क्रियाया अपि तपस्विन्यास्तद्योगात्तदभिधेयत्वं भविष्यति। आह। नैकया शक्त्या क्रियास्वरूपे हि प्रकृत्युपात्ते तस्य कर्त्तव्यतारूपं विशेषणमेव लिङा प्रतिपादयितव्यम्। अपूर्वे तु नान्येन केन चित्प्राप्तमिति लिङैव कर्त्तव्यताविशिष्टं तत्स्वरूपमभिधातव्यमिति नैकप्रकारसम्भवः। यदि विशिष्टाभिधायी ततोऽपूर्वमेव न क्रियामभिदध्यात्। अथ विशेषणाभिधायी ततः क्रियामेव नापूर्वमभिदध्यादिति। नैतदेवम्। विशिष्टाभिधाय्येवायं शब्दः स यदा क्रियापरो भवति तदा तत्स्वरूपस्य प्रकृतित एव प्राप्तत्वाद्विशेषणपरो भवति। तद्यथा दण्डी प्रैषानन्वाहेति विशिष्टाभिधाय्यपि दण्डिशब्दो विशेषणपरो भवन्नपि न लक्षणया। तथा कार्यवचनः शब्दोऽपि यदा क्रियायां प्रयुज्यते तदा कार्यस्वरूपविशेषणपरत्वं श्रुतिवृत्तः सम्प्रतिपद्यते नैतावता लक्षणा भवतीत्युभयत्रापि मुख्यमेव। यस्तु वदति। नन्वेवं सति कामाधिकारेऽपि समानपदोपात्तभावार्थ एवाभिधेयः स्यादित्यपूर्वाभिधानमुत्सीदेत्। तेन यदैव कामिनियोज्यसंबन्धादपूर्वाभिधायकत्वमवगतं तदा तन्निर्वाहार्थं क्रियाया लाक्षणिकत्वमध्यवसितमिति स एवमनुशासितव्यः हन्त किं नाश्रौषीर्यो हि पाषाणान्भक्षयति ईषत्करास्तस्य मुद्गशष्कुल्यो भवन्तीति यो हि नियोज्यसम्बन्धाल्लिङ्शब्दं क्रियारूपकार्यविशेषवाचिनमवगतमपि तत उद्धृत्यापूर्वं नयति स कथं सामान्यवाचिनमपूर्वं नेतुं न क्षमेत। तस्मात्कर्त्तव्यतासामान्यवाची सन्नपि यत्र फलकामस्य नियोज्यत्वं तत्र तद्बलेनापूर्वमभिधत्ते। अ-

न्यत्र तु समानपदोपादानाक्रियाम् । तेन सामान्यवाचित्वा-
ल्लिङ्शब्दस्य यथा ऽपूर्वाणां तद्योगात्तदभिधेयत्वम् एवं क्रिया-
या अपि किं नोपगम्यते । तत्कर्त्तव्यताभेदादिति चेत् । न
तदभावात् । तत्रैतत्स्यात् कृत्युद्देश्यता कर्त्तव्यता लिङभिधेयो-
पलक्षणं सर्वाणि चापूर्वाणि तदुपेतानीति युक्तं यत्तैरभिधी-
यन्तइति क्रियायास्तु फलोद्देशप्रवृत्तकृतिव्याप्यतात्मिका कर्त्त-
व्यतेति कर्त्तव्यताभेदान्नाभिधेयत्वसम्भवइति । नैतदेवं कर्त्त-
व्यताभेदाभावात् । यद्यपि लौकिकानां गवानयनादीनां न
स्वातन्त्र्येण कर्त्तव्यता ऽवगता तथा ऽपि वेदे सौर्यादियागानां
तादृश्येव कर्त्तव्यता भविष्यति । स्वतन्त्रकार्याभिधायी हि लि-
ङ्शब्दो यजिना समभिव्याहृतस्तमेव तादृशं प्रतिपादयति । न
लौकिकक्रियायास्तादृशी कर्त्तव्यता ऽवगतपूर्वेति चेत् । न ।
नियोगस्य वा किमवगता येनाभ्युपगम्यते । लोकानवगता
ऽपि वेदादेव तस्य तादृशी कर्त्तव्यता ऽवगम्यतइति चेत् ।
क्रियायामपि तुल्यम् । ननु प्रत्यक्षविरुद्धा दुःखरूपायाः क्रिया-
याः कथमागमेनापि शक्यते कर्त्तव्यता प्रतिपादयितुम् । नि-
योगात्मा वा भगवद्भक्तिमानन्दैकरसो यतस्तस्य कर्त्तव्यता न
प्रमाणान्तरविरुद्धा स्यात् । सो ऽपि बहुद्रव्यव्ययप्रयाससाध्यो
दुःखाकर एव न चेतनव्यापारस्योद्देश्यतामनुभवितुमर्हति ।
यथा तु तस्य नित्यनिरपेक्षाम्नायात्कर्त्तव्यता तथा क्रियाया
अपि भविष्यति। अपि च नियोगस्य सुखदुःखप्राप्तिपरिहारव्यति-
रिक्तस्य क्रियावन्न स्वातन्त्र्येण कार्यत्वमुपपद्यते । कृतिर्हि चेत-
नप्रयत्नरूपा इच्छापूर्वकत्वात्तद्गोचरमेव गोचरयितुमर्हति ।
इच्छा हि सुखदुःखपरिहारगोचरैवेति सा ऽपि तद्गोचरैव । अतो
नापूर्वस्य प्राधान्यमुपपद्यतइति यथा शक्तिनिर्णये वर्णितम् । किं
च । नान्यार्थप्रवृत्तकृतिव्याप्यतात्मिका क्रियायाः कर्त्तव्यतेति

भवता शक्यते वक्तुम् इष्टव्याघातप्रसङ्गात् लोके हि क्रियाकार्याभिधायित्वे लिङादीनामवगते क्रियारूपविशेषणपरिहारो न वेदे ऽपूर्वपर्यन्ततामात्रं कामपदसमभिव्याहारादवगम्यतइति भवतां दर्शनम् । तत्र यदि अन्यार्थप्रवृत्तकृतिव्याप्यतारूपकर्त्तव्यतोपेता क्रिया तदर्थत्वेनावगता हन्त तर्हि वेदे ऽपि तद्रूपापरित्यागेनापूर्वपर्यन्ततामात्रं कल्पनीयमित्यपूर्वप्राधान्यमिष्टं व्याहन्येतेति । स्वर्गकामपदसमभिव्याहारो हि क्रियारूपस्यैव विशेषस्य परिपन्थी न त्वन्योपसर्जनत्वस्य तेन लोकवेदयोरुभयोरन्योपसर्ज्जनकार्याभिधानान्नास्त्यनेकार्थत्वम् । प्रत्युत स्वर्गकामपदसमभिव्याहाराच्चैवमेवागम्यते । यो हि स्वतन्त्रकार्याभिधायित्वं लिङादीनामिच्छति स वक्तव्यः किमत्र ते प्रमाणमिति । स चेद् ब्रूयात्फलकामिनियोज्यसमभिव्याहारादनन्योपसर्ज्जनं क्रियातिरिक्तं कार्य्यं सिध्यतीति प्रतिब्रूयादेनम् । न विपरीतसाधनत्वादिति । कामपदसमभिव्याहारो ह्यन्योपसर्ज्जनकार्याभिधानएव प्रमाणं न स्वातन्त्र्ये । स हि स्वर्गं कामयमानस्तत्कामित्वेन रूपेण तदुपसर्जनं कार्यं बोद्धुमलमित्यनेन हेतुना तत्साधनत्वायोग्यक्रियापरित्यागेन तदनुकूलापूर्वाभिधानं लिङादीनामुपेयते तत्कथं स्वप्रमाणविरुद्धप्राधान्याभ्युपगमः । ननु वस्तुवृत्त्या फलानुगुणमपि न तथा शब्देनाभिधातव्यम् । किमेतावता स्वप्रधानभूतमभिधातव्यं न हि प्राधान्ये कश्चिदपि प्रमाणलवः समस्ति । अपि च नियोज्यपदसम्बन्धादेवं कल्पयितव्यं यादृशं कार्यरूपं फलकामी ममेदं कार्यमिति बोद्धुमलं तादृशमभिधातव्यं स च स्वकामानुगुणमेव बोद्धुमर्हतीति तथैवाभिधातव्यम् अङ्गापूर्ववत् । यो हि प्रयाजादिविषयापूर्वं विनियुक्तविषयतया स्वतन्त्रीभवितुमसमर्थमिति स्वशब्देनाधिकारवाक्यनिर्ज्ञातप्रधानकार्याभिधानशक्तिना ऽपि लक्षणया ऽन्यो-

पसर्जनीभूतमभिधीयते इति वदति स कथं कामाधिकारवाक्याद्न्यत्राविदितप्रधानकार्याभिधानसामर्थ्येन प्रत्युत लोकावगतगुणभूतकार्याभिधानसामर्थ्येन कामपदसमभिव्याहाराच्चापूर्वाभिधानप्रमाणादवश्यंभाविताद्दृक्तेन लिङ्शब्देन करणीभूतविषयतया च तद्वदेव विनियुक्तविषयतया प्रत्यूढप्राधान्यमपूर्वं प्रधानतयैव लोकस्वप्रमाणस्वाविषयाविरुद्धमभिधीयतइति वदन्हास्यो न स्यात् । तदुभयत्रापि गुणभूतकार्याभिधानशक्त्यैकयैव मुख्यत्वोपपत्तेर्न क्रियाया लाक्षणिकत्वम् ।

लोकतः स्वप्रमाणाच्च फलार्थविषयत्वतः ।
अन्यार्थत्वमपूर्वस्य प्राधान्यं न कुतश्चन ॥१२॥

इति संग्रहश्लोकः । एतेन नैमित्तिकाधिकारे ऽपि कामाधिकारव्युत्पत्त्यनुसारादन्यार्थस्यैवापूर्वस्याभिधानात् तदुपपत्त्यर्थं नियोज्यवत्फलमवश्यं कल्पनीयमिति दर्शितम् । किं च ।

प्राधान्ये ऽपि नियोगस्य गुणभावे ऽपि कर्म्मणः ।
विशेषद्वयहानेन सामान्यस्यैव वाच्यता ॥१३॥

यद्यपि नियोगस्य कृत्युद्देश्यतया प्रधानस्यान्यादृशी कर्त्तव्यता क्रियायाश्चान्योद्देशप्रवृत्तकृतिव्याप्यतया गुणभावादन्यादृशी कर्त्तव्यता तथा ऽप्युभयत्र युज्यमानस्य लिङ्शब्दस्य गोशब्दस्येव खण्डादिषु प्राधान्यगुणभावप्रहाणेन खण्डत्वादिविशेषप्रहाणेनेव सर्वानुगतं कार्यत्वसामान्यं गोत्वमिव वाच्यं स्यात् । अनेकत्र प्रयुक्तस्य शब्दस्य सर्वत्र मुख्यत्वोपपत्तावन्याय्या लक्षणा तदेतत्कपिञ्जलाधिकरणे भगवता भाष्यकारेण महता प्रबन्धेन साधितमपि स्वसमयसंतमसतिरस्कृतदृष्टिभिर्नालोचितम् । एतेन गामानयेत्यादिषु कार्यान्विते प्रयोगात्तथा नद्यास्तीरे फलानि सन्तीत्यादिषु सिद्धार्थान्विते प्रयोगादुभ-

यानुगताकाङ्क्षितसंनिहितयोग्यार्थमात्रान्वितस्वार्थाभिधायित्वाद् गवादिशब्दानां कार्यान्विताभिधायित्वं निरस्तम् ।

यदि त्वेतन्न मृष्येत प्रमाणान्तरगोचरः ।
शब्दानामभिधेयं स्यात्ततो वेदाप्रमाणता ॥१४॥

यदि ह्यनेकत्र प्रयुज्यमानस्यापि शब्दस्य सर्वानुगतसामान्यसद्भावे ऽपि तद्वाचित्वमनभ्युपेत्य व्युत्पत्त्यवसरावगतविशेषवाचित्वेनान्यत्र लाक्षणिकी वृत्तिरभ्युपगम्येत ततो वृद्धव्यवहारे प्रमाणेन तदाभासेन वा वक्तृबुद्ध्यारूढएवार्थे शब्दप्रयोगात्तथाविध एव सर्वशब्दानामभिधेयः स्यात् वेदे चापौरुषेये तदसम्भवादप्रतिपादकत्वं वेदस्य पौरुषेयत्वं वा बलादापद्यतइत्यप्रामाण्यं स्यात् । तथा लिङ्शब्दस्यापि व्युत्पत्तिस्थानाभिमते कामाधिकारे फलकामिनियोज्यफलानुगुणापूर्ववाचित्वं व्युत्पन्नमिति नैमित्तिकनिषेधाधिकारयोरपि व्युत्पत्त्यनुसारेण तथाविधापूर्वाभिधानात्तदनुसारेण फलं तत्कामी च नियोज्यः कल्पयितव्य इति सर्वत्र फलाधिकारत्वं जातेष्टिवत्स्यात् । तस्मात्सिद्धार्थे ऽपि वेदस्य प्रमाण्याविघातादानन्दं ब्रह्मेत्यादीनां प्रामाण्यनिराकरणं नास्तिकतामेव फलतीत्यलमनेन । तस्मान्न क्रियाया लाक्षणिकत्वमिति सौर्यादिषु लिङ्शब्दस्य कार्यसामान्यवाचिनः समानपदोपादानश्रुत्या भावार्थविषयत्वात्तन्मा बाधीति निमित्तत्वमेव कामनाया भवन्मते स्यात् । तस्माद्विधियुक्तायाः क्रियायाः फलापेक्षत्वात्तत्परत्वमेव कामशब्दस्य न निमित्तपरत्वमनपेक्षितत्वादित्ययमेव निमित्तपरत्वनिराकरणहेतुः अभ्युच्चयमात्रं तु नित्यत्वं भङ्गुराया अपि क्रियायाः फलसाधनत्वमवान्तरव्यापारापूर्वद्वारेण प्रागेव समर्थितम् । बह्वेव हि तत्रोदाहरणं काष्ठाग्नेयावगोरणादीति नात्र विशेषे मनः

खेदयितव्यम् । न चालौकिकमभिधेयं कल्प्यम् । अत्र संग्रह-श्लोकाः ॥

श्रुतिः समर्थिता भवेन्निमित्ततासमाश्रये ।
विरुध्यते हि कामनास्वरूपलिङ्गमेव तु ॥ १५ ॥
फले समाश्रिते श्रुतिः प्रसिद्धमर्थमुत्सृजेत् ।
अलौकिकं समाश्रयेदतश्च सा विरुध्यते ॥ १६ ॥
निमित्तताश्रये विधेः प्रयुक्तिकल्पनं तु यत् ।
फले समाश्रिते ऽपि तत्समं फलस्य तस्य वा ॥१७॥
अपूर्वरूपमस्ति तत्फलस्य साधनं तथा ।
यजिश्च तत्र साधनं त्रयं त्विदं ततो ऽधिकम् ॥१८॥
अथ प्रयुक्तिकल्पनं निमित्तएव नो फले ।
तथा ऽपि तद्वरं यतस्त्रयं प्रकल्प्यमन्यथा ॥ १९ ॥
कथं तु यत्पदादिभिर्विना निमित्ततेति चेत् ।
फलार्थिनो नियोगतो न तु श्रुतेर्निमित्तता ॥ २० ॥
कथं तु नित्यवच्छ्रुतं निमित्तवद्भविष्यति ।
अनर्थकं प्रसज्यते वचस्तयोर्हि किं चन ॥ २१ ॥
भवत्वनर्थकं न हि प्रयोजनात्प्रमास्थितिः ।
प्रयोगभेदकल्पनं निमित्ततो ऽथ वा भवेत् ॥ ॥२२॥
निमित्तता प्रसज्यते न यत्र नित्यवच्छ्रुतिः ।
द्वयोः प्रसङ्गतः श्रुतिर्न लिङ्गबाधनक्षमा ॥ २३ ॥
अतः स्वभावलिङ्गतः फलत्वमेव चेन्न तत् ।

पदश्रुतिर्हि कामनास्वरूपलिङ्गबाधिनी ॥ २४ ॥
अपूर्वमेव चेच्छ्रुतिर्ब्रवीति न क्रियामपि ।
द्वयोरपि प्रयोगतोऽनुवृत्तमेव सा वदेत् ॥ २५ ॥
यथैव गोत्वमेव गोकृतिस्तथैव लिङ्श्रुतिः ।
द्वयोः क्रियानियोगयोर्ब्रवीति कार्यमात्रकम् ॥ २६ ॥
अतः श्रुतेरनुग्रहात्तथाऽल्पकल्पनादपि ।
निमित्ततैव ते भवेदियं तु तन्निराकृतिः ॥ २७ ॥
अपेक्षते फलं क्रिया विधिक्षमा हि नान्यथा ।
ततस्तदेव गृह्यते निमित्तताऽनपेक्षिता ॥ २८ ॥
कथं फलस्य साधनं क्रिया विशारुकेति चेत् ।
अवान्तरक्रियान्वयात्स्वरूपतस्तु नो भवेत् ॥ २९ ॥
यथैव वासनावशात्प्रमाणतः स्मृतिर्भवेत् ।
यथेन्धनैरवान्तरक्रियावशाच्च विक्लिदिः ॥ ३० ॥
यथाऽवगोरणादिना शतादियातनोद्भवः ।
यथैव कर्म्मणस्तव स्वरूपभङ्गुरादपि ॥ ३१ ॥
अवान्तरक्रियावशाद्भवेदधिक्रियाविधिः ।
तथा ततः फलं भवेत्किमत्र खेद्यते मनः ॥ ३२ ॥

तदेवं फलपरत्वे सति किं तदाग्नेयादीनां तन्त्रमुत भेदेनेति विचार्यते । यत्रान्योन्यनिरपेक्षा एवाग्नेयादिभावना भाव्यमपेक्षन्तइति तथैव सम्बध्यन्त इति पूर्वः पक्षः । सिद्धान्तस्तु फलमुद्दिश्याग्नेयादीनामुपादीयमानानां तन्त्राभिधानावगतं साहित्यं

विवक्षितम् एकेनापि च फलेन सर्वेषां नैराकङ्क्ष्यं भवतीति सर्वेषामेव तन्त्रं फलमिति । ततो ऽङ्गानां निरपेक्षैरेव वाक्यैः क्रतूपकारसाधनत्वेन विनियोगान्निरपेक्षाणामेव तत्साधनत्वं सौर्यार्यमणादीनामिव ब्रह्मवर्चसादिसाधत्वमाशङ्क्योक्तं नैषां वाक्येन विनियोगः स्वरूपमात्रेण तु स्ववाक्यैरुपस्थितानां प्रकरणविनियोगः । तच्चापर्यायव्यापारमिति सह सर्वेषां विनियोगः । कथं त ह्यङ्गविधीनां विनियोजकत्वम् । तदभावे प्रकरणविनियोगस्यासम्भवान्न तु स्वरूपेणैव विनियोजकत्वम् । प्रयोजकैकस्वभावत्वादित्ययुक्तमेतत् । यदा तु श्रेयःसाधनतैव विधिः लिङादिभिरभिधीयतइत्याश्रीयते तदा ऽपि क्रत्वैदमर्थ्यमात्रेण प्रकरणसनाथैः प्रातिस्विकैर्विधिभिर्विनियुक्तानां प्रयाजादीनामेकेनैव प्रधानविधिना ऽष्टदोषदुष्टविकल्पपरिजिहीर्षया सर्वविशिष्टभावनाविधायिना सर्वेषां युगपत्प्रयोगावगमात्तद्वशेनावान्तरकार्यभेदद्वारेण सर्वेषामुपकारकत्वस्य सहैव परिकल्पनात्काष्ठादीनामिव पाकाङ्गानां समुच्चयसिद्धिः । न ह्युपकारमुद्दिश्य पदार्थानां विधिः सम्भवति तेभ्यः प्रागुपकारस्याप्राप्तत्वादिति क्षुण्णमेतत् । यत्र तु प्रमाणान्तरेणैककार्यत्वावगमः यथा व्रीहियवयोः यत्र वा प्रयोगविधिनानात्वमेकार्थत्वे ऽपि यथोद्भिच्चित्रयोः पश्वर्थयोस्तत्र विकल्प इति । ननु यदि प्रधानविधिरेवानुष्ठापकः नाङ्गविधयो ऽनुष्ठापकाः किमर्थास्तर्हि तेष्वर्थवादाः वर्म्म वा एतद्यज्ञस्य क्रियतइत्यादयः ते हि विधेः प्रयोजकशक्तिमुत्तभ्नन्तीति स्थितिः अप्रयोजकत्वे तु तेषां किमुत्तम्भनमेषां कार्यमिति । उच्यते । प्रधानविधेरेव सर्वाङ्गविशिष्टप्रधानविधायिनस्तदङ्गस्तुतिद्वारेण सर्वएवार्थवादाः शेषभूता इत्यदोषः । नैतदेवम् । विध्येकवाक्यभावेन ह्यर्थवादानां तत्त्वं न च प्रधानविधिना ऽङ्गवाक्यस्थानामर्थवादानामे-

कवाक्यत्वसम्भव इति न तच्छेषत्वसम्भव इति। नैष दोषः। प्रधानविधिशक्तिर्हि विशिष्टं विषयीकृत्यार्थाद्विशेषणेष्वङ्गेषु संक्रामति तत्स्थविध्येकवाक्यभूता अर्थवादा युक्तं यत्तामुत्तम्भन्तीति। यथा वायुर्वै क्षेपिष्ठा देवतेत्यनेन विशिष्टालम्भविधिशक्तेरर्थाद्विशेषणभूते वायौ संक्रान्तायास्सहायकरणम्। इयांस्तु विशेषः यत्तत्र वायोर्वाक्येन विनियोगः प्रयाजादेस्तु प्रकरणेन। नैतावता ऽर्थवादसङ्गतेः कश्चिद्विशेषः। तत्सिद्धमङ्गानामपि संभूयकारित्वमिति। तत एककालानां बहूनां प्रधानानामेकदेशकालकर्तृकाणां तादृशान्यङ्गानि तन्त्रं यथा ऽग्नेयादीनां प्रयाजादयः। यत्र त्वन्यतमस्यापि भेदः यथा त्रिकद्वयस्य कालभेदः वरुणप्रघासेषु मारुत्या अन्येषां च देशभेदः तत्रैवापराग्निकानां कर्तृभेदः तत्राङ्गानामावापः आवृत्तिरित्यर्थः। एकदेशकालकर्तृत्वे ऽपि वचनादावापः यथा ऽग्नये पवमानाय निरुप्य पावकशुचिभ्यां समानबर्हिषि निर्वपेदिति। एवं तन्त्रावापस्वरूपे प्रयोगपरिमाणे चिन्तिते तत्परिमाणमेव प्रसङ्गरूपं द्वादशे चिन्त्यते। प्रयोगपरिमाणत्वाविशेषे ऽपि तन्त्रप्रसङ्गाप्रयोजकानां भाष्यकारेण विशेषो ऽभिहितः।

"साधारणं भवेत्तन्त्रं परार्थे त्वप्रयोजकः।
एवमेव प्रसङ्गः स्याद्विद्यमाने स्वके विधावि"ति॥

यदनेकोद्देशेनानुष्ठीयते तत्तन्त्रं यत्त्वन्यार्थमनुष्ठितं तदनुनिष्पन्नं वा ऽन्यस्य साधनं भवति प्रतिपाद्यं वा तत्राप्रयोजकत्वम्। यथा पुरोडाशकपालं तुषोपवापस्य यथा च पदमक्षाञ्जनस्य वाजिनं वाजिनयागस्य शकृल्लोहिते च निरसनस्य। तत्राविद्यमानमपि कपालादि तुषोपवापादिना न प्रयोक्तुं शक्यतइत्यप्रयोजकत्वम्। यत्र तूभयत्राप्यन्योन्यैनैरपेक्ष्येणाङ्गविनियोगे सत्यप्येकार्थानुष्ठितैरेवाङ्गैरन्यस्यापि उपकारसंपत्तेरन्यस्य-

प्रयोजकत्वक्षमस्यापि तल्लोपः यथा पश्वर्थानुष्ठितैरेव प्रयाजादिभिरुपकारसंपत्तेः पशुपुरोडाशः पशुसम्बन्धानादरेणैव स्वार्थतया ऽतिदेशेन विनियुक्तान्यपि प्रयाजादीनि न पृथगनुष्ठापयति तत्र प्रसङ्गः । अत्र चान्यार्थालाभे स्वयमपि प्रयोजकं भवति अत एव चाज्यभागौ पशावविद्यमानौ पशुपुरोडाशेनानुष्ठाप्येते । आह । यदि पश्वर्थानुष्ठिता एव प्रयाजादयः पशुपुरोडाशस्योपकुर्वन्ति न तु तदर्थमनुष्ठीयन्ते ।

कथं तर्हि तदङ्गत्वं तादर्थ्ये ह्यङ्गतेष्यते ।
उद्देशेन च तादर्थ्यं नोपकारान्न चात्र सः ॥३३॥

यदुद्देशेन यदनुष्ठीयते तत्तदर्थं तदेव चाङ्गमुच्यते न तूपकारकमात्रम् । न च प्रयाजादयः पशुपुरोडाशोद्देशेनानुष्ठीयन्त इति कथं तदङ्गत्वम् । नन्वेवं सति तुषोपवापाङ्गत्वं वा ।

पुरोडाशप्रयुक्तस्य कपालस्य कथं भवेत् ॥
व्यापार्यते तुषाणां तदुपवापप्रसिद्धये ॥३४॥

यद्यपि पुरोडाशप्रयुक्तमेव कपालस्वरूपं तथा ऽपि तुषोपवापसिद्धौ व्यापार्यतएवेति युक्तमेव परोद्देशप्रवृत्तव्यापारगोचरत्वलक्षणं शेषत्वम् । प्रयाजादयस्तु न कथं चिदपि पशुपुरोडाशोद्देशप्रवृत्तपुरुषप्रयत्नगोचरा इति न तच्छेषत्वमेषां सम्भवतीति ॥

उच्यते न प्रयाजानां पुरोडाशे ऽस्ति शेषता ।
तद्योग्यत्वेन तेषां तु तदङ्गत्वं प्रतीयते ॥३५॥

यथैवादहतोऽपि वन्हौ दाहकव्यपदेशः । तथैव प्रयाजादिष्वपि पशुपुरोडाशार्थमननुष्ठीयमानेष्वपि तद्योग्यतया तदङ्गत्वव्यपदेशः शक्नोत्येव पुरोडाशस्ताननुष्ठापयितुम् । अन्यतस्तु

सिद्धत्वान्नानुष्ठापयति तेनान्यशेषभूतेष्वपि योग्यतया शेषत्वव्यवहारः । अन्ये तु योग्यतैव शेषत्वम् । अतः पुरोडाशे ऽपि प्रयाजादीनां मुख्यमेव तदस्तीति वर्णयन्ति । तथा वा ऽस्तु । सर्वथा तावदुपपन्नः शेषत्वव्यवहार इति सर्वं समञ्जसम् । तदेष संक्षेपार्थः । भावना तावत्स्वशब्देन प्रथममभिधीयते तस्याश्च विधिना समानाभिधानेनान्वयः प्रतीयमानो ऽप्ययोग्यतया न द्रागेव निष्पद्यते । इयं चावस्था विधिप्रक्रम इत्युच्यते विधिप्रक्रमाच्च तदेवं ज्ञायते यादृशैरंशैः पूर्णेयं विधानमर्हति तादृशैः पूरयितव्येति ततः किमस्या भाव्यमित्यपेक्षायां समानपदोपात्तमपि धात्वर्थमयोग्यत्वादुल्लङ्घ्य पदान्तरोपात्तं स्वर्गादि स्वीक्रियते तच्च षष्ठाद्ये व्युत्पादितम् । तदभावे चार्थवादस्थं तदभावे चाध्याह्रियते तच्च रात्रिसत्राधिकरणे विश्वजिदधिकरणे च प्रतिपादितम् । ततः करणापेक्षायां समानपदोपात्तो धात्वर्थ एव करणतया ऽन्वीयतइति भावार्थाधिकरणार्थः । तस्य च करणत्वं क्षणिकस्य कालान्तरभाविफलं प्रति साक्षान्न सम्भवतीति स्थिरद्वारापेक्षायां देवताराधनकर्तृसंस्कारयोर्देवताऽधिकरणे कर्म्मण्यारम्भभाव्यत्वादित्यत्र च निराकृते तद्द्वारत्वे ऽपूर्वमेवमाश्रयितव्यमिति तच्छब्दमध्याहृत्य यागेनापूर्वं कृत्वा स्वर्गं भावयेदित्यपूर्वेतिकर्त्तव्यतायुक्तो यागो ज्वालोपेतकाष्ठादिवत्पाकमिव फलं प्रति करणतया विनियुज्यतइत्यपूर्वाधिकरणेनोक्ते कथमनेनापूर्वं कर्त्तव्यमिति पुनरितिकर्त्तव्यताकाङ्क्षा काष्ठादीनामिव ज्वालासिद्ध्यर्थं जायते तत्र षड्विधेनोपदेशेन त्रिविधेन चातिदेशेन स्मृत्याचाराभ्यां श्रुत्यर्थादिभिश्च यथायथं तेन द्वारेण समर्पितं जातिद्रव्यगुणक्रियाक्रमात्मकमङ्गजातमित्थंभावेन शुष्कत्वादिवत्स्वीक्रियते । अत एव प्रधानं फलप्रयुक्तं तथा प्रकल्पिते ऽपूर्वे दीक्षणीयादिवदकल्पिते चावा-

न्तरापूर्वं प्रधानापूर्वं फलं प्रति विनियुज्यते तेन दीक्षणीयेव परमापूर्वप्रयुक्ता फलप्रयुक्तमेव प्रधानम् । अङ्गन्तु कल्पिते ऽपूर्वे तदङ्गत्वेन दीक्षणीयाङ्गवाङ्गियमवदवान्तरापूर्वाङ्गत्वेन विनियुज्यमानं तद्वदेवावान्तरापूर्वप्रयुक्तं न परमापूर्वप्रयुक्तमिति वेदितव्यम् । ततः सर्वविशेषणविशिष्टभावनानुष्ठानं प्रयोजकत्वाप्रयोजकत्वतन्त्रावापप्रसङ्गतदपवादावगतपरिमाणं श्रुत्यर्थाद्यवगतक्रमसहितं फलार्थिनं सकलाङ्गानुष्ठानक्षमं काम्येषु । नित्यनैमित्तिकेषु तु किं चिदङ्गानुष्ठानाशक्तमपि पुरुषं प्रति विधिर्विधत्तइति । एतत्सर्वं वाक्यार्थसंग्रहरूपेण वार्त्तिकेन "भावनावचनस्तावत्तां स्मारयति लोकवदित्यादिना ।

"तस्मात्प्रक्रान्तरूपो ऽपि विधिस्तावत्प्रतीक्षते ।
यावद्योग्यत्वमापन्ना भावना ऽन्यानपेक्षिणी"

इत्येवमन्तेन दर्शितमिति वेदितव्यम् ॥

भुवनत्रयविख्यातश्रीमद्यज्ञात्मनन्दनः ।
तत एव श्रुतं प्राप्य विश्रुतः पार्थसारथिः ॥३६॥

मीमांसाब्धिं व्याकुलं चोद्यनक्रैर्मन्दप्रज्ञैर्दुर्विगाह्यं विगाह्य ।
प्रत्याचार्यैरादृतैर्न्यायरत्नैर्मालामेनां कल्पयामास धीरः ३७.

नमो जैमिनय ❀ ❀ ❀ नोप्यभट्टाभियि:* ।
न्यायदीपैः समुत्तीर्णो ज्वलद्भिरिव भास्यते ॥३८॥

इति श्रीमद्यज्ञात्माचार्यसूनोः पार्थसारथिमिश्रस्य कृतौ न्यायरत्नमालायामङ्गनिर्णयः समाप्तः ॥

---

* अयं श्लोकः पु[illegible] दृश्यते ।